A-PDF Page Crop DEMO: Purchase from www.A-PDF.com to remove the watermark


सूत उवाच ॥

तीर्थं वैश्रवणं नाम सर्वपापविनाशनम् ॥ सर्वैश्वर्यकरं चैव सर्वकामफलप्रदम् ॥६३॥

## विनायकतीर्थोपक्रमः

तस्यैतस्य तु क्रोशार्धे तीर्थं वैनायकाभिदम् ॥ उदीच्यां दिशि राजेन्द्र सर्वसिद्धनिषेवितम् ॥६४॥

एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे रावणेश्वरादिलिङ्गं कुबेरेश्वरमहिमानुवर्णनंनाम एकसप्ततितमोऽध्यायः ॥७१॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ७२ ॥  NEXT>>  श्लोक संख्या–१२१

## ॥ विनायकाश्रमम् विनायकतीर्थं केतकीविनायकः ॥

### केतकीविनायककथा

शतानीक उवाच ॥

वैनायकस्य तीर्थस्य सम्भवं वक्तुमर्हसि ॥ विनायकः किमकरोदेतन्मे विस्तराद्वद ॥१॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि तीर्थं वैनायकं महत् ॥ गिरेः कलक्लाख्यस्य आग्नेय्यां दिशि विद्यते ॥
२॥

वैनायकाश्रमं नाम सर्वसिद्धनिषेवितम् ॥ तत् केतकीवनमिति प्रवदन्ति विपश्चितः ॥३॥

पुरा तु केतकी यत्र परां सिद्धिमुपागता ॥ तत्र तप्त्वा गजास्यस्तु परां सिद्धिमुपागमत् ॥४॥

## शिवपार्वतीविवाहः

दाक्षायणी शिवस्याभूत् पूर्वं भार्या सती नृप ॥ जनकस्यावमानेन परित्यज्य निजं वपुः ॥५॥

हिमाद्रेरभवत् पुत्री मेनकायायां नृपोत्तम ॥ साप्यतिष्ठत् पितुर्गेहे वर्धमाना दिने दिने ॥६॥

शिवोपि भार्यानिधनं श्रुत्वा क्रोधवशं गतः ॥ स्वांशेन वीरभद्रेण दक्षयज्ञो व्यनाशि च ॥७॥

भार्याविरहसन्तप्तस्त्यक्त्वा कैलासमुत्तमम् ॥ हिमाद्रिनिकटे स्थित्वा तप उग्रं चकार ह ॥८॥

बद्धपद्मासनो मौनी ब्रह्मध्यानपरायणः ॥ तत्र तस्मिंस्तप्यमाने तप उग्रं महेश्वरे ॥९॥

देवर्षिर्नारदोऽभ्येत्य हिमवन्तमभाषत ॥

नारद उवाच ॥

हिमाचल भवत्पुत्रीं नान्यस्मै दातुमर्हसि ॥१०॥

इयं हि दक्षस्य सुता पूर्वजन्मनि भारत ॥ शङ्करस्य पुरा भार्या सतीति प्रथिता गिरे ॥११॥

त्वत्समीपे स्थितः शम्भुस्तस्य भार्या भविष्यति ॥ इत्युक्त्वा प्रययौ राजन्नारदो भगवान् मुनिः ॥

१२॥

नारदस्य वचः श्रुत्वा सन्तुष्टो हिमवान् गिरिः ॥ गौरीं विलोक्य तनयामीषद्यौवनमास्थिताम् ॥१३॥

यदुक्तं ऋषिणा तेन मृषा तन्न भविष्यति ॥ इत्येवं चिन्तयित्वा तु हिमाद्रिस्तदनन्तरम् ॥ १४॥

प्रियया सह पुत्रेण गौरीमादाय सत्वरम् ॥ शिवस्य निकटे प्राप्य ददर्श परमेश्वरम् ॥१५॥

मूले न्यग्रोधवृक्षस्य रत्नविष्टर आस्थितम् ॥ दण्डवत् प्रणिपत्योर्व्यां स्तुत्वा च विविधैः स्तवैः ॥

१६॥

कृताञ्जलिपुटो भूत्वा हिमवानिदमब्रवीत् ॥ देव देव महादेव पुरत्रितयमर्दन ॥१७॥

नमोस्तु तुभ्यं भूतेश वचनं शृणु मे विभो ॥ क्षमस्वागः कृतवतो मम कालविलम्बनम् ॥१८॥

त्वत्सेवार्थं नागतोऽस्मि क्षमासारा हि साधवः ॥ इयं ममात्मजा गौरी त्वत्सेवाञ्च करिष्यति ॥१९॥

त्वत्पार्श्वे तिष्ठति विभो सर्वावयवसुन्दरी ॥ तथास्त्विति शिवेनोक्ते हिमवान् पर्वताधिपः ॥ २०॥

प्रस्थाप्य गौरीं निकटे स्वगृहं पुनराययौ ॥ सा कुमारी तथा चक्रे यथा पित्रा प्रचोदिता ॥२१॥

सुस्नाता शुद्धवसना सुस्नेहा चारुहासिनी ॥ शाखं मूलं फलं पक्वं ददती शम्भवेऽनिशम् ॥२२॥

व्यजनेन हरं देवी वीजयन्ती महेश्वरम् ॥ शुश्रूषमाणां तां दृष्ट्वा मुमुदे परमेश्वरः ॥२३॥

कदाचिद्देवराजेन प्रहितो मन्मथो नृप ॥ शुश्रूषमाणं पार्वत्या शङ्करं प्रेक्ष्य कार्मुके ॥२४॥

शरं सन्धाय सबलं विचकर्ष तदा स्मरः ॥ ततो विकारभूतात्मा शङ्करः प्रेक्ष्य मन्मथम् ॥२५॥

दुरात्मनोऽस्य कर्मेति ललाटाक्षं न्यधात् स्मरे ॥ तस्मादुद्भूतदहनाद् भस्मशेषो ह्यभूत् स्मरः ॥२६॥

भस्मावशेषं भर्तारं रतिर्दृष्ट्वातिदुःखिता ॥ विलप्य बहुधा तत्र पतिना सह पावके ॥२७॥

आत्मानं मोक्तुमिच्छन्त्या शुश्रुवे वाङ्नभश्चरी ॥ मा साहसं कृथास्तन्वि भर्ता तव भविष्यति ॥२८॥

इति वाचं रतिः श्रुत्वा निवृत्ताग्निप्रवेशतः ॥ हिमवन्तं प्रेषयित्वा पार्वतीं परमेश्वरः ॥२९॥

स्वयं कैलासमगमत् शङ्करः पार्थिवोत्तम ॥ गौरीं विलोक्य हिमवान् पप्रच्छ प्रीतिसंयुतः ॥३०॥

गौरि त्वं शूलिनं त्यक्त्वा किमर्थं चागताऽत्र वै ॥ तच्छ्रुत्वा वचनं तन्वी गौरी पितरमब्रवीत् ॥३१॥

पार्वत्युवाच ॥

अहं तवाज्ञया नित्यं सेवन्ती परमेश्वरम् ॥ स्थिता तत्सन्निधाने तु एकधा मन्मथः पितः ॥३२॥

सन्दधे कार्मुकं तस्मिन् शिवो विकृतिमागतः ॥ मां त्यक्त्वैव शिवोऽगच्छत् कैलासं पर्वतोत्तमम् ॥
३३॥

तस्य नेत्राग्निना कामो भस्मशेषो बभूव ह ॥ अहमत्रागता यस्मात् शिवदर्शनलालसा ॥३४॥

तत्पादकमलादन्यं न भजामि शुचिव्रता ॥ तस्मात्तपश्चराम्यद्य अनुज्ञां देहि मे पितः ॥३५॥

हिमवान् तद्वचः श्रुत्वा ह्यब्रवीत् स तथेति च ॥ ततः सा पार्वती राजन् हिमाचलसमीपतः ॥३६॥

कृत्वाश्रमपदं रम्यं तपो घोरमतप्यत ॥ शिवलिङ्गार्चनपरा शिवध्यानपरायणा ॥३७॥

ततो गौरीहृद्गतं तु ज्ञातुं प्रादुरभूद्धरः ॥ वटुरूपधरो भूत्वा गौरीनिकटमागमत् ॥३८॥

दृष्ट्वा कृताञ्जलिर्भूत्वा कपटब्रह्मचारिणम् ॥ ननाम शिरसा देवी आस्यतामिति चाब्रवीत् ॥३९॥

वटुरासन आसीनो विश्रान्तोऽभून्नृपोत्तम ॥ ततो गौरीमुवाचेदं वटुरूपधरो हरः ॥४०॥

ब्रह्मचार्युवाच ॥

का त्वं कमलपत्राक्षी कस्य पुत्रि वरानने ॥ बाल्यभावे तपः कस्माद्ब्रूहि तत्कारणं शुभे ॥४१॥

गौर्युवाच ॥

अहं पर्वतराजस्य तनया पतिकांक्षिणी ॥ तस्मात् तपश्चराम्यद्य शिवध्यानपरायणा ॥ ४२॥

वटुरुवाच ॥

पतिकामासि चेद्गौरि मम भार्या भवाधुना ॥ अहं ब्रह्मकुलोत्पन्नो ब्रह्मचारी शुभानने ॥ ४३॥

यदि ते रोचते सुभ्रु तथा मां वद पार्वति ॥ ब्रह्मचारिवचः श्रुत्वा गौरी प्राह पुनस्तदा ॥४४॥

गौर्युवाच ॥

शिवादन्यं वृणे नाहमिति ब्रह्मन् ममेप्सितम् ॥ एवमुक्तो वटुर्गौर्या कुपितः पुनरब्रवीत् ॥४५॥

साध्वकार्षीर्महाभागे स्वानुकुलेषु सत्स्वपि ॥ प्रथितेषु कुमारेषु पाताले भुवि च द्यवि ॥ ४६ ॥

श्मशानवासिनं चर्मवसनं सर्पभूषणम् ॥ कपालधारिणं भिक्षामटन्तं प्रतिमन्दिरम् ॥४७॥

सक्ष्वेलकण्ठं प्राङ्नष्टकलत्रां त्रपवर्जितम् ॥ अमातृपितृकं भूतपिशाचप्रेतसेवितम् ॥ ४८ ॥

अस्थिमालावलीयुक्तदेहं वृषभवाहनम् ॥ अनिकेतनमत्युग्रं विरूपाक्षं स्मरद्विषम् ॥४९॥

वृद्धं जटाधरं नाशं चर्मवस्त्रधरं सदा ॥ इति ब्रुवति सा गौरी वटौ पार्थिवसत्तम ॥५०॥

क्रोधेन महता युक्ता वटुं पुनरथाब्रवीत् ॥ चतुर्दशानां लोकानामधिपं परमेश्वरम् ॥५१॥

समस्तदेवतावृन्दैः सेवितं प्रमथाधिपम् ॥ वेदान्तवेद्यमचलं पुराणपुरुषं विभुम् ॥ ५२॥
रजताद्रिकृतावासं रजनीकरशेखरम् ॥ भजद्भ्यो निजपादाब्जं साक्षात् कैवल्यदायकम् ॥ ५३॥
पातकानि प्रणश्यन्ति यस्य स्मरणमात्रतः ॥ एतादृशं लोकगुरुं त्वत्तः कोऽन्यो विनिन्दति ॥५४॥
दुरात्मन् याहि शीघ्रं त्वं मत्समीपाद्बहिर्वटो ॥ इति प्रभाषमाणायां पार्वत्यां कुरुसत्तम ॥ ५५॥
तुतोष भगवान् शम्भुः प्रत्यक्षमगमत् तदा ॥ गौरी ददर्श तं शम्भुं साक्षात् प्रत्यक्षमागतम् ॥५६॥
तं दृष्ट्वा शङ्करं गौरी मुदा परमया युता ॥ प्रणनाम समुत्थाय शम्भोः पादाम्बुजं नृप ॥५७॥
ततोऽब्रवीच्छिवो गौरीं विज्ञातं तव हृद्गतम् ॥ तुष्टोस्म्यागच्छ गच्छावः कैलासं प्रति भामिनि ॥ ५८ ॥
इति ब्रुवन्तं भूतेशं गृह्णन्तं पाणिमात्मनः ॥ विलोक्य साऽब्रवीद्देवमेष एव हि मे वरः ॥५९॥
तथापि लौकिकां वृत्तिमनुसृत्य पितुर्गृहे ॥ कृतोद्वाहौ गमिष्यावस्तत्र यत्नो विधीयताम् ॥६०॥
इति तद्वचनं युक्तं मन्वानः परमेश्वरः ॥ हिमालयं प्रेषयित्वा पार्वतीं प्रणयान्वितः ॥६१॥ ब्रह्मविष्णवादिकान् देवान् सप्तर्षिप्रमुखानृषीन् ॥ सस्मार शङ्करः सद्यः सर्व एव समागताः ॥६२॥
तैः समं प्रययौ राजन् हिमाद्रिं शङ्करस्तदा ॥ ततो हिमाचलो दृष्ट्वा दूरादायान्तमीश्वरम् ॥ ६३॥
सगणोऽभ्युत्थितस्तूर्णमासनात् सम्भ्रमेण च ॥ प्रत्युद्गम्यागतान् सर्वान् नानावाद्यपुरःसरम् ॥६४॥
पूजयामास विधिवन्मधुपर्कादिना नृप ॥ ततो गौरीमलङ्कृत्य हिमवान् वस्त्रभूषणैः ॥६५॥
मेनया सहितो राजन् मैनाकेन समन्वितः ॥ पुरन्ध्रीभिः समं तत्र ऋषिभिः सह पर्वतैः ॥६६॥
नानावाद्यरवैः सार्धं नृत्तगीतादिमङ्गलैः ॥ ससम्भ्रमान्नृपश्रेष्ठ शङ्करस्यान्तिकं ययौ ॥६७॥
गौरीं गृहीत्वा हस्ते तु शङ्करस्य करे ददौ ॥ देवदुन्दुभयो नेदुः ननृतुश्चाप्सरोगणाः ॥६८॥
जगुर्गन्धर्वपतयो ऋषयो वेदपाठकाः ॥ एवं विवाहमकरोद्गौरीशङ्करयोर्गिरिः ॥६९॥
बभूवातितरां हृष्टो मेनया सह भार्यया ॥ ततो महेश्वरो देवो गौरीं हिमवतः सुताम् ॥७०॥
सर्वालङ्कारसंयुक्तामादाय सह पार्षदैः ॥ देवैर्ऋषिगणैः सार्धं अगात् कैलासपर्वतम् ॥७१॥
पार्षदैः सेव्यमानस्तु रेमे गिरिजया समम् ॥

## शिवेन कामशापविमोचनम्

शौनक उवाच ॥

निहते मन्मथे सूत शङ्करेण महामते ॥७२॥

रतिः किमकरोद्देवी पतिशोकातुरा भृशम् ॥ देवाश्च किमकुर्वन्त एतन्नो वक्तुमर्हसि ॥७३॥

सूत उवाच ॥

अनङ्गे भस्मसाद्भूते हरनेत्राग्निना मुने ॥ निर्विकारास्ततो देवा न रतिं प्रतिपेदिरे ॥७४॥

नेषुश्च पुरुषास्त्रीश्च स्त्रियश्च पुरुषान् क्वचित् ॥ अन्धकारावृतमिव सर्वं जगदिदं ह्यभूत् ॥७५॥

ततः संमन्त्र्य ते सर्वे अमरा ऋषिभिः सह ॥ येन नष्टमभूत् कार्यं तत्केनापि न साध्यते ॥७६॥

अस्मिन् काले च स शिवः कृतोद्वाहः प्रवर्तते ॥ प्रार्थयित्वा तु तं देवं पुनरुज्जीव्य मन्मथम् ॥
७७॥

लप्स्यामहे वयं सर्वे सवधूका मनोरथान् ॥ इति निश्चित्य ते सर्वे द्रष्टुकामा महेश्वरम् ॥७८॥

कैलासमगमन् सर्वे प्रणिपत्येदमब्रुवन् ॥

ऋषय ऊचुः ॥

भवता दग्धदेहस्तु मदनः परमेश्वर ॥७९॥

तस्मादिदानीं लोकास्तु ह्यासन् कामविवर्जिताः ॥ तव सृष्टिर्वृथा भूयात् तस्मात् कामं प्रदेहि नः ॥
८०॥

शिव उवाच ॥

अतः परं न तस्याङ्गं चित्तजन्मा भविष्यति ॥ सर्वेषां वः सुखं भूयात् कामो देवर्षिसत्तमाः ॥८१॥

वैवस्वतेन्तरे प्राप्ते यदुवंशे जनार्दनः ॥ यदावतारं कुरुते तदा देहं स लप्स्यति ॥८२॥

---

## विनायकजननं तस्य मात्रा शापः

इत्युक्ते तु महेशेन कामस्तस्यैव चेतसि ॥ आविर्बभूव सद्यस्तु चित्तजन्मा ततोऽभवत् ॥८३॥

पार्वतीं हिमवत्पुत्रीं सर्वावयवसुन्दरीम् ॥ वीक्ष्यमाणस्य शम्भोस्तु ललाटाद्विकृतात्मनः ॥८४॥

उदगच्छन्महातेजा कुमारोऽभूत् तदाकृतिः ॥ दीपाद्दीपान्तरमिव सर्वलोकमनोहरः ॥८५॥

तमादायात्मनेत्रोत्थं कुमारं परमेश्वरः ॥ गाढमालिङ्ग्य तं शम्भुर् गौर्या हस्ते ददौ तदा ॥८६॥

तं दृष्ट्वा देवताः सर्वा हृष्टा आसन् शिवात्मजम् ॥ आसीत् संरक्ष्यमाणस्तु पार्वत्या प्रियया तदा ॥
८७॥

विनायकाख्यां गमितो विजहार यथासुखम् ॥ एकदा तु गतः सोऽथ क्रीडार्थं गिरिसानुषु ॥८८॥

क्रीडित्वा सुचिरं कालं स्वगृहं पुनरागतः ॥ ततो गणपतिं दृष्ट्वा पार्वती तनयं तदा ॥८९॥

स्वभर्ता शङ्कर इति ह्यमन्यत गिरेः सुता ॥ ततस्तमात्मजं ज्ञात्वा कुपिता पार्वती तदा ॥९०॥
अशाप्सीत् तनयं देवी विकाराङ्गो भवत्विति ॥ गजाननो दशभुजः खर्वपाणिपदाम्बुजः ॥९१॥
लम्बोदरः शूर्पकर्णः सोऽभून्मातुश्च शापतः ॥ ततो दृष्टः शिवेनासौ पृष्टः क इति पार्वतीम् ॥९२॥
विनायकस्तव सुत इति सर्वं जगाद सा ॥

---

## विनायकाश्रमम् विनायकतीर्थं केतकीविनायकः

तच्छ्रुत्वाह प्रियां शम्भुर् नोचितं कृतवत्यसि ॥९३॥
ततो गजास्यमालिङ्ग्य मूर्ध्न्युपाघ्राय चाब्रवीत् ॥ गजास्य शृणु भद्रन्ते मातरं प्रति मा क्रुधः ॥
९४॥
इत्थं शिवः सान्त्वयित्वा ह्यात्मजं द्विरदाननम् ॥ पुनः शम्भुरुवाचेदमात्मजं प्रणयान्वितः ॥९५॥
मातृशापात्तु वैरूप्यं तव प्राप्तं गजानन ॥ इदमेव यथा भूयात् पुनः सौरूप्यमात्मनः ॥९६॥
गोकर्णं मामकं क्षेत्रं याहि सिद्धर्षिसेवितम् ॥ रुद्रयोन्या उत्तरस्य क्रोशार्धे संस्थितं शुभम् ॥९७॥
केतक्याः सिद्धिदं रम्यं केतक्याश्रममुत्तमम् ॥ तत्र स्थितस्त्वं तनय तपो घोरं समाचर ॥९८॥
इति पित्रोदितं श्रुत्वा तथास्त्विति गजाननः ॥ ततो गोकर्णमगमत् क्षेत्रं सिद्धर्षिसेवितम् ॥९९॥
तत्राश्रमपदं कृत्वा शुभे केतकिकानने ॥ निश्चलेनैव मनसा तपस्तेपे सुदुश्चरम् ॥१००॥
ततः कालेषु गच्छत्सु कदाचित् परमेश्वरः ॥ ब्रह्मविष्ण्वादिकैर्देवैः पार्वत्या प्रमथैः सह ॥१०१॥
आविर्बभूव पुरतो गजास्यस्य नृपोत्तम ॥ प्रसन्नं पितरं ज्ञात्वा आगतं त्रिदशैः सह ॥१०२॥ कृताञ्
जलिस्तदा राजन् प्रणनाम गजाननः ॥ प्रणमन्तं समुत्थाप्य शङ्करो गणनायकम् ॥१०३॥
उवाच तनयं वाक्यं प्रसन्नोऽहं सुरैः सुत ॥ तपसा तव सन्तुष्ट आगतस्तव सन्निधिम् ॥१०४॥
वरं वृणीष्व भद्रन्ते यत्ते मनसि वर्तते ॥

विनायक उवाच ॥

आज्ञया भवता तात तपस्तप्तं मयाऽधुना ॥१०५॥
यत्प्राप्तव्यं भवान् वेद तन्मह्यं दातुमर्हसि ॥ मातृशापविमोक्षं च देहि मे परमेश्वर ॥१०६॥

शिव उवाच ॥

मातृशापो वृथा न स्यात् तथापि शृणु पुत्रक ॥ इदं रूपं तव सुत स्मरणीयं भविष्यति ॥१०७॥
लोके पूज्यतमं भूयान्मत्प्रसादाद्गजानन ॥ अत्रागत्य नरो यस्तु पूजयेत् त्वां गजानन ॥१०८॥

निष्प्रत्यूहानि कार्याणि तस्य सिध्यन्ति पुत्रक ॥ पूजामकृत्वा यः कश्चिद्यत् किञ्चित् कुरुते यदि ॥
१०९॥
तस्य तत्र फलेत् कर्म विघ्नानामधिपो भव ॥ गणानामधिपश्चैव सम्पदामधिपस्तथा ॥११०॥
सुराणामसुराणाञ्च मनुष्याणाञ्च भोगिनाम् ॥ यक्षाणां किन्नराणाञ्च लोके पूज्यतमो भव ॥१११॥
इत्युक्त्वाऽस्मै करगतं शूलं प्रादान्निजायुधम् ॥ बीजापूरं कमलभूर्विष्णुश्चक्रं सुदर्शनम् ॥११२॥
ऐक्षवं कार्मुकं कामो गदां स्वामादिकेशवः ॥ गौर्युत्पलं रमा पद्मं रविः पाशं धरा यवान् ॥११३॥
धनदो रत्नसम्पूर्णं कलशं हेमनिर्मितम् ॥ वाहनं गजसङ्काशं हिमवान् मूषकं शुभम् ॥११४॥
अन्ये च देवा योग्यानि स्वानि स्वान्यायुधान्यदुः ॥ ततो विष्णुः प्रसन्नात्मा शक्तिं नाम
स्वकन्यकाम् ॥११५॥
एनां मुद्वाहयेत्युक्त्वा देवैर्ब्रह्मादिभिः सह ॥ ईश्वरस्याज्ञयाकार्षीत् पाणिग्रहणकं नृप ॥११६॥

सूत उवाच ॥

इति दत्वा वरं तस्मै शिवो देवैः समन्वितः ॥ गजास्येन तु संयुक्तस्तत्रैवादर्शनं गतः ॥११७॥
श्रावणे शुक्लपक्षे तु चतुर्थ्यां कुजवासरे ॥ तीर्थे वैनायके स्नात्वा गणानान्त्वेतिमन्त्रतः ॥११८॥
पूजयन्ति गणाध्यक्षं शर्कराभिस्तिलैर्घृतैः ॥ नारिकेलैरिक्षुदण्डैर्लाजै रम्भाफलैरपि ॥११९॥
अपूपैर्मोदकैः सक्तुफलपक्वादिभिर्नृप ॥ पूजयित्वा गणाध्यक्षं लभन्ते मनसेप्सितम् ॥१२०॥
इत्येवमुक्तं गणनायकस्य माहात्म्यमेतन्मनुजाः पठन्ति ॥
ते कार्यसिद्धिं समवाप्नुवन्ति तथा लभन्ते महतीं श्रियं च ॥१२१॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे विनायकाश्रम वर्णनं नाम द्विसप्ततितमोऽध्यायः ॥
७२॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ७३ ॥ NEXT>> श्लोक संख्या–७३

॥ ब्रह्मेश्वर,ब्रह्मतीर्थ,ब्रह्माश्रम – केतकीतीर्थ,केतक्याश्रम,केतकीश्वरवर्णनम् ॥

केतकीब्रह्मणोः शिवात् शापावाप्तिः

शतानीक उवाच ॥

किं कारणं च केतक्या तपस्तप्तं द्विजोत्तम ॥ केतकी तत्र कां सिद्धिं प्राप्ता तन्मे वदस्व भो ॥१॥

सूत उवाच ॥
शृणु राजन् प्रवक्ष्यामि केतक्याश्रममुत्तमम् ॥ केतक्याश्रममाहात्म्यं श्रोतृणामिष्टदं महत् ॥२॥
पुरा विवादो ह्यभवद्ब्रह्मविष्ण्वोर्नृपोत्तम ॥ अहं श्रेयानहं श्रेयानित्यभूत् कलहो मिथः ॥३॥
दण्डचक्रधरौ देवौ परस्परमयुध्यताम् ॥ देवाः शमयितुं तत्र न शेकुः कलहं तयोः ॥४॥
एतस्मिन्नन्तरे काले मध्ये ह्याविरभूत् तयोः ॥ सहस्रादित्यसदृशं लिङ्गमाद्यन्तवर्जितम् ॥५॥
ततः शम्भुरगात्तत्र विधिविष्णू विलोक्य च ॥ शिवोप्युवाच वचनं मा भूद्वां कलहो मिथः ॥६॥
अस्य लिङ्गस्य मूर्धानं पादं वा योऽभिपश्यति ॥ स श्रेष्ठ इति मन्येऽहं गच्छतं शीघ्रमेव हि ॥७॥
तथास्त्विति शिवेनोक्तामङ्गीकृत्य सुरर्षभौ ॥ हंसो भूत्वा विधिरगाच्छिरो दृष्टुं विहायसम् ॥८॥
विष्णुर्वराहरूपोऽधः पादं दृष्टमगान्नृप ॥ गच्छन्नूर्ध्वमुखो ब्रह्मा दृष्टुं लिङ्गस्य वै शिरः ॥९॥
अत्यगात् सुमहान् कालस्ततो दृष्ट्वा तु केतकीम् ॥ लिङ्गोत्तमाङ्गात् गलितां सुगन्धां सुमनोहराम् ॥१०॥
दिशः प्रकाशयन्तीं तां दृष्ट्वा प्रोवाच पद्मभूः ॥ ब्रूहि मे त्वं यथार्थेन कुत आयासि केतकि ॥११॥
विष्णुनाहं पणं कृत्वा लिङ्गान्तं दृष्टमागतः ॥ बहुकालो गतो मेऽद्य गच्छतश्चोर्ध्ववर्त्मनि ॥१२॥
उत्तमाङ्गं न पश्यामि लिङ्गस्यास्य शुभानने ॥ यदि जानासि मे ब्रूहि शिरो लिङ्गस्य केतकि ॥१३॥
केतकी तमुवाचेदं मां महेश्वरमस्तकात् ॥ आगतां विद्धि देवेश बहुकालोऽत्यगान्मम ॥१४॥
इदानीं तस्य पादं तु न पश्येयं चतुर्मुख ॥ केतक्या वचनं श्रुत्वा प्रत्याह च विधिः पुनः ॥१५॥
दृष्टो मूर्धा ब्रह्मणेति त्वया वाच्यं शिवान्तिके ॥ साहाय्यं कुरु मे त्वं हि दास्येहं तव वाञ्छितम् ॥१६॥
तथास्त्विति तया प्रोक्ते तया सार्धमधोऽविशत् ॥ विष्णुर्वराहरूपेण गतो कूर्मावधिं नृप ॥१७॥
लिङ्गमूलमनालोक्य पुनरूर्ध्वमगाद्धरिः ॥ तावागतौ समालोक्य विधिविष्णू पुरान्तकः ॥१८॥
तावपृच्छत् तदा शूली भवद्भ्यां किमु चाद्य वै ॥ लिङ्गस्यादिस्तथा चान्तो दृष्टो ब्रूतं ममाग्रतः ॥१९॥
इत्युक्तवति शम्भौ तु ब्रह्मा प्रोवाच शङ्करम् ॥ दृष्टं मया शिर इति साक्षिणी केतकी त्विह ॥२०॥
केतक्यपि तथेत्याह ब्रह्मप्रियचिकीर्षया ॥ तदा विष्णुरुवाचेदं नानृतं वक्तुमुत्सहे ॥२१॥
मया न दृष्टौ पादौ तु लिङ्गस्याधोगतेन हि ॥ शिवोपि ब्रह्मणोक्तं तद्विज्ञायानृतभाषणम् ॥२२॥
केतक्याश्चापि राजेन्द्र ततः कोपमुपेयिवान् ॥ अशपत् केतकीं शम्भुरयोग्या भव मेऽर्चने ॥२३॥

यतोऽवादीः कूटसाक्षीमद्य प्रभृति केतकि ॥ ततोऽशपद्विधिं राजन्नपूज्यो भव विष्टपे ॥२४॥

## कालभैरवोत्पत्तिः

एवं शप्त्वा तदा शम्भुः कोपमाहारयद्भृशम् ॥ तत उत्पादयामास कोपेनोत्कटभैरवम् ॥२५॥
ततः स पुरतः स्थित्वा भैरवस्त्रिपुरद्विषः ॥ यतः सृष्टो ह्यहं देव तद्ब्रूहि परमेश्वर ॥२६॥
तदाकर्ण्याह भगवान् सृष्टरूर्ध्वशिरोऽहनः ॥ तच्छ्रुत्वा भैरवः शीघ्रं खड्गेनेकं शिरोऽच्छिनत् ॥२७॥
स ब्रह्महत्याग्रस्तः सन् बभ्राम जगतीतलम् ॥ स्त्र स्त्र

## शिवेन विष्णोरनुग्रहः

ततः शम्भुः प्रसन्नात्मा विष्णुं प्राह नृपोत्तम ॥२८॥
उक्तं त्वया हरे यस्माद्वाक्यं सत्यसमन्वितम् ॥ तस्मात् पूज्यो भव सदा त्रैलोक्ये त्वं जनार्दन ॥२९॥
इत्युक्त्वा शङ्करो राजन् तत्रैवादर्शनं गतः ॥

## ब्रह्माश्रम,ब्रह्मेश्वर,ब्रह्मकुण्ड

केतकी च विधिश्चापि लब्ध्वा शापं पिनाकिनः ॥३०॥
विषण्णवदनौ भूत्वा चिन्तयन्तौ तदा नृप ॥ तदुपायं विदित्वा तु केतक्या सह पद्मजः ॥३१॥
गोकर्णक्षेत्रमासाद्य शतशृङ्गोत्तरे तटे ॥ पितृस्थाल्या दक्षिणतः कृत्वाश्रमपदं शुभम् ॥३२॥
तत्र कृत्वा महातीर्थं सर्वपापप्रणाशनम् ॥ शतशृङ्गगिरेर्मूर्ध्नि लिङ्गं संस्थाप्य शाम्भवम् ॥३३॥
तीर्थे स्नायन्ननुदिनं तल्लिङ्गं पूजयन्नृप ॥ तपश्चचार सुचिरं ब्रह्मध्यानपरायणः ॥३४॥
उवास सुचिरं कालं ब्रह्मा तत्र समाहितः ॥ बद्धपद्मासनो मौनी नासाग्रन्यस्तलोचनः ॥३५॥
एवं तपस्यतस्तस्य बहुकालोऽत्यगान्नृप ॥ ततः प्रसन्नो भगवान् शङ्करो भक्तवत्सलः ॥३६॥
उवाच वचनं श्लक्ष्णं ब्रह्माणं गिरिजापतिः ॥ वरं वृणीष्व वाणीश तपसा तोषितोस्म्यहम् ॥३७॥
यथाभिलषितं चित्ते तथा दास्याम्यहं ध्रुवम् ॥ शर्वेरितं वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥३८॥
शिरसा तं प्रणम्याथ वचनं चेदमुक्तवान् ॥ कृतार्थोस्मि महाभाग दर्शनाद्भक्तवत्सल ॥३९॥
अपराधं क्षमस्वाद्य मत्कृतं त्वयि शङ्कर ॥ त्वन्मायया मोहितोऽहमनृतं चोक्तवान् पुरा ॥४०॥
त्वया दत्तस्य शापस्य विमोक्षं कुरु शङ्कर ॥ पूजार्होहं यथा स्यां वै तथा लोके कुरु प्रभो ॥४१॥

मया कृतामिदं तीर्थं लिगञ्च सुरसत्तम ॥ कामदं सर्वलोकानां सर्वपापहरो भवेत् ॥४२॥
भवेदुत्तमतां लोके यदि तुष्टोसि शङ्कर ॥

शङ्कर उवाच ॥

तथास्तु मत्प्रसादेन यदुक्तमनृतं त्वया ॥४३॥
तद्दोषो विलयं प्राप्तः क्षेत्रस्यास्य प्रभावतः ॥ पूजार्हस्त्वं भव विधे होमकर्मणि नान्यतः ॥४४॥
मूर्तिरूपेण त्वं तिष्ठ क्षेत्रेस्मिन् सर्वदा जनैः ॥ अर्चनीयोसि भगवन् मत्प्रसादाच्चतुर्मुख ॥४५॥
ये ते मूर्तिं पूजयन्ति तेषां स्युः सर्वसिद्धयः ॥ दीर्घायुषस्तेऽपि मर्त्यास्तव लोकं व्रजन्तु वै ॥४६॥
तीर्थमेतत् सुरश्रेष्ठ लिङ्गञ्च स्थापितं त्वया ॥ ब्रह्मेश्वराभिधानेन तीर्थञ्चैव तथाविधम् ॥४७॥
त्रैलोक्ये विश्रुतं भूयाद्वाञ्छितार्थप्रदायकम् ॥ अत्रागत्य नरो यस्तु स्नात्वा लिङ्गं प्रपूज्य च ॥४८॥
यो जपेत् तव गायत्रीं तस्य पुण्यमनन्तकम् ॥ चैत्रशुक्लत्रयोदश्यां स्नानञ्चात्र विशिष्यते ॥४९॥
तस्मिन् दिने कृतं कर्म एकं काटिगुणं भवेत् ॥ इति दत्वा वरं तस्मै तत्रैवान्तर्दधे हरः ॥५०॥
ब्रह्मा स्वस्थानमगमत् स्वमूर्तिं स्थाप्य तत्र वै ॥ रुद्रयोन्या दक्षिणस्यां दिशि किञ्चिद्विदूरतः ॥५१॥
ब्रह्मकुण्डमिति ख्यातं तीर्थं कामप्रदं नृणाम् ॥ तस्माद्दक्षिणतः किञ्चिद्विदूरे भरतर्षभ ॥५२॥
शतशृङ्गस्य शिरसि स्थितं ब्रह्मेश्वराभिधम् ॥ स्वर्गापवर्गफलदं पापघ्नं सेवतां नृणाम् ॥५३॥
(ब्रह्मतीर्थ–कमण्डलुतीर्थ)

---

## केतक्याश्रमं

शतानीक उवाच ॥

आदाय शङ्कराच्छापं केतकी चाकरोत् किमु ॥ कथं योग्या बभूवा सा पूजायां त्रिपुरद्विषः ॥५४॥
गोकर्णं क्षेत्रमासाद्य कुत्रोवास वदस्व नः ॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि केतक्याश्चरितं च यत् ॥५५॥
केतकी ब्रह्मणा सार्धं प्राप्य गोकर्णमुत्तमम् ॥ गोशृङ्गादे दक्षिणस्यां शरपातोपरि नृप ॥५६॥
कृत्वाश्रमपदं तत्र लिङ्गं संस्थाप्य चोत्तमम् ॥ तीर्थं कृत्वा विधानेन शिवध्यानपरायणा ॥५७॥
दिव्यवर्षसहस्राणि सा चकार महत्तपः ॥ ततस्तुतोष भगवान् कपर्दी नीललोहितः ॥ ५८॥
उवाच वचनं श्लक्ष्णं केतकीं वृषभध्वजः ॥

शङ्कर उवाच ॥

तुष्टोस्मि तपसा भद्रे दमेन नियमेन च ॥५९॥
वरं वरय भद्रन्ते यत्ते मनसि कांक्षितम् ॥ तद्ददाम्यविलम्बेन यद्यपि स्यात् सुदुर्लभम् ॥६०॥
इति शर्वेरितं श्रुत्वा केतकी नृपसत्तम ॥ ननाम दण्डवद्भूमौ प्रबद्धकरसम्पुटा ॥६१॥
किञ्चिन्नम्राननना भूत्वा प्राह गद्गदया गिरा ॥

केतक्युवाच ॥

नमो नमः शङ्कर शूलपाणे नमो नमः कारणकारणाय ॥
गङ्गाधरायान्धकमर्दनाय श्रीनीलकण्ठाय नमो नमस्ते ॥६२॥
इति स्तुत्वा महादेवं केतकी वरमीप्सितम् ॥ वव्रे सा नृपशार्दूल शङ्करं भक्तवत्सलम् ॥६३॥

केतक्युवाच ॥

वरं ददासि चेन्मह्यं वरार्हा यदि चाप्यहम् ॥ मया कृतं त्वयि विभो अपराधं क्षमस्व भो ॥६४॥
अहं हि तव पूजायां यथा योग्या तथा कुरु ॥ मया कृतमिदं देव आश्रमं पुण्यवर्धनम् ॥६५॥
तथैव तीर्थं लिङ्गञ्च त्रैलोक्योत्तमतां व्रजेत् ॥ इतीरितं तया वाक्यं श्रुत्वा देवः पिनाकधृक् ॥६६॥
उवाच केतकीं शम्भुस्त्वत्पापान्तो न विद्यते ॥ तथापि मयि भक्त्या च क्षेत्रस्यास्य प्रभावतः ॥६७॥
तपसा तव कल्याणि व्रतेन नियमेन च ॥ तुष्टो ददाम्यहं तेऽद्य शिवरात्रौ शुभे दिने ॥६८॥
मत्पूजायां शुभे चार्हा भव नान्यदिने क्वचित् ॥ तद्दिने त्वां समादाय विदार्यार्चति यो मम ॥ ६९॥
सर्वक्रतुफलं तस्य भवत्येव न संशयः ॥ तीर्थमेतन्महाभागे लिङ्गं च स्थापितं त्वया ॥ ७० ॥
सर्वकामपदं चास्तु सर्वपापहरं भवेत् ॥ कूटसाक्ष्युद्भवं पापमत्र स्नात्वा विनश्यति ॥ ७१॥
इति दत्वा वरं शम्भुस्तत्रैवान्तरधीयत ॥ वरं लब्ध्वा केतकी सा आस्ते राजन् यथासुखम् ॥७२॥
एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे ब्रह्माश्रमकेतक्याश्रमवर्णनंनाम त्रिसप्तति तमोऽध्यायः ॥७३॥

## कालभैरवः–घण्टाकर्णश्च(क्षेत्रपालः)

शतानीक उवाच ॥

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद ॥ त्वन्मुखान्निसृतं पीत्वा कथामृतपयोनिधिम् ॥१॥
न तृप्तिमधिगच्छामि ब्रूहि मे कृपया पुनः ॥ ब्रह्महत्यामवाप्याथ भैरवः शम्भुकोपजः ॥ २॥
ब्रह्महत्यायुतः सोऽथ कथं तन्मुक्तिमागतः ॥

सूत उवाच ॥

श्रुणु राजन् प्रवक्ष्यामि भैरवस्य कथां शुभाम् ॥३॥
भैरवस्तु ततो राजन् ब्रह्महत्याप्रपीडितः ॥ तीर्थयात्राप्रसङ्गेन देशाद्देशमटंस्तदा ॥४॥
श्रीशैलादीन् गिरीन् सर्वानयोध्यादिपुरीरपि ॥ अविमुक्ते चिरं स्थित्वा ततश्चिन्तामवाप सः ॥५॥
शङ्करानुज्ञया यश्च गोकर्णं क्षेत्रमागमत् ॥ तत्राश्रमपदं कृत्वा कोटितीर्थस्य दक्षिणे ॥६॥
हनूमदीश्वरात् प्राच्यां चचार सुचिरं तपः ॥ घण्टाकर्णेन सहितो भैरवो भरतर्षभ ॥७॥
निराहारो जितक्रोधो बद्धपद्मासनस्तदा ॥ पञ्चाग्निमध्यगो ग्रीष्मे वर्षास्वाकाशमध्यगः ॥८॥
हेमन्ते जलमध्यस्थो मौनव्रतपरायणः ॥ दिव्यवर्षसहस्रैकं चचार स तपो नृप ॥९॥
ततस्तु तपसा तुष्टः शम्भुरागत्य चाब्रवीत् ॥ कालभैरव तुष्टोऽस्मि तपसा तव सत्तम ॥ १०॥
इदानीं वाञ्छितं यत्ते तद्ब्रूहि त्वं ददामि ते ॥ इत्युदीरितमाकर्ण्य शम्भुना कालभैरवः ॥ ११॥
उवाच परया प्रीत्या वरदं परमेश्वरम् ॥ यदि तुष्टोऽसि देवेश ददासि यदि मे वरम् ॥१२॥
ब्रह्महत्या त्वियं घोरा बाधते मां दिवानिशम् ॥ सा मां यथा न बाधेत तथा कुरु कृपानिधे ॥१३॥
मया स्थितमिदं स्थानं ये त्वागत्य सुरोत्तम ॥ स्नानदानादिकं कर्म कुर्वन्ति मनुजा भुवि ॥१४॥
ब्रह्महत्यादिपापानि तेषां नश्यन्तु तत्क्षणात् ॥ भैरवोक्तं समाकर्ण्य शङ्करः प्राह तुष्टधीः ॥ १५॥

शङ्कर उवाच ॥

दिव्यवर्षसहस्रान्तं त्वया तप्तं महातपः ॥ तपसा तेन भक्त्या च क्षेत्रस्यास्य प्रभावतः ॥१६॥
ब्रह्महत्या तव सुत निःशेषं नाशिताऽभवत् ॥ स्थानमेतन्महाभाग ब्रह्महत्यादिनाशनम् ॥१७॥
सर्वाभीष्टप्रदं चैव सर्वारिष्टविनाशनम् ॥ मत्प्रसादाद्भवेत् कालभैरव ान्यद्ब्रवीमि ते ॥१८॥
अत्र स्थितानां मर्त्यानां गोकर्णे त्वं सदा सुत ॥ पाता सुकृतिनां चैव पापिनां शिक्षको भव ॥१९॥
गच्छ शीध्रं कुरुक्षेत्रमाज्ञया मम पुत्रक ॥ विष्णुं त्वं दृश्यसे तत्र स कपालं विमोक्ष्यति ॥२०॥

शिव उवाच ॥

घण्टाकर्ण महाबाहो मत्तस्ते वाञ्छितन्तु किम् ॥ तद्ब्रूहि त्वं प्रदास्यामि भक्तोसि त्वं दृढव्रत ॥२१॥

घण्टाकर्ण उवाच ॥

अस्मिन् क्षेत्रे त्वया सार्धं वस्तुमिच्छामि शङ्कर ॥ सेवे त्वामेव देवेश ददस्व वरमीदृशम् ॥२२॥

ईश्वर उवाच ॥

प्रियोसि मम भक्तोसि क्षेत्रेस्मिन् सर्वदा वस ॥ मया सह महाबुद्धे मत्क्षेत्रं परिपालय ॥२३॥

ततस्त्वं क्षेत्रपाल ाख्यो लोके ख्यातो भविष्यसि ॥ कृष्णपक्षे चतुर्दश्या मत्रागत्य नरोत्तमः ॥ २४॥

यस्त्वां विध्युक्तमार्गेण पूजयेत् कालभैरवम् ॥ तस्य ह्याजन्म चरितं ब्रह्महत्यादिकं च यत् ॥२८॥

तत्सर्वं विलयं यायान्मत्प्रसादान्न संशयः ॥ इति दत्वा तयोः शम्भुर्वरानभितान् नृप ॥२९॥

तत्रैवादर्शनं यातो भगवान् भूतभावनः ॥ ततः स भैरवो राजन् कपालेन समन्वितः ॥३०॥

शिवाज्ञया कुरुक्षेत्रं गत्वा विष्णुं ददर्श सः ॥ हरिस्तं भैरवं दृष्ट्वा विषण्णवदनं तदा ॥३१॥

कपालहस्तं राजेन्द्र कपालमिदमुक्तवान् ॥ कपाल तव किं कार्यं भैरवेण कृशात्मना ॥ ३२॥

तवाशां पूरयाम्यद्य मद्धस्तं याहि साम्प्रतम् ॥ इत्युक्त्वा भगवान् विष्णुर्हस्तं प्रोत्सार्य तस्थिवान् ॥
३३॥

यावत् कपालो राजेन्द्र सन्त्यक्त्वा कालभैरवम् ॥ विष्णुहस्तं न यातस्तु तावद्दूरं गतो हरिः ॥३४॥

पपात भूम्यां तत्रैव विष्णुं प्रोवाच दुःखितः ॥ का गतिर्मम देवेश ततः प्रोवाच केशवः ॥ ३५॥

अत्रैव तिष्ठ सुचिरं तवाशां पूरयाम्यहम् ॥ कुरुपाण्डवयोर्युद्धे इत्युक्त्वान्तर्दधे हरिः ॥३६॥

कपालेन विनिर्मुक्तो राहुमुक्तो यथा शशी ॥ भैरवोपि ययौ पश्चात् गोकर्णं क्षेत्रमाशु वै ॥३७॥

घण्टाकर्णेन साहितो शिवेनोक्तं यथा पुरा ॥ तथैव वसतिं चक्रे गोकर्णे स्वाश्रमे नृप ॥३८॥

शिक्षकः पापिनां नित्यं रक्षन् सुकृतशीलिनः ॥

---

## नृसिंहस्थान(प्रह्लादाश्रम)महिमानुवर्णनम्॥

सूत उवाच ॥

तस्मात् प्राच्यां स्थितं राजन् नृसिंहस्थान मद्भुतम् ॥३९॥

तन्माहात्म्यं वदाम्यद्य शृणुष्वैकमना नृप ॥ पुरा हिरण्यकशिपुर्दितेः पुत्रः प्रतापवान् ॥४०॥

जित्वा देवान् स युद्धेषु ब्रह्मणो वरदर्पितः ॥ त्रैलोक्यं स्ववशे कृत्वा दिक्पालपदमाप्तवान् ॥४१॥

प्रह्लादाख्यश्च तत्पुत्रो विष्णुभक्तोऽभवन्नृप ॥ हरिनामपरो नित्यं हरिपूजापरायणः ॥४२॥

बहुधा बोध्यमानोऽपि विष्णुनाम न मुक्तवान् ॥ ततः कदाचित् तनयमाहूयासुरसत्तमः ॥४३॥
विष्णुं प्रशंससे मूढ मद्वेषिणमहर्निशम् ॥ तस्मात्त्वां हन्मि शस्त्रौघैस्त्यज तं बोध मां सुत ॥४४॥
शिक्षितोपि तथा पित्रा प्रह्लादो हरितत्परः ॥ हरिनाम न तत्याज तं दृष्ट्वा राक्षसेश्वरः ॥४५॥
प्रोवाच विष्णुः कुत्रास्ते दर्शयस्व हरिं मम ॥ पित्रोदितं समाकर्ण्य विष्णुं सस्मार तत्सुतः ॥४६॥
ततस्त्वाविरभूत्तत्र स्तम्भाद्विष्णुः सनातनः ॥ नृसिंहरूपेणोग्रेण हन्तुं दैत्यं महाबलम् ॥४७॥
अभिदुद्राव सङ्क्रुद्धो हिरण्यकशिपुं तदा ॥ तयोर्युद्धं समभवन्नृसिंहस्य च रक्षसः ॥४८॥
अतीव नृपशार्दूल तुमुलं रोमहर्षणम् ॥ नृहरी रक्षसा तेन मुक्तान्यस्त्राण्यजक्षत ॥४९॥
नृसिंहस्तं प्रगृह्याशु द्वारे स्थित्वा च दानवम् ॥ युद्धं तेन समं कृत्वा सुचिरं भरतर्षभ ॥५०॥
उदरं तस्य निर्भिद्य गतासुं तं व्यचिक्षिपत् ॥ भूमौ नृसिंहस्तत्पुत्रं दैत्यराज्येऽभ्यषेचयत् ॥५१॥
ततो नृसिंहश्चेन्द्राद्यैः प्रार्थितः शान्तकोपवान् ॥ अहोबलं महाक्षेत्रं गत्वोवास यथासुखम् ॥५२॥
गते नृसिंहे प्रह्लादो दुःखेन महताऽऽवृतः ॥ मया कृतो महान् दोषः पितृद्रोहो विगर्हितः ॥५३॥
एवं सञ्चिन्त्यमाने तु नारदोऽगात्तदा नृप ॥ दूरादायान्तमालोक्य नारदं दैत्यनन्दनः ॥५४॥
अभ्युत्थायासनं दत्वा पूजां कृत्वा यथाविधि ॥ कुशलं परिपृष्ट्वा तु नारदं मुनिपुङ्गवम् ॥५५॥
उवाच वचनं पश्चात् प्रह्लादो नारदं तदा ॥

प्रह्लाद उवाच ॥

तव सन्दर्शनादद्य कृतार्थोऽस्मि महामुने ॥५६॥
मया कृतो महान् दोषः पितृवाक्यविलङ्घनम् ॥ मत्कृते भगवान् विष्णुः पितरं हतवान् मम ॥५७॥
तस्मान् मम पितृद्रोहो गर्हितः सुमहानयम् ॥ कथमस्य निवृत्तिः स्यात् तद्वदस्व महामुने ॥५८॥

नारद उवाच ॥

सत्यमुक्तं त्वया वत्स न मिथ्या भाषितं त्वया ॥ भवान् वै विष्णुभक्तस्तु तव पापभयं कुतः ॥
५९॥
पिता तव महाभाग विष्णुना निहतो रणे ॥ विष्णुलोकं गतः सोपि योगिनामपि दुर्लभम् ॥६०॥
दुःखं मा कुरु दैत्येन्द्र न पितृद्रोहवान् भवान् ॥ लोकापवादशान्त्यर्थं याहि गोकर्णमाशु वै ॥६१॥
पश्चिमाम्बुधितीरस्थं ब्रह्महत्यादिनाशनम् ॥ तत्र ।श्रमपदं कृत्वा नृहरिं परिपूजय ॥६२॥
इत्युक्त्वा नारदो राजन् ययौ स्वैरगतिर्मुनिः ॥ गते तु नारदे राजन् प्रह्लादः प्रीतमानसः ॥६३॥
गोकर्णं क्षेत्रमासाद्य कोटितीर्थस्य दक्षिणे ॥ तत्राश्रमं शुभं कृत्वा नृसिंहं स्थाप्य दैत्यराट् ॥६४॥

तपश्चचार सुचिरं बद्धपद्मासनस्तदा ॥ वायुभक्षो निराहारो द्वादशाब्दं नृपोत्तम ॥६५॥

ततः प्रसन्नो भगवान्नरसिंहः समागमत् ॥ प्रह्लादं प्राह नृहरिर्वरं ब्रूहीति सादरम् ॥६६॥

तस्य तद्वचनं श्रुत्वा दैत्यराडिदमब्रवीत् ॥ मया कृतो महान् दोषः पितृद्रोहोऽतिगर्हितः ॥६७॥

तन्मोक्षं कुरु देवेश नमस्ते भक्तवत्सल ॥ न निन्देन्मां यथा लोकस्तथा त्वं कर्तुमर्हसि ॥६८॥

श्री भगवानुवाच ॥

तथास्तु मत्प्रसादेन पितृद्रोहो न हि त्वयि ॥ प्रपूज्यो भव लोके च पूज्यः सर्वत्र वै भव ॥६९॥

तवाश्रममिदं स्थानं त्रैलोक्ये श्रेष्ठतां व्रजेत् ॥ वैशाखशुक्लभूताया मत्रागत्य नरोत्तमाः ॥७०॥

स्नात्वात्र कोटितीर्थे तु मन्मूर्तिं पूजयन्ति ये ॥ पितृमातृवधादीनि पातकानि बहून्यपि ॥७१॥

तत्क्षणादेव नश्यन्तु प्रसादान्मम सुव्रत ॥ इत्युक्त्वा नृहरिस्तं वै तस्यां मूर्तौ व्यलीयत ॥७२॥

सूत उवाच ॥

इति लब्ध्वा वरं सोपि प्रह्लादः स्वपुरं ययौ ॥ विष्णुमेव सदा ध्यायन् यथापूर्वमतिष्ठत ॥७३॥

---

कृष्णाश्रमवर्णनोपक्रमः

तस्मात् प्राच्यां स्थितं राजन् श्रीकृष्णाश्रम मुत्तमम् ॥ तत्र कृष्णः परां सिद्धिं प्राप भारतसत्तम ॥ ७४॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे कालभैरवप्रह्लादाश्रमवर्णनं नाम चतु:सप्ततितमोऽध्यायः ॥७४॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ७५ ॥ NEXT>> श्लोक संख्या–९२

॥ कृष्णाश्रममहिमानुवर्णनम् ॥

← कृष्णाश्रमकथोपक्रमः

शतानीक उवाच ॥

कृष्णः किमकरोत्तत्र गोकर्णे सूत नन्दन ॥ कुतश्चचार स तपस्तपसा किमवाप्तवान् ॥१॥

एतत् सर्वमशेषेण ब्रूहि नो सूत नन्दन ॥

सूत उवाच ॥

कृष्णाश्रमस्य चोत्पत्तिं शृणु वक्ष्यामि ते नृप ॥२॥

बाणासुरस्य दुहिता उषादेवीति विश्रुता ॥ सा वै प्राद्युम्निनं राजन् कृष्णपौत्रं जहार च ॥३॥

तमदृष्ट्वा तु गोविन्दो अनिरुद्धं कुरूद्वह ॥ चिन्ताविष्टमना भूत्वा मार्गमाणो यदूत्तमः ॥४॥

गोकर्णं क्षेत्रमासाद्य तपस्तप्त्वा महत्तरम् ॥ स्वपौत्रं लब्धवान् कृष्णो बाणस्यान्तःपुरे स्थितम् ॥५॥

शतानीक उवाच ॥

उषा बाणस्य दुहिता किमर्थं कृष्णनन्दनम् ॥ जहार सा वरारोहा कथं प्राप्तो यदूत्तमः ॥६॥

कथं चचार स तपो गोकर्णे यदुनन्दनः ॥ एतत् समस्तं विस्तार्य सूत मे वक्तुमर्हसि ॥७॥

---

## बाणासुरवृत्तम्

सूत उवाच ॥

वैवस्वतेन्तरे राजन्नष्टाविंशतिमे युगे ॥ देवैः सम्प्रार्थितो विष्णुर्दैत्यानां निधनाय च ॥८॥

वसुदेवकुले जातो द्वापरे राजसत्तम ॥ देवक्यां वसुदेवात्तु कृष्णः कमललोचनः ॥९॥

दैत्यान् क्षत्रियरूपेण जातान् कंसादिकान् रणे ॥ हत्वा कृष्णः स्वस्थचित्तो द्वारावत्यां नृपोत्तम ॥

१०॥

द्व्यष्टसाहस्रनारीभिः पुत्रपौत्रसमन्वितः ॥ वृष्ण्यन्धकबलैः सार्धं उवास सुचिरं मुदा ॥११॥

सूत उवाच ॥

पुरा तु शोणितपुरे सर्वभोगसमन्विते ॥ बाणस्तु बलिपुत्राणां ज्येष्ठ आसीन्महाबलः ॥१२॥

सहस्रबाहुर्नाट्येनातोषयत् परमेश्वरम् ॥ तुष्टस्तु भगवान् शम्भुस्तस्य ताण्डवलीलया ॥१३॥

उवाच दैत्यप्रवरं बाणं बलिसुतं हरः ॥ मम पार्षदमुख्यो वै बाण त्वं भविता यतः ॥१४॥

तस्मात्तव द्वारदेशं पालयिष्ये त्वहं सदा ॥ इति दत्वा वरं शम्भुस्तस्य द्वारि ह्यतिष्ठत ॥१५॥

एकदा गिरिशं प्राह स बाणो युद्धदुर्मदः ॥ अनर्घ्येण किरीटेन स्पृशन् शिवपदाम्बुजम् ॥१६॥

सहस्रबाहोर्मे शम्भो प्रतियोद्धा न विद्यते ॥ त्रैलोक्ये त्वदृते देव सर्वे मम वशं गताः ॥१७॥

तच्छ्रुत्वा गिरिशः क्रुद्धः प्रोवाच वचनं तदा ॥ त्वद्दर्पहा भवेन्मूढ मत्समो लोकपूजितः ॥१८॥

इत्युक्ते शम्भुना सोपि स्वगृहं प्राविशन्नृप ॥

---

## उषाचरितम्

तस्योषा नाम दुहिता कन्या कमललोचना ॥१९॥

सुकुमारी वरारोहा किञ्चिद्यौवनतां गता ॥ सा शारदेन्दुवदना मत्तद्विरदगामिनी ॥२०॥
कुन्दकुड्मलदन्ताढ्या सिंहमध्या बृहत्कटिः ॥ निम्ननाभिः कम्बुकण्ठी पीनोन्नतपयोधरा ॥२१॥
विशालजघना राजन् बिम्बोष्ठी चारुहासिनी ॥ दिव्या दिव्याम्बरधरा त्रैलोक्येऽप्रतिमा हि सा ॥२२॥
न यक्षी न तथा देवी न गन्धर्वी न किन्नरी ॥ नोरगी न सुपर्णी च योषितां प्रवरा हि सा ॥२३॥
एकदा निशि पर्यङ्के परार्घ्यास्तरणान्विते ॥ स्वप्ने सुप्ता वरारोहा प्रायात् प्राद्युम्निना रतिम् ॥२४॥
बुद्धा न पश्यति तदा कान्तं कमललोचनम् ॥ प्रातः सखीनां मध्यस्था विह्वला व्रीडिता भृशम् ॥
२५॥
बाणस्य मन्त्रितनया चित्रलेखा भिधा ततः ॥ पप्रच्छ स्वसखीं तर्षादूषा ं कामशराहताम् ॥२६॥
कान्तं मृगयसे भद्रे कीदृक्ते हृदयङ्गमः ॥ हस्तग्राहं रतं चाद्य तव सख्युपलक्षये ॥२७॥

उषोवाच ॥

दृष्टः कश्चिद्युवा स्वप्ने श्यामः कमललोचनः ॥ पीतवासा बृहद्बाहुर्योषितां हृदयङ्गमः ॥२८॥
पीनवक्षा विशालांसः सर्वलक्षणसुन्दरः ॥ सर्वावयवसम्पूर्णः कन्दर्पसदृशाकृतिः ॥२९॥
मृगये तमहं कान्तं प्रौढं कामकलाविदम् ॥ पाययित्वाऽधरमधु त्यक्त्वा मामत्र भामिनि ॥३०॥
क्वापि यातो न पश्यामि किं करोमि शुभे वद ॥

चित्रलेखोवाच ॥

चिन्तां मा कुरु कल्याणि व्यसनं तेऽपकर्षये ॥३१॥
त्रिलोक्यां यदि तिष्ठेत् स तमानेष्ये तवान्तिकम् ॥ भर्तारं यादृशं सुभ्रु मनोहर्तारमादिश ॥३२॥
इत्युक्त्वा देवगन्धर्वसिद्धपन्नगगुह्यकान् ॥ दैत्यान् यक्षांश्चारणांश्च तथा विद्याधरादिकान् ॥३३॥
मनुष्यांश्च तथान्यांश्च पार्थिवान् सर्वदेशपान् ॥ शूरसेनांश्च गोपालान् साल्वान् काम्बोजहैहयान् ॥
३४॥
वङ्गान् मागधगान्धारानवन्त्यान् केकयान् कुरून् ॥ त्रिगर्तान् केरलान् चोलान् काशीकौसलमद्रकान्
॥३५॥
पाञ्चालानथ वैदर्भान् यादवान् वृष्णिभिः सह ॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं तत्सुतं तथा ॥
३६॥
उषायै दर्शयामास लेखयित्वा पटे सखी ॥ विलोक्य तान् क्रमेणोषा भूभुजो देवतादिकान् ॥३७॥
निरीक्ष्यमाणा शनकैः प्राद्युम्निं वीक्ष्य लज्जिता ॥ अधोमुखी ह्रियाऽतिष्ठत् किञ्चिन्नोवाच तां सखीम्

॥३८॥

चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य सुन्दरम् ॥ ययावाकाशमार्गेण द्वारकां कृष्णपालिताम् ॥३९॥

रत्नतोरणसंयुक्तां प्रविश्यालक्षिता जनैः ॥ तं सुप्तं रत्नपर्यङ्के कृष्णस्यान्तःपुरे निशि ॥४०॥

उत्पपात गृहीत्वा तं रक्षमाणैरलक्षिता ॥ तत्क्षणाच्छोणितपुरमानयामास योगिनी ॥४१॥

प्रविश्य योषासदनं सख्यै प्रियमदर्शयत् ॥ वीक्ष्य कन्दर्पसदृशमनिरुद्धमुषा तदा ॥४२॥

मुदा परमया युक्ता रेमे प्राद्युम्निना समम् ॥ वासःस्रग्गन्धमाल्यैश्च धूपदीपासनादिभिः ॥४३॥

चतुर्विधान्नभक्ष्यैश्च मृदुवाक्यैश्च पूजितः ॥ गूढः कन्यागृहे राजन् प्रवृद्धस्नेहया तया ॥४४॥

उषया सह रेमे स दिनानि कतिचिन्नृप ॥

---

## अनिरुद्धस्य बन्धनम्

तां तथा यदुवीरेण रममाणां हतप्रभाम् ॥४५॥

लक्षणैर्लक्षयांचक्रुर्गुप्ताश्चान्तःपुरे जनाः ॥ राज्ञे निवेदयामासु र्दुहितुस्ते वयं नृप ॥४६॥

कन्यायाः कुलदूष्यं तु जानीमस्तद्विचेष्टितम् ॥ त्वच्छासनाद्रक्षमाणा सुगुप्ताऽन्तःपुरे तव ॥४७॥

कन्याया दूषणं पुम्भिर्दुष्प्रेक्ष्यमिति विद्महे ॥ तच्छ्रुत्वा कुपितो बाणो दुहितुः श्रुतदूषणः ॥४८॥

तत्क्षणात् कन्यकागारं गत्वाऽपश्यद्यदूत्तमम् ॥ सर्वावयवशोभाढ्यं ज्वलनार्कसमप्रभम् ॥४९॥

बृहद्भुजं विशालाक्षं दिव्यं तं प्रियलक्षणम् ॥ तदङ्गलिङ्गनाज्जातकुचकुङ्कुमरूषितम् ॥५०॥

तं वीक्ष्य विस्मितो बाणो भटानाज्ञापयद्वधे ॥ बद्धुं व्यवसितास्ते वै अनिरुद्धं मुहुर्नृप ॥५१॥

तान् दृष्ट्वा ह्यनिरुद्धस्तु स्वासनात् सम्मुखं गतः ॥ उद्यम्य परिघं घोरं ताडयामास तान् भटान् ॥५२॥

ते हन्यमानाः सुभृशं निर्भिन्नोरुभुजान्तराः ॥ खिन्नाः प्रदुद्रुवुः सर्वे ततो बाणः क्रुधान्वितः ॥५३॥

स नागपाशं संगृह्य अनिरुद्धं बबन्ध ह ॥ ततः श्रुत्वा ह्युषादेवी नागपाशेन बन्धितम् ॥५४॥

अनिरुद्धं विशालाक्षी शुशोचातीवविह्वला ॥

---

## कृष्णाश्रमम्–कृष्णतीर्थम्

सूत उवाच ॥

ततस्ते यादवाः सर्वे रामकृष्णादयो नृप ॥५५॥

अन्तःपुरे प्रसुप्तं तमनिरुद्धं च कुत्रचित् ॥ न पश्यन्तः शुचाविष्टा मार्गमाणाः समन्ततः ॥५६॥

अलब्ध्वा कुत्रचिदपि ततः कृष्णः शुचान्वितः ॥ तदा तु नारदोऽभ्येत्य कृष्णं प्रोवाच दुःखितम् ॥

५७॥

जहि चिन्तां महाबाहो पौत्रस्ते बाणमन्दिरे ॥ उषयापहृतस्तत्र रत्यर्थं स्वसखीमुखात् ॥५८॥

बद्धस्तेनासुरेन्द्रेण बाणेन यदुन्दन ॥ सोऽजय्यस्तव चक्रेण शिवभक्तो दृढव्रतः ॥५९॥

सन्तोष्य तपसा शम्भुं बाणं जेतुं त्वमर्हसि ॥ क्षिप्रं सिद्धिकरं क्षेत्रं गोकर्णं याहि साम्प्रतम् ॥६०॥

इत्युक्त्वा नारदे याते कृष्णो गोकर्णमागमत् ॥ अगस्त्याश्रमतः किञ्चिद्दिशि वायव्यपश्चिमे ॥६१॥

कोटितीर्थस्य सविधे कृत्वाश्रमपदं शुभम् ॥ हृदि सञ्चिन्तयन् शभुं चचार सुमहत्तपः ॥६२॥

चतुरो वार्षिकान् मासान् पूजयामास शङ्करम् ॥ ततस्तुष्टः प्रसन्नात्मा शङ्करः प्राह यादवम् ॥६३॥

ज्ञातं मनोगतं तेद्य शीघ्रं पौत्रमवाप्स्यसि ॥ शोणिताख्यपुरे कृष्ण बाणस्यान्तःपुरे स्थितः ॥६४॥

उषया तस्य नन्दिन्या हृतश्च स्वसखीमुखात् ॥ ततो बद्धः स बलिना बाणेन यदुनन्दन ॥६५॥

अतस्त्वं शोणितपुरं चतुरङ्गबलान्वितः ॥ गत्वा सुतुमुलं युद्धं मया साकं यदूत्तम ॥६६॥

कुरु त्वं तव चक्रेण सोऽवध्यो बलिनन्दनः ॥ तस्य बाहुद्वयं हित्वा सर्वांस्त्वं छेत्तुमर्हसि ॥६७॥

ततः पौत्रं समादाय द्वारकां याहि सत्वरम् ॥ त्वया कृतमिदं तीर्थं त्रैलोक्ये श्रेष्ठतां व्रजेत् ॥६८॥

इति दत्वा वरं शम्भुस्तत्रैवान्तरधीयत ॥

---

## अनिरुद्धविमोचनम्–उषानिरुद्धविवाहः

ततः कृष्णः प्रसन्नात्मा द्वारकां प्राप्य सत्वरम् ॥६९॥

वृष्ण्यन्धकबलैः सार्धं कृष्णोऽगाच्छोणितं पुरम् ॥ अक्षौहिणीभिर्दशभिः समन्तात् सर्वतो दिशम् ॥

७०॥

रुरुधुर्बाणनगरीं यादवा वृष्णिभिः सह ॥ ततस्तु भगवान् रुद्रः ससुतः प्रमथैर्वृतः ॥७१॥

आरुह्य वृषभं तुङ्गं युयुधे यादवैः समम् ॥ युद्धं सुतुमुलं चासीच्छिवयादवयोस्तदा ॥७२॥

ततः कृष्णश्चिन्तयानः शङ्करं भक्तवत्सलम् ॥ स्तुवन् वाग्भिरुवाचेदं रुद्रं यादवनन्दनः ॥७३॥

कृष्णोवाच ॥

नमस्ते जगदाधार भक्तानामभयङ्कर ॥ नमस्ते शर्व सर्वेश त्वया योद्धुं न च क्षमः ॥७४॥

त्वत्प्रसादादहं सश्रीर्लक्ष्मीशस्त्वत्प्रसादतः ॥ त्रैलोक्यरक्षासामर्थ्यं दत्तं मे भवतैव तु ॥७५॥

इदनीं मम पौत्रं त्वं देहि मे वृषभध्वज ॥ इत्युक्ते यदुनाथेन शिवः प्रोवाच तुष्टधीः ॥७६॥

पौत्रं गृहाण कृष्ण त्वं जित्वा बाणासुरं मृधे ॥ मत्पूजकभुजद्वन्द्वं हित्वा सर्वान् भुजान् हरे ॥७७॥

छित्वा तद्दर्पदहनं कुरु त्वं यदुनन्दन ॥ इत्युक्त्वा भगवान् शम्भुरपागच्छत् स्वकैर्गणैः ॥७८॥
ततः कृष्णः प्रसन्नात्मा कृत्वा युद्धं महत्तरम् ॥ बाणेन साकं सुचिरं तस्य बाहूंस्ततोऽच्छिनत् ॥७९॥
तस्य बाहुद्वयं शिष्टं गतदर्पो बभूव सः ॥ कृष्णं संपूजयामास स्तोत्रैरर्घ्यादिभिस्ततः ॥८०॥
गजाश्वरथरत्नोघैः पारिबर्हैरनेकशः ॥ पूजितो दैत्यराजेन कृष्णो यादवनन्दनः ॥८१॥
ततो बाणः स्वतनयां योषितां प्रवरामुषाम् ॥ विवाहं कारयामास कृष्णपौत्राय हृष्टधीः ॥८२॥
ततः कृष्णः सपत्नीकं पुरस्कृत्य स्वपौत्रकम् ॥ प्राद्युम्निं रथमारोप्य तं तदा बाणसत्कृतम् ॥८३॥
अक्षौहिणीभिर्बहुभिर्ययौ द्वारावतीं प्रति ॥ अलङ्कृतां तोरणाद्यैर्वितानध्वजमण्डिताम् ॥८४॥
उवास स तदा कृष्णः पुत्रपौत्रादिभिर्युतः ॥ स्त्रिभिर्यादवमुख्यैश्च क्रीडन्नृप यथासुखम् ॥८५॥

सूत उवाच ॥

कृष्णो यत्र तपस्तेपे गोकर्णे नृपसत्तम ॥ तत् कृष्णतीर्थं विख्यातं सर्वपापप्रणाशनम् ॥८६॥
तत्र गत्वा नरो यस्तु कृष्णजन्माष्टमीदिने ॥ स्नात्वा तीर्थे यादवस्य सकृद् कृष्णमर्चयेत् ॥८७॥
अपुत्रो लभते पुत्रं धनार्थी धनमाप्नुयात् ॥ सर्वान् कामानवाप्नोति विष्णुलोकं स विन्दति ॥८८॥

---

## दूर्वासाश्रम,दत्ताश्रम–उपक्रमः

सूत उवाच ॥

तस्मादाग्नेयदिग्भागे शरपाते स्थितं शुभम् ॥ आश्रमं सर्वपापघ्नं पुण्यं दूर्वाससो मुनेः ॥८९॥
नानावृक्षसमाकीर्णं नानापक्षिसमन्वितम् ॥ दूर्वासा मुनिशार्दूलो वैश्वानरसमप्रभः ॥९०॥
दत्तात्रेयेण सहितो तत्र कृत्वा महत्तपः ॥ शिवमुद्दिश्य गोकर्णे यथास्थानं गतो नृप ॥९१॥
दत्तात्रेयाश्रमं तत्र कोटितीर्थोत्तरे स्थितम् ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥९२॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे कृष्णाश्रममहिमानुवर्णनंनाम पञ्चसप्तति तमोऽध्यायः ॥७५॥

शतानीक उवाच ॥

सूत दूर्वाससो मेऽद्य दत्तात्रेयस्य सम्भवम् ॥ कस्य पुत्रः कथं तत्र गोकर्णे चक्रतुस्तपः ॥१॥
तपसा किमु सम्प्राप्तावेतद्विस्तरतो वद ॥ शृणु राजन् प्रवक्ष्यामि तयोर्जन्म च कर्म वै ॥२॥
पुरा कृतयुगे राजन्नत्रिर्नाम महामुनिः ॥ तत्पत्नी ह्यनसूयाख्या सर्वावयवसुन्दरी ॥३॥
कर्मणा मनसा वाचा पतिवाक्यानुसारिणी ॥ तया सह मुनिश्रेष्ठ स्वाश्रमे ह्यवसन् मुनिः ॥४॥
तपः स्वाध्यायनिरतो जितक्रोधो जितेन्द्रियः ॥ एकदाऽत्रिर्वनं यातः समित्पुष्पाहरोद्यतः ॥५॥
तदा तु नारदोऽभ्यायादत्रेराश्रममुत्तमम् ॥ अनसूया तदा राजन् दृष्ट्वा नारदमागतम् ॥६॥
अभ्युत्थायासनं दत्वा ननाम शिरसा मुनिम् ॥ उवाच वचनं श्लक्ष्णमनसूया तदा मुनिम् ॥७॥
स्वागतं ते मुनिश्रेष्ठ कृतार्थाऽहं तवागमात् ॥ समित्पुष्पफलार्थाय मत्पतिर्वनमाविशत् ॥८॥
मुहूर्तान्मुनिशार्दूलो ह्याश्रमं पुनरेष्यति ॥ वसतिः क्रियतामद्य स्थित्वात्र रजनीं मुने ॥९॥
श्वः प्रभाते यथाकामं गम्यतामिति साब्रवीत् ॥ इति तद्वचनं श्रुत्वा तथेति ह्यवसन्मुनिः ॥१०॥
पुष्पादिकं प्रगृह्याशु अत्रिः स्वाश्रममाययौ ॥ ततोत्रिर्नारदं दृष्ट्वा हर्षेण महता युतः ॥११॥
पूजयित्वा यथान्यायं वचनं चेदमब्रवीत् ॥ कृतार्थोस्मि मुनिश्रेष्ठ जीवितञ्च सुजीवितम् ॥१२॥
अद्य मे पितरस्तुष्टा भवदागमनेन तु ॥ इत्युक्त्वा षड्रसोपेतमन्नं दत्वा महात्मने ॥१३॥
पत्न्या सह मुनिश्रेष्ठायातिथ्यं कृतवान् मुनिः ॥ अनसूया महाभागा पतिसेवापरायणा ॥१४॥
एवं सम्पूजितस्तत्र नारदो ह्यत्यगान्निशम् ॥ ततः प्रभातसमये यियासुर्नारदोऽब्रवीत् ॥१५॥
अत्रे त्वं कृतकृत्योसि धन्योसि धरणीतले ॥ यतः पतिव्रता भार्या तस्या अन्या न विद्यते ॥१६॥
इत्युक्त्वा नारदो राजन् ब्रह्मलोकमियात्ततः ॥ आचख्यौ ब्रह्मसदने विष्णवीशनिकटे मुनिः ॥१७॥
अत्रिपत्न्याश्चरित्रं तु पातिव्रत्यमकल्मषम् ॥ इत्युक्त्वा नारदोऽभ्यायाद्यथाकामं नृपोत्तम ॥१८॥
ब्रह्मा सर्वमुपश्रुत्य मुनिपत्नीविचेष्टितम् ॥ मनसा मुदमापन्नो द्रष्टुकामः पतिव्रताम् ॥१९॥
युक्तो हरिहराभ्याञ्च जगामात्रेस्तदाश्रमम् ॥ विप्रवेषधरा भूत्वा मध्याह्ने क्षुत्पिपासिताः ॥२०॥
तानागतान् द्विजान् दृष्ट्वा ह्यनसूयाऽब्रवीदिदम् ॥ स्वागतं वो महात्मानः पाद्यमर्घ्यमिदं वचः ॥२१॥
आसध्वमासनेषूच्चैः क्षमध्वं घटिकाद्वयम् ॥ युष्माकमद्य यच्चित्ते फलं वा भोजनं तु वा ॥२२॥
तत् करिष्याम्यहं विप्राः शीघ्रमाज्ञापयन्तु माम् ॥ ब्रह्मा तदीरितं श्रुत्वा इदमाह पतिव्रताम् ॥२३॥
फलं मूलञ्च शाखं वा नेष्टं नो वरवर्णिनि ॥ कन्दमूलफलादीनि भुज्यन्ते मुनिभिः शुभे ॥२४॥
षड्रसोपेतमधुना ह्यन्नमस्माकमीप्सितम् ॥ तस्माद्विवस्त्रा कल्याणि ह्यन्नं नो दातुमर्हसि ॥२५॥

इत्युदीरितमाकर्ण्य तथेत्याह तदा सती ॥ गृहं गता विशालाक्षी शाकपाकादिकं च यत् ॥२६॥
सर्वञ्च कारयामास सम्यग्वै सा शुभव्रता ॥ अनसूया बहिर्गत्वा ब्राह्मणानिदमब्रवीत् ॥२७॥
भोजनार्थं समायान्तु भवन्तो द्विजसत्तमाः ॥ इति तद्वचनं श्रुत्वा विप्ररूपधराः सुराः ॥२८॥
स्नानसन्ध्यादिकं कृत्वा उपाविविशुरासने ॥ भोक्तुं भोजनमासाद्य जलहस्तेदमब्रवीत् ॥२९॥
कर्मणा मनसा वाचा पतिं ध्यायामि नापरम् ॥ एतत् सत्यं मयिस्थं चेद्भवन्त्वेते हि बालकाः ॥
३०॥
उच्छिष्टं भर्तुरमृतं गाङ्गं पादजलं तथा ॥ यद्यस्ति सत्यं मयि चेद्भवन्त्वेते हि बालकाः ॥३१॥
इत्युक्त्वा वचनं देवी तज्जलं तेष्वसिञ्चत ॥ तज्जलस्पर्शमात्रेणाभवन् ते हि बालकाः ॥३२॥
तेषु जातेषु बालेषु अत्रिपत्नी पतिव्रता ॥ नग्नरूपेण सा साध्वी अन्नं व्यञ्जनपूर्वकम् ॥३३॥
पात्रे दत्वा तदोवाच भुज्यतामिति तान् द्विजान् ॥ ततो भोक्तुं न शक्तास्ते रुरुदुस्तनकांक्षया ॥
३४॥
रुदत्सु तेषु बालेषु हसन्ती सा पतिव्रता ॥ पाययामास तान् तन्वी स्तनं भक्त्या मुदान्विता ॥३५॥
एवं दिनत्रयं नीतं पातिव्रत्यप्रभावतः ॥ तेष्वेवं वर्तमानेषु नारदो मुनिसत्तमः ॥३६॥
कथयामास तत्सर्वमनसूयाविचेष्टितम् ॥ तत्पत्नीभ्यस् तदा राजंस्ततः स्वैरगतिर्ययौ ॥३७॥
तिस्रस्तु ता महादेव्यो गीर्लक्ष्मीर्गिरिजा तदा ॥ वैधव्यशङ्कया जग्मुर्यत्रास्तेऽत्रिपरिग्रहः ॥३८॥
तुष्टुवुस्तां तदा देव्यो ह्यनसूयां पतिव्रताम् ॥

देव्य ऊचुः ॥

नमस्ते लोकमातस्ते दुहितृत्वं गता वयम् ॥३९॥
पतिदानेन पाह्यस्मान् साधवो दीनवत्सलाः ॥ नमस्ते ब्रह्मकन्यायै नमस्ते ब्राह्मणप्रिये ॥४०॥
पतिदानेन पाह्यस्मान् त्वं भर्तारमनुव्रता ॥ पतिहीना तु या नारी जीवन्त्यपि मृतोपमा ॥४१॥
पतिदानेन नो रक्ष मा विलम्बितुमर्हसि ॥ अज्ञानादथवा दर्पात् कृतमेभिर्वरानने ॥४२॥
तत् क्षन्तव्यं त्वया भद्रे मूढानेतान् पतीनिमान् ॥ पतिव्रतासु विप्रेषु गोषु देवेषु यो नरः ॥४३॥
मोहात् परीक्षां कुरुते महाकिल्बिषमाप्नुयात् ॥ अग्नौ वेदेषु यज्ञेषु महत्स्वपि नदीषु च ॥४४॥
न विश्वासो भवेद्यस्य स भवेन्नरकी ध्रुवम् ॥ इति स्तुत्वा ह्यत्रिपत्नीं देव्यस्ता लोकपूजिताः ॥४५॥
तूष्णीमासंस्तदा राजन्ननसूयाऽब्रवीच्च ताः ॥ प्रस्थाप्य वल्कले बालानादाय च करे जलम् ॥४६॥
पश्यन्तीषु च तास्वग्रे चिन्तयन्ती पतिं हृदि ॥ मातरं पितरं श्वश्रूं श्वशुरं देवरं तथा ॥४७॥

गुरुबुध्या पूजिता चेद्भवन्त्वेते हि पूर्ववत् ॥ पतिब्राह्मणदेवेशाः समानाः पूजिता हृदि ॥४८॥
एतत्सत्यं मयिस्थं चेद्भवन्त्वेते हि पूर्ववत् ॥ इत्युक्त्वा वचनं साध्वी तज्जलं तेष्वसिञ्चत ॥४९॥
तज्जलस्पर्शमात्रेण स्वं स्वं रूपमुपागताः ॥ स्वं स्वं वाहनमास्थाय स्वस्वपत्नीसमन्विताः ॥५०॥
ततो ब्रह्माऽब्रवीत् तां वै ह्यनसूयामिदं वचः ॥ अहो ते चरितं सुभ्रु अद्भुतं लोकपावनम् ॥५१॥
पतिव्रतासु नारीषु त्वमग्रे गण्यतां जनैः ॥ पतिव्रता पतिप्राणा सर्वलोकेषु पूजिता ॥५२॥
लोकत्रयं पुनात्येव गङ्गेव जगतीतले ॥ वरं वरय भद्रन्ते वरदा वयमागताः ॥५३॥
साध्वी तद्वचनं श्रुत्वा उवाचेदं सुविस्मिता ॥ वरं न काङ्क्षे देवेश भवदागमनं विना ॥५४॥
अपराधं क्षमध्वं मे ब्रह्मविष्णुमहेश्वराः ॥ एतद्वचः समाकर्ण्य ब्रह्मा लोकपितामहः ॥५५॥
प्राहेदं वचनं साध्वीं अत्रिपत्नीं पतिव्रते ॥ वयं दिनत्रयं भद्रे क्षुधार्ता बालभावतः ॥५६॥
त्वत्स्तन्यपानं कुर्वाणा आस्थिता भवदन्तिके ॥ तस्माद्वयं तव सुता भविष्यामो वरानने ॥५७॥
इति दत्वा वरं तस्यै ब्रह्मविष्णुमहेश्वराः ॥ स्वस्वपत्नीसमेतास्ते स्वं स्वं वाहनमास्थिताः ॥५८॥
स्वं स्वं स्थानमगुः सर्वे ह्यनसूयां शशंसिरे ॥ तस्यां ब्रह्मा ततो जातश्चन्द्ररूपेण वै सुतः ॥५९॥
दत्तात्रेयो हरिरभूद्दूर्वासाः शङ्करः स्मृतः ॥ अत्रेराश्रममागत्य तदा धाता विधुं नृप ॥६०॥
प्रगृह्य ब्रह्मलोकं तु गत्वा चास्ते यथासुखम् ॥

---

## दूर्वासाश्रमं

दत्तात्रेयश्च दूर्वासा ववृधाते सुतावुभौ ॥६१॥
मुनिवेषधरौ त्यक्तसङ्गौ तत्वविदां वरौ ॥ बहुभिर्मुनिभिः सार्धं तीर्थयात्रापरायणौ ॥६२॥
तीर्थानि तत्र तत्रैव दृष्ट्वा स्नात्वा तपस्विनौ ॥ पृथिव्यां यानि तीर्थानि गङ्गादिसरितस्तथा ॥६३॥
तत्र स्नात्वा च पीत्वा च यथाविधि नृपोत्तम ॥ दत्तात्रेयश्च दूर्वासास्ततो गोकर्णमागतौ ॥६४॥
आदौ स्नात्वा कोटितीर्थे दृष्ट्वा देवं महाबलम् ॥ पूजयित्वा यथान्यायं गोकर्णे सुचिरं स्थितौ ॥६५॥
तत्राश्रमपदं कृत्वा दूर्वासा मुनिसत्तमः ॥ कोटितीर्थाद्दक्षिणस्यां शरपातप्रमाणतः ॥६६॥
तीर्थं तस्य समाधाय तपश्चक्रे सुदुश्चरम् ॥ जितेन्द्रियो निराहारो ब्रह्मध्यानपरायणः ॥६७॥
गते बहुतिथे काले आविरासीन्महेश्वरः ॥ उवाच च प्रसन्नात्मा वरं ब्रूहीति सादरम् ॥६८॥
इत्युक्ते शम्भुना सोपि नमस्कृत्य हरं वचः ॥ उवाच मधुरं राजन् दूर्वासा मुनिसत्तमः ॥६९॥
दर्शनादपि ते स्वामिन् वरमन्यन्न विद्यते ॥ तथापि त्वा वृणे देव कोपस्योपरतिं मयि ॥७०॥

तीर्थमेतत् सुरश्रेष्ठ त्रैलोक्ये विश्रुतं भवेत् ॥

शङ्कर उवाच ॥

तथास्तु मुनिशार्दूल वरं यन्मनसेप्सितम् ॥७१॥

क्रोधस्योपशमश्चास्तु दूर्वासा मदनुगृहात् ॥ त्वया कृतमिदं तीर्थं त्रैलोक्योत्तमतां व्रजेत् ॥७२॥

कार्तिके शुक्लपक्षे तु नवम्यां ये जना द्विज ॥ स्नानं कुर्वन्ति तीर्थेस्मिन् त्वत्कृते मुनिसत्तम ॥

७३॥

तेषामाजन्मचरितं स्वल्पं वा यदि वा बहु ॥ ब्रह्महत्यादिकं वापि नश्यत्येव न संशयः ॥७४॥

इति दत्वा वरं तस्मै शङ्करो भक्तवत्सलः ॥ तत्रौवान्तर्दधे राजन्नाश्रमे तस्य पार्थिव ॥७५॥

एवं लब्धवरः सोथ दूर्वासा तपसां निधिः ॥ तत्रैवास्ते यथाकामं ब्रह्मध्यानपरायणः ॥७६॥

---

## दत्तात्रेयाश्रमं (षडक्षरेश्वरः)

सूत उवाच ॥

कोटितीर्थादुत्तरस्यां दत्तात्रेयो महामुनिः ॥ कृत्वाश्रमं नृपश्रेष्ठ तेपे च सुमहत्तपः ॥७७॥

ततः कालेन महता तपसा तस्य शङ्करः ॥ तुतोष नितरां राजन् दत्तात्रेयं वचोऽब्रवीत् ॥७८॥

तुष्टोऽस्मि तपसा ब्रह्मन् वरं वरय सुव्रत ॥ ददामि वाञ्छितं यत्ते यद्यापि स्यात् सुदुर्लभम् ॥७९॥

दत्तात्रेय उवाच ॥

इदमेव वरं मेद्य दर्शनं तव शङ्कर ॥ त्वद्दर्शनमपुण्यानां न लभ्यं त्रिपुरान्तक ॥८०॥

तीर्थमेतत् सुरश्रेष्ठ त्रैलोक्ये तिलकं भवेत् ॥ अत्राप्लुतानां मर्त्यानां ज्ञानसिद्धिर्भवेद्ध्रुवम् ॥८१॥

ईश्वर उवाच ॥

सिद्धोऽसि त्वं पूर्वमेव मत्प्रसादाद्विशेषतः ॥ आश्रमं ते द्विजश्रेष्ठ नाकपृष्ठसमं भवेत् ॥८२॥

तीर्थ मेतन्मुनिश्रेष्ठ सर्वसिद्धिकरं भवेत् ॥ त्वन्नाम्ना ख्यातिमायातु त्रैलोक्ये मुनिसत्तम ॥८३॥

अयने विषुसङ्क्रान्त्यां स्नानं कुर्वन्ति ये जनाः ॥ तेषां पुण्यफलं वक्तुं मया विप्र न शक्यते ॥

८४॥

इत्युक्त्वा भगवान् शम्भुस्तत्रैवादर्शनं गतः ॥ दत्तात्रेयोपि विप्रर्षिर्वरं प्राप्य महेश्वरात् ॥८५॥

गतो माहिष्मतीं सोऽपि कार्तवीर्याभिरक्षिताम् ॥

सूत उवाच ॥

दत्तात्रेयाभिधं तीर्थं ये पश्यन्ति नरा भुवि ॥८६॥

तान् दृष्ट्वा वै कृतान्तोपि सपर्यां कुरुते नृप ॥ किमन्येन बहूक्तेन स्नातानां सर्वकामदम् ॥८७॥
तीर्थात् सांवर्तकाद्राजन् पूर्वस्यां दिशि विद्यते ॥ एतत्तीर्थस्य माहात्म्यं श्रोतॄणां सर्वकामदम् ॥८८॥

---

## वेदेश्वर,शास्त्रेश्वर– उपक्रमः

सूत उवाच ॥

शृणु चान्यत् प्रवक्ष्यामि वेदानामाश्रमं शुभम् ॥ वेदशास्त्राणि राजेन्द्र चूर्णितान्यभवन् पुरा ॥८९॥
तमोसुरेण पापेन त्रैलोक्यविजिगीषुणा ॥ विष्णुना निहतः पापो मत्स्यरूपेण सो नृप ॥९०॥
ततो वेदाश्च शास्त्राणि गत्वा गोकर्णमुत्तमम् ॥ लिङ्गानि तत्र संस्थाप्य तपः कृत्वा सुदुश्चरम् ॥९१॥
प्रापुर्मनोरथान् सर्वान् यथापूर्वं तथाऽभवन् ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥ ९२ ॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे दूर्वासाश्रमदत्तात्रेयाश्रममहिमानुवर्णनं नाम षट्सप्ततितमोऽध्यायः ॥७६॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ७७ ॥  NEXT>>  श्लोक संख्या–६०

## ॥ वेदेश्वर, शास्त्रेश्वरवर्णनम् ॥

← वेदेश्वर,शास्त्रेश्वर्वर्णनम्

शतानीक उवाच ॥

वेदाश्रमस्य माहात्म्यं वद मे परिपृच्छते ॥ कथं चूर्णीकृता वेदाः शास्त्राणि द्विजसत्तम ॥१॥
तमोसुरेण पापेन विष्णुना निहतः कुतः ॥ कुत्र संस्थाप्य लिङ्गानि गोकर्णे श्रुतयोऽमलाः ॥२॥
शास्त्राणि च तपः कृत्वा सिद्धिं प्रापुः कथं द्विज ॥ एतत् सर्वञ्च विस्तार्य वद पौराणिकोत्तम ॥३॥

सूत उवाच ॥

पुरा शङ्खासुरो नाम स्वबलैर्दर्पितो भृशम् ॥ राक्षसैर्बहुभिर्युक्तः स्वर्गं जेतुं मनो दधे ॥४॥
ततः स्वसचिवैः सार्धं मन्त्रयामास सोऽसुरः ॥ कथं देवान् विजित्वैव त्रैलोक्यं कथमाप्नुयाम् ॥५॥

तदुपायं मम ब्रूत यूयं मन्त्रविशारदाः ॥ तच्छ्रुत्वा राजवचनं मन्त्रिणस्तस्य दुर्मतेः ॥६॥
सम्मन्त्रयित्वा चान्योन्यं तदा राजानमब्रुवन् ॥

मन्त्रिण ऊचुः ॥

शृणु राजन् प्रवक्ष्यामस्तदुपायं वयं प्रभो ॥७॥
देवतानां बलं विप्रा विप्राणान्तु श्रुतिर्बलम् ॥ वेदोक्तविधिना विप्रा यज्ञं कुर्वन्ति नित्यशः ॥८॥
तेन तृप्यन्ति वै देवा बलयुक्ता भवन्ति हि ॥ तस्मात्त्वं ब्रह्मलोकस्थान् वेदानाहर सत्वरम् ॥९॥
त्वया हृतेषु वेदेषु निःसत्वाः स्युर्दिवौकसः ॥ इत्युक्ते मन्त्रिभिः सोऽथ साधु साध्विति चाब्रवीत् ॥
१०॥
ततो गत्वा ब्रह्मलोकं शङ्खो वेदानपाहरत् ॥ गृहीत्वा वेदराशिं स समुद्रं प्रविवेश ह ॥११॥
वेदे हृते तु शङ्खेन द्विजा यज्ञविवर्जिताः ॥ निःस्वाध्यायवषट्काराः सर्वे विप्राश्च दुःखिताः ॥१२॥
अभवन् तत्क्षणाद्राजन् ततः शक्रादयः सुराः ॥ सर्वे सत्वविहीनास्ते यज्ञभागविवर्जनात् ॥१३॥
ब्रह्माणं शरणं जग्मुर्गतसत्वा दिवौकसः ॥ ब्रह्मन्नद्य वयं देवा ह्यास्म सत्वविवर्जिताः ॥१४॥
केनेदमीदृशं कर्म न जानीमो वयं प्रभो ॥ तस्मात्त्वां शरणं प्राप्ता यद्युक्तं तत्कुरुष्व भो ॥१५॥
तेषां तद्वचनं श्रुत्वा ब्रह्मा प्रोवाच तान् सुरान् ॥ शङ्खेनापहृता वेदाः सोऽवध्यो देवदानवैः ॥१६॥
तस्माद्गच्छाम शरणं सर्वे विष्णुं वयं सुराः ॥ निवेदयामो दुःखं हि शङ्खासुरकृतं हि यत् ॥१७॥
अस्माकं वचनं श्रुत्वा विष्णुः कार्यं विधास्यति ॥ इत्युदीरितमाकर्ण्य ब्रह्मणा सहिताः सुराः ॥१८॥
गत्वा क्षीराम्बुधिं राजन् विष्णुमाराधयन् तदा ॥ स्तुत्वा स्तोत्रैर्बहुविधैर् ह्यात्मकार्यं न्यवेदयन् ॥
१९॥

देवा ऊचुः ॥

शङ्खेनापहृता वेदा हरे चाद्य दुरात्मना ॥ तस्मादासन् द्विजाः सर्वे ( निर्वेदा यज्ञवर्जिताः ॥२०॥
यज्ञभागविहीनत्वात् निःसत्वा देवतागणाः ॥ तस्मात्वयैव पातव्यास्त्वामेव शरणं गताः ॥२१॥
इति विज्ञापितो देवैर्भगवान् कमलापतिः ॥ मा भैष्टेति गिरा देवान् सान्त्वयन्निदमाह च ॥२२॥
चिन्तां त्यजत हे देवा )मत्स्यरूपो भवाम्यहम् ॥ शङ्खं हत्वा दुरात्मानमानयिष्ये श्रुतीरहम् ॥२३॥ इ
त्युदीरितमाकर्ण्य स्वस्थानानि ययुः सुराः ॥ ततस्तु भगवान् विष्णुर्मत्स्यरूपी बभूव ह ॥२४॥
ज्ञात्वा स्थितिं जले तस्य समुद्रं प्रविवेश ह ॥ दृष्ट्वाऽसुरं तत्र विष्णुर्युद्धं कृत्वा सुदारुणम् ॥२५॥
तेन रूपेण तं हत्वा सच्छिन्नं वेदमग्रहीत् ॥ ऋषिभ्यः प्रददौ वेदान् मत्स्यरूपी जनार्दनः ॥२६॥
ततो विष्णुः कुरुश्रेष्ठ स्वस्थानं प्रतिपेदिवान् ॥ ऋषयस्तान् दृढीकर्तुं न शेकुः श्रुतिसागरान् ॥२७॥
वेदेषु चूर्णीभूतेषु राक्षसेन दुरात्मना ॥ सषडङ्गास्ततो वेदाः शास्त्राणि च नृपोत्तम ॥२८॥
अन्योन्यं चिन्तयन्तस्ते किं कुर्म इति वादिनः ॥ अस्मदङ्गानि भिन्नानि यथापूर्वं कथं नृप ॥२९॥

भवेयुरिति मन्वानास्तपसा तोष्य शङ्करम् ॥ पूर्णदेहा भविष्याम इति निश्चित्य ते नृप ॥३०॥
गोकर्णक्षेत्रमासाद्य गायत्रीतीर्थसन्निधौ ॥ आग्नेय्यां रुद्रयोन्यास्तु कृत्व ाश्रमपदं शुभम् ॥३१॥
स्वनामाङ्कित लिङ्गानि स्थापयामासुरञ्जसा ॥ रुद्रयोन्याश्च निकटे पूर्वस्यां दिशि पार्थिव ॥३२॥
शास्त्रेश्वर ाभिधं लिङ्गं स्थापयित्वा नृपोत्तम ॥ तपश्चक्रुश्च शास्त्राणि वेदाश्चैव पृथक्पृथक् ॥३३॥
दिव्यवर्षसहस्रैकं तपश्चक्रुः सुदुश्चरम् ॥ तदन्ते भगवान् शम्भुर्वृषारूढः सहोमया ॥३४॥
तेषां प्रत्यक्षतां प्राप्तः पुरतः पार्वतीपतिः ॥ दृष्ट्वा पुरःस्थितं साम्बं शम्भुं तं श्रुतयस्तदा ॥३५॥
ऊचुस्तं शङ्करं राजन् प्रणिपत्य पृथक्पृथक् ॥३६॥

वेदा ऊचुः ॥

नमो नमः कारणकारणाय सदाशिवायामिततेजसे नमः ॥
ब्रह्मेन्द्रविष्ण्वादिमरुद्गणानां पूज्याय तस्मै पुरुषोत्तमाय ॥३७॥
नमस्ते कामदहन नमो वाचामगोचर ॥ नमो गङ्गाधराशेषलोकाध्यक्ष नमोस्तु ते ॥३८॥
इति स्तुवन्तस्तं वेदा भूयो भूयो नता भुवि ॥ शास्त्राणि च तथा राजन् स्तोत्रं चक्रुः पृथक्पृथक् ॥
३९॥
ततो वेदांश्च शास्त्राणि खण्डिताङ्गान् पिनाकधृक् ॥ दृष्ट्वा प्राह तदा शम्भुः कारुण्यान्नृपपुङ्गव ॥४०॥
मेघगम्भीरया वाचा पार्वत्या सहितः शिवः ॥

शङ्कर उवाच ॥

तुष्टोस्मि नितरां वेदाः शास्त्राणि नियमेन वः ॥४१॥
तपसा च तथा चाहं मद्भक्त्याराधनेन च ॥ मत्तः किमिच्छत ध्रुवं तद्वृणुध्वं ददाम्यहम् ॥४२॥

वेदा ऊचुः ॥

पुरा शङ्खासुरो नाम राक्षसो घोरदर्शनः ॥ ब्रह्मलोकस्थितानस्मानपहृत्य यदृच्छया ॥४३॥
प्रविश्याम्भोनिधिं रक्षस्तत्रास ह्यकुतोभयः ॥ ततस्तु भगवान् विष्णुर्मत्स्यरूपी हरिः स्वयम् ॥
४४॥
हत्वा शङ्खासुरं युद्धे ह्याददेऽस्मांस्तदा हरिः ॥ ऋषिभ्यः प्रददौ चास्मान् दृढीकर्तुं च तेऽक्षमाः ॥
४५॥
तस्माद्वयं प्रपन्नाः स्मः शरणं त्वां कृपानिधे ॥ अस्मानुद्धर देवेश पूर्ववत् कृपया हर ॥४६॥
तेषां तद्वचनं श्रुत्वा भगवान् भूतभावनः ॥ उवाच श्लक्ष्णया वाचा वेदान् पशुपतिस्तदा ॥४७॥

शङ्कर उवाच ॥

वेदाः शृणुत मद्वाक्यं शास्त्राणि च समासतः ॥ पराशरात्मजो व्यासो विष्णोरंशसमुद्भवः ॥४८॥

तीर्थयात्राऽपदेशेन आगमिष्यति चात्र वै ॥ तदा मद्वचनात् सोपि उद्धरिष्यति पूर्ववत् ॥४९॥

अश्रमं वो महात्मानः सर्वसिद्धिकरं परम् ॥ वेदाश्रम ाभिधानेन लोके ख्यातिं गमिष्यति ॥५०॥

लिङ्गान्येतानि वेदाश्च युष्माभिः स्थापितानि च ॥ ख्यातानि युष्मन्नाम्ना तु सर्वकामप्रदानि वै ॥५१॥

प्रथमं स्थापितं लिङ्गं ऋग्वेदेश्वर नामकम् ॥ ततस्तदुत्तरं लिङ्गं यजुर्वेदेश्वर ाभिधम् ॥५२॥

सामवेदेश्वरं चान्य दथर्वेशं ततो नृप ॥ शास्त्रैः संस्थापितं लिङ्गं शास्त्रेश्वर समाह्वयम् ॥५३॥

लिङ्गान्येतानि मर्त्यास्तु पूजयन्ति च कार्तिके ॥ तुलासंस्थे दिनकरे चतुर्थ्यां शुक्लपक्षके ॥५४॥

जडोऽपि वेदशास्त्रार्थतत्वज्ञो भवति स्फुटम् ॥ इति दत्वा वरं शम्भुस्तत्रैवादर्शनं गतः ॥५५॥

ततो वेदा लब्धवराः शास्त्रैः सह कुरुद्वह ॥ तत्रैव वसतिं चक्रुर्व्यासागमनकाङ्क्षया ॥५६॥

इति वेदेश्वराख्यानं कथितं ते नृपोत्तम ॥ शास्त्रेश्वरस्यापि राजन् सर्वसिद्धिकरं नृणाम् ॥५७॥

---

## व्यासाश्रमम्– उपक्रमः

सूत उवाच ॥

अथान्यदपि वक्ष्यामि व्यासतीर्थस्य सम्भवम् ॥ यत्रावसत्तपोर्थं वै व्यासः पारशरो मुनिः ॥५८॥

पूर्वस्यां दिशि राजेन्द्र कोटितीर्थादनुत्तमात् ॥ व्यासतीर्थमिति ख्यातं सर्वकिल्बिषनाशनम् ॥५९॥

तत्र स्नात्वा नरो भक्त्या वाजिमेधफलं लभेत् ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥६०॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे वेदशास्त्राश्रम वर्णनंनाम सप्तसप्तिततमोऽध्यायः ॥
७७॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ७८ ॥  NEXT>>  श्लोक संख्या–८८

## ॥ व्यासाश्रमवर्णने–पराशरोत्पत्ति कथनम् ॥

⟸ व्यासकथोपक्रमः

शतानीक उवाच ॥

सूत मे व्यासतीर्थस्य सम्भवं वक्तुमर्हसि ॥ कस्य पुत्रो मुनिर्व्यासः किमर्थं कृतवान् तपः ॥१॥

गोकर्णे कुत्र स मुनिस्तपसा किमवाप्तवान् ॥ एतत् सर्वञ्च विस्तार्य वक्तुमर्हसि साम्प्रतम् ॥२॥

शृणु राजन् प्रवक्ष्यामि व्यासस्य चरितं महत् ॥ तस्य तीर्थस्य माहात्म्यं पवित्रं पापनाशनम् ॥३॥

## मित्रसहस्य वसिष्ठशापः–तस्य राक्षसत्वप्राप्तिः

ब्रह्मणो मानसः पुत्रो वसिष्ठो मुनिसत्तमः ॥ तस्य पुत्रशतं जज्ञे वेदवेदाङ्गपारगम् ॥४॥

शक्तिर्ज्येष्ठस्तु सर्वेषां राजा मित्रसहाभिधः ॥ वसिष्ठशापेन पुरा रक्षो भूत्वाऽऽत्मजान् मुनेः ॥५॥

शक्त्यादीन् भक्षयामास ततः शापाद्विमुक्तवान् ॥

शौनक उवाच ॥

कोऽसौ राजा मित्रसहः कुतः शापमवाप्तवान् ॥६॥

किमकार्षीद्वसिष्ठस्य तत्पुत्रांश्च कुतोऽग्रसीत् ॥ कथं वसिष्ठशापात्तु मुक्तिं प्राप महीपतिः ॥७॥

एतद्विस्तार्य मे ब्रूहि सूत पौराणिकोत्तम ॥

सूत उवाच ॥

श्रूयतां राजशार्दूल सहैभिर्मुनिपुङ्गवैः ॥८॥

अयोध्याधिपतिः पूर्वं राजा मित्रसहाभिधः ॥ धर्मेण पालयन्नास्ते प्रजाः पुत्रानिवौरसान् ॥९॥

कदाचित् स्वबलैर्युक्तो मृगयामगमन्नृपः ॥ घोरं स काननं गत्वा हत्वा बहुविधान् मृगान् ॥१०॥

मृगरूपधरौ राजन् तत्र राक्षसदम्पती ॥ क्रीडन्तौ लीलया दृष्ट्वा शरेणैकेन राक्षसम् ॥११॥

हत्वा मित्रसहो राजा बलैः साकं पुरं ययौ ॥ तस्यानुजः शुचाविष्टो हते भ्रातर्यचिन्तयत् ॥१२॥

राजासौ बलवान् वीरः कथं कुर्वे प्रतिक्रियाम् ॥ इति चिन्तापरो भूत्वा सूदरूपधरोऽभ्यगात् ॥१३॥

गृहं मित्रसहस्याशु तत्रोवास नृपाज्ञया ॥ पाकं नानाविधं कुर्वन् राज्ञः प्रीतिमवाप्तवान् ॥१४॥

एतस्मिन्नन्तरे राज्ञा गुरुश्राद्धे निमन्त्रितः ॥ समागतो वसिष्ठस्तु भोजनार्थं नृपालयम् ॥१५॥

सोर्चितो राजसिंहेन ततः स्नातुं नदीं ययौ ॥ एतत्समयमाज्ञाय सूदस्तु गुरुवेषधृक् ॥१६॥

राजानं प्राह दुष्टात्मा नृमांसेन समं नृप ॥ अन्नं प्रदीयतां मेद्य यदि दास्यसि भोजनम् ॥१७॥

तथेत्युक्ते तु राज्ञा वै स सूदो गुरुवेषधृक् ॥ महानसं समासाद्य यथापूर्वमतिष्ठत ॥१८॥

ततः सूदं समाहूय वचनं प्राह तं नृपः ॥ नरमांसेन संयुक्तं सूदान्नं कुरु शीघ्रतः ॥१९॥

स सूदो राजवचनं श्रुत्वा भोज्यादिकं व्यधात् ॥ नरमांसेन संयुक्तं ततः स्वस्थानमागमत् ॥२०॥

ततः स्नात्वा वसिष्ठस्तु गत्वा राजनिकेतनम् ॥ सूपविष्टो वसिष्ठस्तु भोजनार्थं नृपोत्तम ॥२१॥

तत्पत्नी मदयन्त्याख्या तस्मै पाकादिकं ददौ ॥ ततो वसिष्ठो दृष्ट्वा तु नरमांसं जुगुप्सितम् ॥२२॥

ततः शशाप राजानं वसिष्ठः क्रोधमूर्छितः ॥ नरमांसं मम नृप यस्मात्त्वं दत्तवानसि ॥२३॥

तस्मान्नराशनस्त्वं हि भवितासि न संशयः ॥ इत्युक्तो गुरुणा राजा क्रोधेन महतावृतः ॥२४॥
पाणिना जलमादाय वसिष्ठं शप्तुमुद्यतः ॥ मदयन्ती तदा दृष्ट्वा शापदानोद्यतं पतिम् ॥२५॥
गुरवे तन्निवार्याथ वचनं चेदमब्रवीत् ॥ अस्माभिर्गुरुणोक्तं यत् क्षन्तव्यं राजसत्तम ॥२६॥
गुरवे प्रतिशापस्तु न दातव्यः कदाचन ॥ यदि दास्यति मोहेन स भवेद्ब्रह्मराक्षसः ॥२७॥
इति शास्त्रं मयाऽश्रावि तस्मात्वं क्षन्तुमर्हसि ॥ इति पत्न्योदितं श्रुत्वा स्वकरस्थजलं नृपः ॥२८॥
स्वपादयोः प्राक्षिपच्च कल्माषाङ्घ्रि ॒रभूत्ततः ॥ ततो गुरुमुवाचेदं त्वया पूर्वं यथोदितम् ॥ २९॥
नरमांसं कुरुष्वेति मया चैव तथा कृतम् ॥ इदानीमशपः कस्मादपापं मुनिपुङ्गव ॥३०॥
इति राज्ञोदितं श्रुत्वा वसिष्ठो मुनिसत्तम ॥ छद्मना तु कृतं ज्ञात्वा राक्षसेन दुरात्मना ॥३१॥
शान्तकोपस्तदा प्राह राजानं गतकल्मषम् ॥ मया मोहान्नृपश्रेष्ठ शापो दत्तस्तवाधुना ॥३२॥
राक्षसेन कृतं सर्वं शापस्यान्तं करोम्यतः ॥ यदा मां जग्धुकामोऽसि तदा शापाद्विमोक्ष्यसे ॥३३॥
कमण्डलूदकस्पर्शान्मम राजेन्द्रसत्तम ॥ इत्युक्त्वा नृपतिं राजन् वसिष्ठः स्वाश्रमं ययौ ॥३४॥
स कदाचिन् मित्रसहो मृगयार्थं वनं गतः ॥ हत्वा मृगान् बहुविधान् क्षुत्पिपासासमन्वितः ॥३५॥
ददर्श स ऋषिं शक्तिं वसिष्ठतनयं पथि ॥ मार्गं हित्वा प्रयाहीति राजा तं प्रत्यभाषत ॥३६॥
इति राज्ञो वचः श्रुत्वा ब्राह्मणस्तु वचोऽब्रवीत् ॥ अपसर्पेति नोक्तव्यं त्वया राजन् द्विजान् प्रति ॥
३७॥
मान्योऽहं तव राजेन्द्र गुरुपुत्रोऽस्म्यहं यतः ॥ इति ब्रुवन्तं तमृषिं समारूढतुरङ्गमः ॥३८॥
राजा मित्रसहः सोऽथ प्रतोदेनाहनदृषिम् ॥ तेन ताडितमात्रेण शक्तिः क्रोधवशङ्गतः ॥३९॥
अहो कल्मषपाद त्वं प्रतोदेनावधीर्यतः ॥ अद्य प्रभृति मच्छापान्निर्घृणो राक्षसो भव ॥४०॥
इति शप्तस्तु मुनिना ज्ञानशून्योऽभवन्नृपः ॥ आविष्टः किङ्कराख्येन विश्वामित्रानुवर्तिना ॥४१॥
सहसा राक्षसो भूत्वा मनुष्याहारलोलुपः ॥ ततो वने द्विजं दृष्ट्वा रममाणं प्रियान्वितम् ॥४२॥
तमग्रहीन्नृपः सोऽथ व्याघ्रो गामिव दुर्बलाम् ॥ मा मेति भाषमाणायां ब्राह्मण्यां करुणं वचः ॥
४३॥
स तद्वाक्यमनादृत्य तत्पतिं जग्धवान् क्षणात् ॥ तेन भक्षितमालोक्य पतिं सा शोकविह्वला ॥४४॥
शापं ददौ राक्षसाय यदा स्त्रीसङ्गमेष्यसि ॥ तदा ते भविता मृत्युर् मच्छापान्नात्र संशयः ॥४५॥
इति शप्तस्तया सोऽथ तत्रैव विचरन् स्थितः ॥

## वसिष्ठपुत्राणां भक्षणम्–वसिष्ठशोकः

ततो वसिष्ठतनयं शक्तिं दृष्ट्वा वचोऽब्रवीत् ॥४६॥
त्वं राक्षसो भवेत्येवं शापो दत्तस्त्वया मम ॥ अतस्त्वां भक्षयाम्यद्य क्षुधितोऽस्मि भृशं मुने ॥४७॥
इत्युक्ते प्रद्रुतं शक्तिं तन्निगृह्य ह्यभक्षयत् ॥ ततस्तदनुजान् सर्वान् विश्वामित्रप्रचोदितः ॥४८॥
वसिष्ठस्याश्रमं गत्वा अन्यस्यां निश्यभक्षयत् ॥ नष्टपुत्रो वसिष्ठस्तु निमग्नः शोकसागरे ॥४९॥
विरक्तिमगमद्देहे मरिष्यामीत्यचिन्तयत् ॥ मेरोः शिखरमारुह्य पपात तदधः क्षितौ ॥५०॥
तत् तूलराशिसदृशमभवत्तस्य भूतलम् ॥ अभक्षयद्विषं घोरं पीयूषं तदभून्नृप ॥५१॥
निबध्य कण्ठे पाषाणं न्यमाक्षीद्वरुणालये ॥ अपास्य कन्धरे बद्धं रज्जुं तीरे तमाक्षिपत् ॥५२॥
पाशेन बध्वा स्वकायं स पपात नदीजले ॥ तं विपाशं नदी कृत्वा पुनस्तीरे व्यचिक्षिपत् ॥५३॥
पिबन्तमम्भः सामुद्रं विवेश वडवानलम् ॥ शीतलः सोऽभवत्तस्य तत्रापि न ममार च ॥५४॥
एवं विभ्राम्यतस्तस्य पुत्रशोकातुरात्मनः ॥ महर्षेर्वाञ्छतो मर्तुं ययुर्द्वादशवत्सराः ॥५५॥

---

## पराशरजननम्–राक्षोघ्नयज्ञारंभः–पुलस्त्यवचसा विरामः

ततः कस्मिन्नपि दिने आगच्छन्नाश्रमं प्रति ॥ शक्तेरिवात्मपुत्रस्य शुश्रावाध्ययनध्वनिम् ॥५६॥
कोयमन्तरधीयान इति सञ्चिन्त्य सत्वरः ॥ अन्तः प्रविश्य कमपि न दृष्ट्वा क इति ब्रुवन् ॥५७॥
तमब्रवीत् प्रिया शक्तेः कोपि नास्ति स्नुषा तव ॥ अन्तर्वत्न्यस्म्यधीयानः पौत्रस्ते वेदपारगः ॥
५८॥
त्यज शोकमिमं रक्ष शक्तिरेवेति भावय ॥ इति तद्वचनाद्धृष्टस्तुष्टः प्राप्तसुतो यथा ॥५९॥
स्वाश्रमे सुखमेवासीद्वीतशोकः पुनर्मुनिः ॥ दृष्ट्वैकदाश्रमगतं कल्माषांघ्रिर्निशाचरः ॥६०॥
जिघत्सुरभ्यगात् क्रूरः सदारं सस्नुषं मुनिम् ॥ तं दृष्ट्वा क्रूरकर्माणं शापग्रस्तं महीपतिम् ॥६१॥
कमण्डलोः समाधाय गाङ्गेयं वारि शीतलम् ॥ मन्त्रैः सम्मन्त्र्य राक्षोघ्नैर्मुनिस्तन्मूर्ध्न्यचिक्षिपत् ॥
६२॥
मुक्तशापः स भूपालः प्रणिपत्य कृताञ्जलिः ॥ अपराधं क्षमस्वेति भूयो भूयः प्रसाद्य तम् ॥६३॥
शापात्तव मुनिश्रेष्ठ रक्षो भूत्वा सुतानहम् ॥ अभक्षयं मुनिश्रेष्ठ मूढबुध्या महामते ॥६४॥
रममाणं स्त्रिया साकं द्विजमेकं जघान वै ॥ तत्पत्नी चाशपन्मां वै स्त्रीसङ्गान्मृत्युमाप्नुहि ॥६५॥
सतीशापादपुत्रोस्मि यथा पुत्रो भवेन् मम ॥ तथा कुरु द्विजश्रेष्ठ मत्पत्न्यां त्वं सुतोद्भवम् ॥६६॥

कुरुष्वेति गुरुं राजा तेन सार्धं गृहङ्गतः ॥ वसिष्ठस्तु तदा राजन् प्रसन्नेनान्तरात्मना ॥६७॥

तत्पत्न्यां मदयन्त्यां स सङ्गत्योत्पाद्य चात्मजम् ॥ अश्मकं नाम राजर्षिमादित्यमिव तेजसम् ॥६८॥

राज्येऽभिषिच्य स्वमगादाश्रमं तदनन्तरम् ॥ कालेन तावतोत्पन्नमदृश्यंत्याभिरक्षितम् ॥६९॥

सुप्रसन्नमुखाम्भोजं सुकुमारं सुवर्चसम् ॥ पौत्रं साक्षात् शक्तिमिव संस्थितं विनयान्वितम् ॥७०॥

दृष्ट्वा नष्टपुत्रशतशोकनाशोऽभवन्मुनिः ॥ आलिङ्ग्याघ्राय मूर्धानं तं कुमारं तुतोष सः ॥७१॥

द्विजन्मनस्तु कर्तव्यं सर्वं तस्य व्यधान्मुनिः ॥ वेदमध्यापयामास शास्त्रञ्चैव यथाविधि ॥७२॥

परान् कामादिकान् सर्वान्न शृणोत्येव बालकः ॥ तस्मात् पराशर इति नाम तस्य व्यधान्मुनिः ॥
७३॥

पितरं मन्यमानः स वसिष्ठञ्च पितामहम् ॥ पराशरः स ववृधे शुक्लपक्ष इवोडुराट् ॥७४॥

विज्ञाय मातृवचनान्निहतं पितरं तदा ॥ राक्षसेन पितृव्यांश्च मुनिः क्रोधमुपेयिवान् ॥७५॥

कालाग्निरिव राजेन्द्र युगान्ते प्राणसंक्षये ॥ अथर्वणज्ञैः सहितो बहुभिः स महर्षिभिः ॥७६॥

राक्षोघ्नं सत्रमारेभे शक्तिपुत्रस्तदा नृप ॥ तस्मिन् कुर्वति सत्रं तु पावके बहुलार्चिषि ॥७७॥

तन्मन्त्रमहिमाकृष्टा राक्षसा घोरदर्शनाः ॥ परःसहस्राण्यपतन् हा हा हा हेति वादिनः ॥७८॥

रक्षःसु दह्यमानेषु ज्वलताऽध्वरवह्निना ॥ कृपया तान् परित्रातुं पुलस्त्यपुलहौ मुनी ॥७९॥

आगतौ सहसा सत्रं शक्तिपुत्रस्य तौ नृप ॥ तावागतौ समालोक्य शक्तिपुत्रस्तदा मुनिः ॥८०॥

अभ्युत्थायासनं दत्वा पूजयित्वा यथाविधि ॥ तदा पराशरो राजन् पप्रच्छागमकारणम् ॥८१॥

पराशर उवाच ॥

भवतोर्दर्शनादद्य कृतार्थोऽस्मि महामुनी ॥ युवां ब्रूतं महाभागावत्रागमनकारणम् ॥८२॥

पुलस्त्य पुलहावूचतुः ॥

पराशर महाभाग कृतं सत्रं त्वयाधुना ॥ बहवो रक्षसामत्र बलाकृष्टा निरागसः ॥८३॥

किंकरः स हतः पापो यः पितॄनवधीत् पुरा ॥ विरम त्वं महायज्ञाद् रक्षोघ्नाच्छक्तिसम्भव ॥८४॥

ब्राह्मणानां क्षमाधर्मस्तपःश्रुतदयावताम् ॥ अज्ञानिनां वधोऽयुक्तो गुरूणामिति हि स्मृतिः ॥८५॥

इति तद्वचनं श्रुत्वा शान्तकोपः पराशरः ॥ उपरम्याध्वरात् तस्मादनिच्छन्नपि सान्त्वितः ॥८६॥

ततस्तौ तुष्टमनसौ पुलस्त्यपुलहौ गतौ ॥ पराशरोपि धर्मात्मा वसिष्ठाज्ञानुयन्त्रितः ॥८७॥

तपश्चरन्नधीयानस्तत्रास्ते स परंतपः ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे पराशरोत्पत्तिकथनंनाम अष्टसप्ततितमोऽध्यायः ॥

७८॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ७९ ॥  NEXT>>  श्लोक संख्या–८५

॥ व्यासाश्रमवर्णने– व्यासोत्पत्ति कथनम् ॥

## व्यासोत्पत्तिः

सूत उवाच ॥

वसुर्नामोपरिचरश्चेदिराजा पुराऽभवत् ॥ गिरेः कोलाहलाख्यस्य दुहिता गिरिकाह्वया ॥१॥
तस्याभवद्रूपवती भार्या शीलगुणान्विता ॥ रममाणस्तया साकं भुञ्जानो विषयान् प्रियान् ॥२॥
सखा मघोनः सोऽप्यासीद् भुवीव विचरन् दिवि ॥ स एकदोपरिचरो मृगयार्थमगाद्वनम् ॥३॥
निघ्नन् तत्र मृगान् राजा नानाजात्युद्भवान् बहून् ॥ दृष्ट्वा चेदिपतिस्तांश्च मन्मथाविष्टचेतनः ॥४॥
हरिणीभिः क्रीडमानान् हरिणांश्च निजेच्छया ॥ बभूव तस्य वै रेतस्तत्क्षणात् स्खलितं नृप ॥५॥
वसुस्तदा चिन्तितवान् मत्तेजो न वृथा भवेत् ॥ पात्रे निक्षिप्य बध्वा तु ऋतुस्नातां प्रियां स्मरन्
॥६॥
मम प्रियायै देहीति श्येनस्याग्रे विनिक्षिपत् ॥ गच्छतस्तद्गृहीत्वा तु मांसपेशीति शङ्कया ॥७॥
श्येनेनान्येन कलहं कुर्वाणस्य विहायसि ॥ कराद्विगलितं तेजो न्यपतद् यमुनाम्भसि ॥८॥
अद्रिका नाम गणिका देवलोकविहारिणी ॥ ब्रह्मशापान् मत्स्यरूपं प्राप्ता तत्र तदाऽग्रसीत् ॥९॥
ततः कदाचित्तां मत्स्यामन्तर्वत्नीं जलेचरीम् ॥ जालिकास्तामग्रहिषुर्गृहं नीत्वा प्रमादिनः ॥१०॥
विदारयन्तस्तां मत्स्यामैक्षन्त मिथुनं तदा ॥ कुमारञ्च कुमारीञ्च प्रददुर्दाशभूभुजे ॥११॥
दाशोपि तौ सुतौ राजन् पोषयामास पुत्रवत् ॥ सा तत्र ववृधे बाला मत्स्यगन्धी पितुर्गृहे ॥१२॥
क्रमेण चासीद्युवतिर्युवचेतोऽपहारिणी ॥ नावा समुत्तारयन्ती कालिन्दीं पितुराज्ञया ॥१३॥
इतस्ततः पर्यटतः पथिकान् निजलीलया ॥ तां कदाचित् तीर्थयात्रां कुर्वन् पाराशरोऽभ्यगात्
॥१४॥
उत्तारयन्तीं यमुनां नावा नलिनलोचनाम् ॥ अवोचत् कामसन्तप्तः कन्ये वाचमिमां शृणु ॥१५॥
अहं पराशरो नाम वसिष्ठस्यात्मजात्मजः ॥ न दाशदुहिता त्वं हि जानामि ज्ञानचक्षुषा ॥१६॥

त्वत्सङ्गमहमिच्छामि वृणीष्व वरमीप्सितम् ॥

मत्स्यगन्ध्युवाच ॥

यदुक्तं भवता स्वामिन् तत्तथास्तु महामुने ॥१७॥

पित्राज्ञास्था अहं कन्या लोकदूष्या भवाम्यहम् ॥ जनाः पश्यन्ति तीरस्था आवयोश्चरितं हि यत् ॥१८॥

जना यथा न जानन्ति तथा कुरु महामते ॥

पराशर उवाच ॥

त्वया यदुक्तं तत्सर्वं करोमि शुभलोचने ॥१९॥

तटस्थानां दृशो भद्रे नीहारैरावृणोम्यहम् ॥ अन्तरीयो भवत्येषा नौरावाभ्यामधिष्ठिता ॥२०॥

दुःसहो मत्स्यगन्धोऽयं शरीरात्तेऽपसर्पतु ॥ सौगन्धा भवतात् त्वं हि नाम्ना सत्यवतीति वै ॥२१॥

मत्संसर्गात्त्वयि शुभे जायते वैष्णवोत्तमः ॥ तपोबलं निरीक्षस्व ममाद्य मृगलोचने ॥२२॥

इति तद्वचनात् सा तु नावं द्विपञ्चमण्टपम् ॥ पर्यङ्कक्लिपितानर्घ्यतल्पं यवनिकावृतम् ॥२३॥

सौरभं स्वशरीरस्य नीहारञ्च समन्ततः ॥ दृष्ट्वा तदद्भुतं कर्म साऽकरोत् तदभीप्सितम् ॥२४॥

तत्र द्वैपायनो नाम सत्यवत्यां पराशरात् ॥ अवतारो हरेः साक्षात् ज्ञानशक्त्युपबृंहितः ॥२५॥

नीलजीमूतसङ्काशश्चीरकृष्णाजिनाम्बरः ॥ तदैव ववृधे बालो भास्वरो ब्रह्मवर्चसा ॥२६॥

अधीयानो ब्रह्मविद्यामिदमाह स्वमातरम् ॥ यदा कार्यं मया किञ्चिदस्ति मातस्तदा स्मृतः ॥२७॥

आगमिष्यामि तत्सर्वं साधयिष्यामि मा शुचः ॥ इत्युक्त्वा पितरौ नत्वा विधाय त्रिःप्रदक्षिणम् ॥२८॥

मातरं तामनुज्ञाप्य स तस्थौ पितुरन्तिके ॥

पराशर उवाच ॥

नदीं तारय गच्छामि दाशकन्ये शुचिस्मिते ॥२९॥

स्वस्ति तेऽस्तु सुतः सोऽयं लोके ख्यातिं गमिष्यति ॥ नाम्ना वेदव्यास इति बादरायण इत्यपि ॥३०॥

द्वीपेस्मिन् सम्प्रसूतत्वाद् द्वैपायन इतीर्यते ॥ इत्युक्त्वा तां शक्तिपुत्रो नदीं सन्तारितस्तया ॥३१॥

यथाभिलाषमगमदात्मजेन पराशरः ॥ सापि सत्यवती भूयो यथापूर्वमतिष्ठत ॥३२॥

दिने दिने सा ववृधे शुक्लपक्ष इवोडुराट् ॥

## व्यासेन कुरुकुलसन्तानवर्धनम्

सूत उवाच ॥

सोमवंशेऽभवद्राजन् प्रतीपो नाम भूपतिः ॥३३॥

प्रागासीत्तस्य पुत्रस्तु शन्तनुर्नाम भूपतिः ॥ तस्य गङ्गाऽभवद्भार्या तस्यां भीष्मो ह्यजायत ॥३४॥

शन्तनौ समयं कृत्वाऽक्षिपद् गङ्गा जले सुतान् ॥ अष्टमं तु समुत्पन्नं भीष्मं कुरुपितामहम् ॥३५॥

स शन्तनुर्जिघांसन्तीं रमणीमात्मजं स्वकम् ॥ मा वधीरेकमपि वा मह्यं देहीत्ययाचत ॥३६॥

ततो गङ्गाऽब्रवीत् तं वै नास्म्यहं प्राकृता वधूः ॥ कमण्डलोः समुत्पन्ना सरसीरुहजन्मनः ॥३७॥

सम्प्राप्तशापैर्वसुभिर् वसिष्ठादृषिसत्तमात् ॥ भूमौ जनिष्यथेत्येवं चौर्यात्तस्य च धेनुकाम् ॥३८॥

याचिता तैरहं कार्यं यथा नः स्वस्थितिर्भवेत् ॥ क्षिप्रं त्वया देवलोके न काङ्क्षामो भुवि स्थितिम् ॥३९॥

अङ्गीकृत्य च तत्प्रीत्यै कार्यमेतत् कृतं मया ॥ यत्कृतं हि मया राजन् तत्सोढव्यं त्वया नृप ॥४०॥

सुतेच्छया प्रतिज्ञा चोल्लङ्घिता भवता नृप ॥ त्वां विहायाद्य गच्छामि त्वत्सुतः प्रतिगृह्यताम् ॥४१॥

अयं शान्तनवो भीष्मो गाङ्गेय इति विश्रुतः ॥ समस्तवेदशास्त्रज्ञः सर्वशस्त्रास्त्रकोविदः ॥४२॥

इच्छाजीवितवान् जेता द्विषां भागवतोत्तमः ॥ रक्षणीयः सुत इतीत्युक्त्वा गङ्गा व्यलीयत ॥४३॥

सूत उवाच ॥

अन्तर्हितायां गङ्गायां चिन्तयानः स शन्तनुः ॥ तद्रूपानुगतध्यानः पुत्ररक्षणतत्परः ॥४४॥

निनाय कतिचिद्वर्षान् क्षत्रधर्मेण मेदिनीम् ॥ भीष्मोपि ववृधे वीरः सर्वशास्त्रार्थपारगः ॥४५॥

स्वधर्मनिष्ठस्तत्वज्ञः पितृवाक्यानुमोदकः ॥ शन्तनू रथमारूढः कदाचिन्मृगयां गतः ॥४६॥

अपश्यत्तत्र राजेन्द्रो दाशराजात्मजां वने ॥ सर्वलक्षणसम्पन्नां दृष्टेन्दीवरलोचनाम् ॥४७॥

दाशराजमुपागम्य ययाचे तां स्मराहतः ॥ दाशराज प्रदातव्या कन्या ते इति मे मतिः ॥४८॥

दाशराज उवाच ॥

राजा त्वं लोकमान्योऽसि त्वत्सम्बन्धो हि दुर्लभः ॥ सा तुभ्यमेव दातव्या याचमाने तु किं पुनः ॥४९॥

तथापि किञ्चिद्वक्ष्यामि राजन् शृणु वचो मम ॥ आस्ते भीष्मस्तव सुतो ज्येष्ठः श्रेयान् धनुष्मताम् ॥५०॥

भवदीयस्य राज्यस्य स एव खलु रक्षकः ॥ मत्सुतातनया राजन् भवेयुर्भीष्मकिङ्कराः ॥५१॥

कन्यापुत्राय मे राज्यं भवान् वै यदि दास्यति ॥ अहं कन्यां प्रदास्यामि तव नो चेत् सुतां मम ॥५२॥

न दास्यामि नृपश्रेष्ठ यथेच्छसि तथा कुरु ॥ इति दाशस्य वचनं श्रुत्वा राजा स शन्तनुः ॥५३॥

कामबाणेन विद्धोऽपि प्रेम्णा भीष्मानुसारिणा ॥ वाचापि राज्यं दास्यामीत्यनुक्त्वाऽगात् स्वकां पुरीम् ॥५४॥

तामेवमनसा ध्यायन् दाशराजसुतां तदा ॥ स्नानभोजननिद्रादि त्यक्त्वा सर्वं विरक्तवान् ॥५५॥

तादृशस्य पितुर्वृत्तं श्रुत्वा भीष्मोऽथ सारथेः ॥ दाशराजस्य सदनं गत्वा भीष्मस्तमब्रवीत् ॥५६॥

भीष्म उवाच ॥

सुतां योजनगन्धीं तां पित्रे मे देहि दाशप ॥ ज्ञातं सर्वं त्वद्हृदिस्थं न काङ्क्षे राज्यमुत्तमम् ॥५७॥

दास्याम्येव न सन्देह ऊर्ध्वरेता भवाम्यहम् ॥ प्रतिज्ञामकरोदेवं भीष्मो भागीरथीसुतः ॥५८॥

तच्छ्रुत्वा दाशराजस्तु शन्तन्वर्थे ददौ सुताम् ॥ भीष्महस्ते कुरुश्रेष्ठ तामादाय ययौ गृहम् ॥५९॥

भीष्मः सत्यवतीं प्रेम्णा यथाविधि पितुस्तदा ॥ उद्वाहयामास नृप तां कन्यां राजवेश्मनि ॥६०॥

स तस्यां जनयामास सत्यवत्यां सुतावुभौ ॥ चित्राङ्गदं चित्रवीर्यं पुत्रौ सर्वगुणान्वितौ ॥६१॥

ततः कालवशं प्राप्तः शन्तनुर्नृपपुङ्गवः ॥ गाङ्गेयस्तावुभौ राज्ये बालकावभ्यषेचयत् ॥६२॥

चित्राङ्गदस्तयोर्ज्येष्ठो मान्यो रूपगुणान्वितः ॥ ततश्चित्राङ्गदो राजन् गन्धर्वेण हतो युधि ॥६३॥

अम्बालिकाम्बिका चोभे कन्ये काशीमहीभुजः ॥ प्रादाद्विचित्रवीर्याय समादाय नदीसुतः ॥६४॥

राजपुत्रस्ततस्ताभ्यामास्ते क्रीडन् यथासुखम् ॥ ततः कतिपयाहःसु क्षयरोगयुतो नृपः ॥६५॥

रोगार्तो बहुदुःखेन चित्रवीर्यो ममार ह ॥ विचित्रवीर्ये स्वर्याते दृष्ट्वा राज्यमराजकम् ॥६६॥

आहूय भीष्मं प्रोवाच देवी सत्यवती सुतम् ॥

सत्यवती उवाच ॥

राज्यं कुरुष्व गाङ्गेय प्रतिज्ञा त्यज्यतामितः ॥६७॥

कार्यो न सन्ततिच्छेदः सुरक्ष्येयं वसुन्धरा ॥ न लङ्घनीयं पुत्रेण मातृवाक्यमिति श्रुतिः ॥६८॥

भीष्म उवाच ॥

विजह्यादग्निरूष्माणं नोदेयाद्यदि भास्करः ॥ पृथिवी परिवर्तेत शुष्येयुः सप्तसागराः ॥६९॥

तथापि मातर्नो जह्यां प्रतिज्ञां मत्कृतामहम् ॥ कन्याभावे समुत्पन्नो मातस्त्वत्तः श्रुतं पुरा ॥७०॥

नारदात् तदहं वेद्मि व्यासो नारायणांशजः ॥ स्मर त्वमिष्टसिध्यर्थं कानीनं बादरायणम् ॥७१॥

तं सा तथेति सस्मार व्यासः प्रादुरभूत् पुरः ॥ मातरं प्रणिपत्याग्रे भीष्मेणाप्यभिनन्दितः ॥७२॥
आसने सुखमासीनः प्रोवाच जननीं तदा ॥

व्यास उवाच ॥

किं कर्तव्यं मया क्षिप्रं सर्वं ब्रूहि करोम्यहम् ॥७३॥
आगतं विद्धि मां मातः स्मरणात् तव पुत्रकम् ॥

सत्यवत्युवाच ॥

मम पुत्रावुभौ जातौ शन्तनोर्नृपसत्तमात् ॥७४॥
एको गन्धर्वराजेन निहतो रणमूर्धनि ॥ राजयक्ष्मातुरोप्येकः कालस्य वशमागतः ॥७५॥
काशीराजसुते चोभे तत्पत्न्यौ रूढयौवने ॥ भीष्मः सत्यप्रतिज्ञोऽयमुद्वोढुं नैव वाञ्छति ॥७६॥
तस्मात् कुरुकुलस्यास्य विच्छेदो न यथा भवेत् ॥ तथा त्वया विधातव्यं त्वं स्मृतस्तु मया ततः ॥७७॥
यस्य सन्ततिविच्छेदे सम्प्राप्ते दैवयोगतः ॥ देवरेण सुतोत्पत्तिरित्याहुस्तत्वदर्शिनः ॥७८॥
त्वञ्च जानासि सर्वज्ञ सर्वशास्त्रार्थपारग ॥ तस्मादिदं मम वचः कर्तुमर्हसि पुत्रक ॥७९॥
इति मात्रा समादिष्टो व्यासो भीष्मेण चैव हि ॥ अम्बिकायां सुतं व्यासो धृतराष्ट्रमजीजनत् ॥८०॥
मातुर्दोषेण सोऽन्धोऽभूत् तव पूर्वपितामहः ॥ अम्बालिकायां तनयं पाण्डुं मुनिरजीजनत् ॥८१॥
विदुरं भगवद्भक्तं तद्दास्यामध्यजीजनत् ॥ सत्यवत्या स्वमात्रा वै समादिष्टं यथा मुनिः ॥८२॥
एवं स शन्तनो राजन्नष्टां चोत्पाद्य सन्ततिम् ॥ पुनर्व्यासो महातेजास्तत्रैवान्तरधीयत ॥८३॥
धृतराष्ट्रश्च पाण्डुश्च ववृधाते सुतावुभौ ॥ अभिषिक्तौ च भीष्मेण ऊषतुर्हस्तिनापुरे ॥८४॥
धर्मान्महीं रक्षमाणौ प्रजाः पुत्रानिवौरसान् ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे व्यासोत्पत्तिकथनंनाम एकोनाशीतितमोऽध्यायः ॥७९॥

सूत उवाच ॥

ततस्तु भगवान् व्यासस्तीर्थयात्रापरायणः ॥ परःसहस्रैर्यतिभिर् ऋषिभिश्च तपोधनैः ॥१॥

जटाधरैरात्मपरैः सेव्यमानो दिवानिशम् ॥ हिमाचलं समासाद्य नरनारायणाश्रमम् ॥२॥

अवसंस्तत्र व्यासस्तु किञ्चित्कालं नृपोत्तम ॥ नरनारायणौ देवौ पूजयित्वा यथाविधि ॥३॥

बादरायण इत्याख्यां बदर्याश्रमवासतः ॥ प्राप्तवांस्तत्र राजेन्द्र व्यासः सत्यवतीसुतः ॥४॥

ततो व्यासस्तत्र तत्र पश्यन्नेव तपस्विनाम् ॥ तपसा दीप्यमानानामाश्रमाणि महान्ति च ॥५॥

ततः काशीमुपागम्य तत्र स्थित्वा नृपोत्तम ॥ स्नानं कृत्वा तु गङ्गायां शिवं सम्पूज्य यत्नतः ॥६॥

किञ्चित्कालं तपस्तत्वा काश्यां कुरुकुलोद्भव ॥ ततः क्रमेण क्षेत्राणि पश्यन् गोदावरीं गतः ॥७॥

तत्र स्नायन् मुनिर्व्यासः किञ्चित्कालमुवास ह ॥ ततः क्रमेण गोकर्णमागतस्तपसां निधिः ॥८॥

चतुर्भिः सहितः शिष्यैः पैलाद्यैरात्मवित्तमैः ॥ मया सह नृपश्रेष्ठ तथान्यैर्ऋषिभिः सह ॥९॥

दृष्ट्वा पुण्यतमं क्षेत्रं सर्वदेवमयं शुभम् ॥ कोटितीर्थं गिरिवरं शतशृङ्गं तपोवनम् ॥१०॥

लिङ्गं महाबलञ्चैव रुद्रयोनिं तथा नृप ॥ स्रोतस्विनीं ताम्रपर्णीं पितृस्थालीञ्च सागरम् ॥११॥

दृष्ट्वा सर्वाणि तीर्थानि लिङ्गानि च महामुनिः ॥ निधिं दृष्ट्वा यथा निःस्वस्तथा हर्षमवाप सः ॥१२॥

तत्र वस्तुं मनश्चक्रे गोकर्णे राजसत्तम ॥ कोटितीर्थात् पूर्वदिशि शरपाते शुभे स्थले ॥१३॥

कृत्वाश्रमं तपो व्यासश्चचार सुसमाहितः ॥ बद्धपद्मासनो मौनी ध्यायन् विश्वेश्वरं हृदि ॥१४॥

तीर्थं कृत्वा सुविमलं शौचार्थं तत्र पार्थिव ॥ स्नानं कुर्वन्ननुदिनं शिवमात्मनि चार्चयन् ॥१५॥

शिष्यैः परिवृतो विद्वान् वेदानध्यापयन् सदा ॥ एवं सन्तपतस्तस्य कालेनाविरभूच्छिवः ॥१६॥

प्रसन्नमागतं दृष्ट्वा शङ्करं बादरायणः ॥ उवाच वाग्भिरिष्टाभिः स्तोतुं समुपचक्रमे ॥१७॥

व्यास उवाच ॥

योगिध्येय नमस्तेस्तु नमस्ते भक्तवत्सल ॥ पाहि मां करुणासिन्धो मग्नमज्ञानसागरे ॥१८॥

इत्युक्त्वा दण्डवन्नत्वा उत्थाय प्राञ्जलिः स्थितः ॥

शिव उवाच ॥

व्यास त्वत्तपसा तुष्टः प्रसन्नोऽस्मि न संशयः ॥१९॥

वरं ददामि ते व्यास गृहाण वरमीप्सितम् ॥

व्यास उवाच ॥

दर्शनादेव ते शम्भो कृतार्थोस्मि महेश्वर ॥२०॥

एतदेव वरं मेद्य अन्यं नेच्छामि साम्प्रतम् ॥ मया कृतमिदं तीर्थमाश्रमं च तथा शिव ॥२१॥
सर्वसिद्धिकरं चास्तु प्रसादात्तव शङ्कर ॥ आश्रमं ते पुण्यतमं सर्वपापप्रणाशनम् ॥२२॥
व्यासाश्रममिति ख्यातं सर्वसिद्धिकरं भवेत् ॥ माघमासे शुक्लपक्षे मकरस्थे दिवाकरे ॥२३॥
द्वादश्यां योऽत्र चागत्य स्नात्वा तीर्थे तव द्विज ॥ लिङ्गं महीमयं कृत्वा मत्पूजां क्रियते यदि ॥२४॥
सोपि सिद्धो भवेद् व्यास सर्वान् कामानवाप्नुयात् ॥ पुनरन्यत् प्रवक्ष्यामि शृणु लोकहितं वचः ॥२५॥
शङ्खासुरेण वेदाश्च चूर्णिता हि पुरा मुने ॥ शास्त्राणि च तथा व्यास तेन विप्राः सुदुःखिताः ॥२६॥
अप्रज्ञा मन्दभाग्याश्च भविष्यन्ति कलौ जनाः ॥ प्रायशोल्पायुषो मर्त्या निद्रातन्द्रीश्रमातुराः ॥२७॥
निःसत्वा निर्धना ब्रह्मन् रोगोपप्लवपीडिताः ॥ महानयं वेदराशिर्दुर्बोधो दुस्तरो नृणाम् ॥२८॥
(तस्मात्त्वया वेदराशेर्विभागो मुनिसत्तम ॥ ममाज्ञया प्रकर्तव्यः सुबोधः स्याद्यथा नृणाम् ॥२९॥
शङ्खेन चूर्णीभूतानि शास्त्राणि च मुनेऽधुना ॥ त्वयैव व्यवस्थाप्यानि शक्तः स्या मदनुग्रहात् ॥३०॥
तथास्त्विति च प्रत्याह व्यासः पाराशरस्तदा ॥ एवमुक्त्वा शिवस्तस्य हृदयं प्रविवेश ह ॥३१॥)
एकविंशतिधाऽकार्षीदृग्वेदं बादरायणः ॥ तथैव शतशो राजन् यजुर्वेदमकल्पयत् ॥३२॥
सहस्रधा सामवेदं गानं बध्वा नृपोत्तम ॥ ऋग्वेदं प्रथमं तत्र पैलश्च मुनिरग्रहीत् ॥३३॥
वैशम्पायननामानं यजुरध्यापयन्मुनिम् ॥ सामान्यध्यापयामास जैमिनिं मुनिसत्तमम् ॥३४॥
सुमन्तुं नाम सुधियमथर्वणमशिक्षयत् ॥ चतुर्णामपि वेदानां षडङ्गानि व्यधान्मुनिः ॥३५॥
मुखं व्याकरणं तेषां ज्योतिषं नेत्रमुच्यते ॥ निरुक्तं श्रोत्रमुद्दिष्टं छन्दश्चरणमीरितम् ॥३६॥
शिक्षा घ्राणमिति प्राहुर्हस्तौ कल्पं प्रचक्षते ॥ अष्टादशपुराणानि यथापूर्वं व्यधान्नृप ॥३७॥
पुराणं हि मम प्रोक्तं सेतिहासं महात्मना ॥ तथा भारतमाख्यानं कृपया मुनिना कृतम् ॥३८॥
वेदशास्त्रविनोदेन शिष्यैः सार्धमथावसत् ॥

---

## शुकाश्रमं

सूत उवाच ॥

पुरः शुकशुभाकारो भार्यया च मनोज्ञया ॥३९॥
विहरन् दर्शनपथाऽऽगमद्देवाभिचोदितः ॥ तद्दर्शनान्मुनेस्तस्य मन्मथव्यथितात्मनः ॥४०॥

निजं तेजः प्रचस्कन्द ब्रह्मशक्त्युपबृंहितम् ॥ तत्तु सद्यः कुमारोऽभूत् कमनीयाकृतिस्तु वै ॥४१॥
आत्मीयगुणसम्पन्नः सर्वविद्ब्रह्मवित्तमः ॥ व्यधात् पिता शुकं नाम्ना शुकदर्शनजं सुतम् ॥४२॥
स जातमात्रः सम्पन्नब्रह्मसाक्षात्कृतिः सुधीः ॥ सच्चिदानन्दरूपः स ब्रह्मैवाभूदतीन्द्रियः ॥४३॥
जातमात्रः सकृद्दृष्टस्तत्रैवादर्शनं गतः ॥ अनीक्ष्यमाणः पुत्रं स्वं शुशोच विरहातुरः ॥४४॥
पुत्रशोकातुरो व्यग्रो द्वैपायनमुनिस्तदा ॥ अन्वेषितुं तमन्वगात् साक्षाद्देवं महेश्वरम् ॥४५॥
संस्तुवन् स्वीकृतिं चक्रे सन्तुष्टः स्वात्मजं सुतम् ॥ यथात्मना पुरा दृष्टमात्मजं शुभलक्षणम् ॥४६॥
उपनीतं ततश्चक्रे वेदानध्यापयच्च तम् ॥ सूत्राणि ब्रह्मजिज्ञासासम्बन्धीनि स्वयं सुधीः ॥४७॥
विधाय प्रियपुत्राय शुकाय प्रददौ मुदा ॥ एवं व्यासे वर्तमाने देवर्षिर्नारदस्तदा ॥४८॥
आविर्बभूव पुरतः शीतांशुरिव निर्मलः ॥ अभ्युत्थाय तमालोक्य स्वागतार्घ्यासनादिभिः ॥४९॥
पूजयित्वा यथान्यायं व्यासः प्रीतमना नृप ॥ अथ व्यासमुपासीनमिदमाह च नारदः ॥५०॥
व्यास त्वया विभक्तो वै चतुर्धा वेदसञ्चयः ॥ तेषां षडङ्गानि मुने विभक्तानि पृथक् पृथक् ॥५१॥
भारतञ्च समाख्यातं पुराणानि तथैव च ॥ नूनं भागवता धर्मा भवता न प्रकाशिताः ॥५२॥
प्रियाः परमहंसानां मुक्तिमार्गानुसारिणाम् ॥ कुरु भागवतं नाम आत्मचेतः प्रसादनम् ॥५३॥
इत्युक्त्वाऽगात् स च मुनिर्नारदस्तु यथाऽऽगतम् ॥ ततस्तद्वचसा कृत्वा श्रीमद्भागवतं मुनिः ॥५४॥
शुकमध्यापयामास सुतमात्मविदां वरम् ॥ पितामहाय ते राजन् प्राह भागवतं शुकः ॥५५॥

सूत उवाच ॥

तदधीत्य शुको राजन् पित्रादिष्टः प्रसन्नधीः ॥ तस्याश्रमादुत्तरस्यां किञ्चिदूर्ध्वं स्वमाश्रमम् ॥५६॥
कृत्वा चचार स तपो ब्रह्म ध्यायन् स्थिरासनः ॥ अद्वैतं भावयन्नित्यं नासाग्रन्यस्तलोचनः ॥५७॥
एवं तपस्यतस्तस्य वर्षाणि कतिचिद्ययुः ॥ तस्य प्रत्यक्षतां यातस्ततो राजन् हरः स्वयम् ॥५८॥
उवाच तं शुकं शम्भुः प्रसन्नेनान्तरात्मना ॥ सिद्धोऽसि त्वं पूर्वमेव तथापि तपसा तव ॥५९॥
तुष्टोऽस्मि नितरां योगिन् किं तेऽभीष्टं च तद्वद ॥

शुक उवाच ॥

दर्शनात्ते सुरश्रेष्ठ वरमन्यन्न विद्यते ॥६०॥
तीर्थमेतत् सुरश्रेष्ठ त्रैलोक्ये श्रेष्ठतां व्रजेत् ॥

शङ्कर उवाच ॥

तथास्तु शुक योगीन्द्र आश्रमं तव पुण्यदम् ॥६१॥

नाकपृष्ठसमं चास्तु तीर्थं सर्वमलापहम् ॥ माघमासे सिते पक्षे मकरस्थे दिवाकरे ॥ ६२॥

अत्रागत्य नरो यस्तु दशम्यां स्नानमाचरेत् ॥ तस्य ह्याजन्म चरितं पापं नश्यन्ति तत्क्षणात्

॥६३॥

इत्युक्त्वा भगवान्रुद्रस्तत्रैवान्तरधीयत ॥ ततः शुकः प्रसन्नात्मा तत्रोवास यथासुखम् ॥६४॥

तदेतत् कोटितीर्थात्तु ईशान्यां दिशि विद्यते ॥ शरपाते नृपश्रेष्ठ शुकस्याश्रममुत्तमम् ॥६५॥

---

## सिद्धेश्वरस्थानम्–उपक्रमः

अथान्यदपि वक्ष्यामि शृणुष्वाश्रममुत्तमम् ॥ शतशृङ्गतटे रम्ये उत्तरे कुरुपुङ्गव ॥६६॥

तस्मात् सार्धक्रोशमध्ये ईशान्यां दिशि विद्यते ॥ सिद्धाश्रमं नाम पुण्यं सर्वपापनिषूदनम् ॥६७॥

लिङ्गं सिद्धेश्वरं नाम भक्तानामिष्टदायकम् ॥ यत्पृष्टं भवता राजन् तत्सर्वं कथितं मया ॥६८॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे व्यासाश्रम शुकाश्रम(सिद्धेश्वर स्थान वर्णनं महिमानुवर्णनंनाम अशीतितमोऽध्यायः ॥८०॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ८१ ॥  NEXT>>  श्लोक संख्या–६०

॥ सिद्धाश्रम – मणिभद्र – सिद्धेश्वर – भूतनाथमहिमानुवर्णनम् ॥

←← उपक्रमः

शतानीक उवाच ॥

सिद्धाश्रमस्य माहात्म्यं श्रोतुमिच्छामि तत्वतः ॥ कोऽसौ सिद्धः कथंभूतो गोकर्णे सिद्धिमागतः ॥

१॥

एतत् सर्वमशेषेण विस्तराद्वक्तुमर्हसि ॥

सूत उवाच ॥

श्रूयतामभिधास्यामि सिद्धस्य चरितं महत् ॥२॥

शृण्वतां सर्वपापघ्नं सर्वाभीष्टप्रदायकम् ॥ पुरा कैलासशिखरे समासीनो वृषध्वजः ॥३॥

पार्वत्या प्रियया साकं वीरभद्रादिभिर्युतः ॥ गोकर्णक्षेत्रमाहात्म्यं सर्वाघौघविनाशनम् ॥४॥

तथैव शुश्रुवुः सर्वे वीरभद्रादयो नृप ॥ विस्मयं परमं जग्मुः श्रुत्वा गोकर्णवैभवम् ॥५॥

ततः सिद्धो माणिभद्रो भूतनाथश्च पार्थिव ॥ नमस्कृत्वा हरं भक्त्या कृताञ्जलिपुटास्तदा ॥६॥

स्तुत्वा प्रोचुर्देवदेवं पार्षदास्ते नृपोत्तम ॥ देवदेव कृपासिन्धो सृष्टिस्थित्यन्तकारक ॥७॥

त्वं गतिः सर्वलोकानां प्रभूणां प्रभुरव्ययः ॥ त्वन्मुखाद्गलितं श्रुत्वा गोकर्णक्षेत्रवैभवम् ॥८॥

तत्क्षेत्रं दृष्टुमिच्छामो अनुज्ञां देहि नः प्रभो ॥ तत्र स्थितेषु तीर्थेषु स्नात्वाभ्यर्च्य महाबलम् ॥९॥

समीपं चागमिष्यामो भवतः करुणाकर ॥ इति तेषां वचः श्रुत्वा देवदेवो महेश्वरः ॥१०॥

उवाच तान् प्रसन्नात्मा पार्षदान् परमेश्वरः ॥

शङ्कर उवाच ॥

युष्माकं चेदृशी जाता बुद्धिर्मत्क्षेत्रसेवने ॥११॥

कृतकृत्या भवन्तो वै गच्छताद्यैव पुत्रकाः ॥ यूयं मदाज्ञया क्षेत्रं तत्राभ्यर्च्य महाबलम् ॥१२॥

आगन्तव्यं पुनश्चात्र शीघ्रं मच्छासनाद्गणाः ॥ इति शम्भुवचः श्रुत्वा प्रमथास्ते नृपोत्तम ॥१३॥

सिद्धश्च माणिभद्रश्च भूतनाथश्च पार्थिव ॥ शिवाज्ञया महाक्षेत्रं गोकर्णं प्रति चाययुः ॥१४॥

तत्र स्थितेषु तीर्थेषु स्नात्वा तत्र यथाविधि ॥ महाबलं पूजयित्वा यथाविधि शिवाज्ञया ॥१५॥

कोटितीर्थं समुद्रञ्च ताम्रगौरीञ्च निम्नगाम् ॥ तथा सर्वाणि तीर्थानि सार्वभौमं महाबलम् ॥१६॥

शतशृङ्गं गिरिवरं देवौ हरिहरौ तथा ॥ क्रीडाशैलं चाश्रमाणि देवसिद्धर्षिरक्षसाम् ॥१७॥

कामाघनाशिनीं चैव तथा शालूकिनीमपि ॥ पञ्चक्रोशपरीमाणं क्षेत्रं साक्षाच्छिवात्मकम् ॥१८॥

कैलासादधिकं ज्ञात्वा गोकर्णं ते नृपोत्तम ॥ विस्मयं परमं जग्मुर्मुदा परमया युताः ॥१९॥

सार्धयोजनविस्तारमर्धयोजनमायतम् ॥ उपजग्मुस्तदा वासं चक्रुस्तत्रैव गोश्रुतौ ॥२०॥

---

शतशृङ्गतटे रम्ये रत्नाकरसमीपतः ॥ कृत्वाश्रमपदं राजन् माणिभद्रो ऽवसत्तदा ॥२१॥

तस्मात्प्राच्यां तु सिद्धो वै सार्धक्रोशप्रमाणतः ॥ कृत्वाश्रमपदं तत्र उवास तप आचरन् ॥२२॥

भूतनाथोपि राजेन्द्र कोटितीर्थस्य चोत्तरे ॥ प्रतीच्यां विश्वकर्मेशात् कृत्वाश्रमपदं शुभम् ॥२३॥

तपश्चचार सुचिरं ध्यायन् विश्वेश्वरं हरम् ॥

---

## मणिभद्र

दिव्यवर्षसहस्राणि तपश्चक्रुश्च ते नृप ॥२४॥

ऊर्ध्वपादो निरालंबो शिरसा भूमिमास्पृशन् ॥ जितेन्द्रियो जितक्रोधो तथा वर्षसहस्रकम् ॥२५॥
माणिभद्रोपि राजेन्द्र ध्यायन् ब्रह्म सनातनम् ॥ एवं तपस्यतस्तस्य प्रसन्नोऽभून्महेश्वरः ॥२६॥
आत्मानं दर्शयामास मुदा तं वाक्यमब्रवीत् ॥

शङ्कर उवाच ॥

माणिभद्र महाभाग तपसा तव तोषितः ॥२७॥
वरं वरय भद्रन्ते यथाभिलषितं हृदि ॥ दर्शनादेव ते स्वामिन् कृतार्थोस्मि न संशयः ॥२८॥
एतदेव वरं मेद्य दर्शनं तव शङ्कर ॥ अत्रैव वस्तुमिच्छामि क्षेत्रेऽस्मिन् तव शोभने ॥२९॥

ईश्वर उवाच ॥

तथास्तु त्वं माणिभद्र क्षेत्रेऽस्मिन् वस सर्वदा ॥ क्षेत्रस्य पश्चिमे सीम्नि दुष्टनिग्रहकारक ॥३०॥
समस्तभूतनाथानामधिपो भव मानद ॥ अत्रागत्य नरा ये त्वां पूजयन्ति विधानतः ॥३१॥
न तेषां दुष्कृतं किञ्चिद्भूतप्रेतपिशाचजम् ॥ इति दत्वा वरं तस्य माणिभद्रस्य चेश्वरः ॥३२॥
ततस्तु माणिभद्रो वै शतशृङ्गस्य मूर्धनि ॥ उवास शिक्षयन् दुष्टान् रक्षन् तत्क्षेत्रमण्डलम् ॥३३॥

---

## सिद्धेश्वर

सिद्धोपि तत्र सुचिरं स्वाश्रमे भरतर्षभ ॥ लिङ्गं संस्थाप्य विमलं तीर्थं कृत्वा विधानतः ॥३४॥
तत्र स्नात्वा प्रतिदिनं तल्लिङ्गं पूजयन्नृप ॥ वायुभक्षो निराहारो जितक्रोधो जितेन्द्रियः ॥३५॥
ऊर्ध्वबाहुर्निरालम्बो अङ्गुष्ठेन भुवं स्पृशन् ॥ एवं तपस्यतस्तस्य बहुकालोऽत्यगान्नृप ॥३६॥
दिव्यवर्षसहस्रान्ते प्रसन्नोऽभूत् सदाशिवः ॥ आविर्बभूव सिद्धस्य पुरतः पार्वतीपतिः ॥३७॥
प्रियया सह शर्वाण्या वृषारूढो गणान्वितः ॥ ततः सिद्धस्तु तं दृष्ट्वा प्रसन्नं पार्वतीपतिम् ॥३८॥
तुष्टाव वाग्भिरिष्टाभिः प्रबद्धकरसम्पुटः ॥

सिद्ध उवाच ॥

नमस्ते देव देवेश नमस्ते त्रिपुरान्तक ॥३९॥
नमो भक्तानुकम्पाय नमस्ते गिरिजापते ॥ नमस्ते वेदवेद्याय नमो वेदान्तरूपिणे ॥४०॥
नमस्त्रिशूलहस्ताय नमस्ते वृषवाहन ॥ इति स्तुवन् महादेवं भूयो भूयो ननाम च ॥४१॥
तमब्रवीन्मुदा शम्भुर्वरं ब्रूहीति वाञ्छितम् ॥ ततः सिद्धः प्रहृष्टात्मा शङ्करं वाक्यमब्रवीत् ॥४२॥
एतदेव वरं मेद्य दर्शनं तव शङ्कर ॥ स्थित्वा क्षेत्रे तव विभो त्वत्सेवां कर्तुमुत्सहे ॥४३॥
एतदेव वरं चास्तु वरमन्यन्न कामये ॥ तथास्तु मत्प्रसादेन वसत्वत्र भवान् सदा ॥४४॥

त्वद्गणैः सह भद्रन्ते मत्क्षेत्रं परिपालयन् ॥ पूर्वद्वारि महाभाग तिष्ठ त्वं शाश्वतीः समाः ॥४५॥

तीर्थमेतन्महाभाग त्रैलोक्ये विश्रुतं भवेत् ॥ सिद्धकुण्डमिति ख्यातं सर्वसिद्धिप्रदं नृणाम् ॥४६॥

श्रावणे शुक्लपक्षे तु दशम्यां ये नरोत्तमाः ॥ त्वत्कृते तु महातीर्थे स्नात्वा तल्लिङ्गमर्चयेत् ॥४७॥

अष्टैश्वर्यादिसिद्धिं च लभते नात्र संशयः ॥ इत्युक्त्वा भगवान् शम्भुः पार्वत्या सह पाषदैः ॥४८॥

तत्रैवान्तर्दधे लिङ्गे सिद्धस्य पुरतो नृप ॥ एवं सिद्धो वरं लब्ध्वा उवास स्वाश्रमे शुभे ॥४९॥

प्राचीं दिशं रक्षमाणः क्षेत्रसीमां नृपोत्तम ॥ तस्मात् सिद्धेश्वराल्लिङ्गाद ाग्नेयां दिशि विद्यत े ॥५०॥

सिद्धकुण्डमिति ख्यातं सर्वसिद्धिप्रदायकम् ॥

---

## भूतनाथ

भूतनाथोपि सुचिरं दिव्यं वर्षसहस्रकम् ॥५१॥

विश्वकर्मेश्वरोपान्ते चचार सुमहत्तपः ॥ अङ्गुष्ठाग्रेण तिष्ठन् स मनसा निश्चलेन च ॥५२॥

निराहारश्चोर्ध्वबाहुः शिवं ध्यायन् हृदि स्वयम् ॥ एवं तपस्यतस्तस्य प्रत्यक्षत्वमगाद्धरः ॥५३॥

उवाच वचनं श्लक्ष्णं भूतनाथं पिनाकधृक् ॥ वरं वरय भूतेश यत्तेऽभिलषितं हृदि ॥५४॥

तद्दाम्यविलम्बेन यद्यपि स्यात् सुदुर्लभम् ॥

भूतनाथ उवाच ॥

दर्शनात्तव देवेश वरमन्यन्न विद्यते ॥५५॥

अत्रैव वस्तुमिच्छामि गोकर्णे त्वां समर्चयन् ॥ भूतनाथेरितं श्रुत्वा शङ्करः प्राह तुष्टधीः ॥५६॥

तथास्तु भूतनाथ त्वं भूतैः सह वसात्र वै ॥ नित्यं मां सेवयन् पुत्र रक्षन् मत्क्षेत्रमण्डलम् ॥५७॥

यथा कैलासशिखरे तथात्रैव वसाम्यहम् ॥ तस्मात्त्वं सर्वदाऽत्रैव वस सिद्धिं प्रयास्यसि ॥५८॥

इत्युक्त्वा भगवान् शम्भुर्भूतनाथं नृपोत्तम ॥ दत्वा वरमभीष्टं तु कैलासं स ययौ नृप ॥५९॥

गोकर्णं रक्षमाणास्ते तत्रैवासन् गणाधिपाः ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥६०॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे माणिभद्रसिद्धेश्वर भूतनाथमहिमानुवर्णनंनाम एकाशीतितमोऽध्यायः ॥८१॥

## ॥ विश्वकर्मेश्वर–गौतमेश्वर–इन्द्रेश्वर महिमानुवर्णनम् ॥

### विश्वकर्मेश्वर

शतानीक उवाच ॥

गोकर्णस्य च माहात्म्यं न तृप्तिः शृण्वतो मम ॥ भूयोपि श्रोतुमिच्छामि क्षेत्रमाहात्म्यमुत्तमम् ॥१॥

विश्वकर्मेशमाहात्म्यं वद मे रोमहर्षणे ॥ विश्वकर्मेश्वरं नाम कथं ह्यासीत् पुरानघ ॥२॥

तदुत्पत्तिं वदस्वाद्य सूत मे परिपृच्छतः ॥

सूत उवाच ॥

विश्वकर्मेश्वरं नाम लिङ्गं कामप्रदं नृणाम् ॥३॥

शृणुष्व नृपशार्दूल तदुत्पत्तिं वदामि ते ॥ पुरा मयासुरो नाम राक्षसानां च शिल्पकृत् ॥४॥

अतीवशिल्पकौशल्यं तपस्तप्त्वा च पद्मजम् ॥ लब्धवान् कुरुशार्दूल मयो राक्षसपुङ्गवः ॥५॥

मनसा चिन्तितं शिल्पं स्मरणात्तत्तथा भवेत् ॥ विश्वकर्मणः शिल्पन्तु तथा नास्ति महामते ॥६॥

चिन्तयित्वैकदा चित्ते विश्वकर्मा नृपोत्तम ॥ मयस्य शिल्पकौशल्यं मयि नास्ति तथाविधम् ॥७॥

तद्वच्छिल्पं कथं मे स्यादिति सञ्चिन्त्य चातुरः ॥ वाचस्पतिं ततोऽपृच्छत् स्वगुरुं भरतर्षभ ॥८॥

विश्वकर्मोवाच ॥

मयासुरस्य यच्छिल्पं तच्छिल्पं मयि नास्ति भो ॥ तदुपायं वदस्वाद्य किं कृत्वा तद्भवेन्मम ॥९॥

तच्छ्रुत्वा प्राह वागीशो विश्वकर्माणमादरात् ॥ विश्वकर्मन् महाभाग शृणूपायं वदामि ते ॥१०॥

भारते कर्मभूमौ तु क्षेत्रं गोकर्णनामकम् ॥ अस्ति शैवं महाबुद्धे याहि तच्चाद्य शीघ्रतः ॥११॥

तत्राश्रमपदं कृत्वा लिङ्गं संस्थाप्य शाम्भवम् ॥ तपसा शङ्करं तुष्ट्वा मुक्तो गौतमशापतः ॥१२॥

सम्प्राप्य वाञ्छितं शक्रः शच्या सह दिवं गतः ॥ तस्मात्त्वमपि गच्छाशु लप्स्यसे वाञ्छितं फलम् ॥१३॥

इति श्रुत्वा गुरोर्वाक्यं विश्वकर्मा ततो नृप ॥ गोकर्णक्षेत्रमासाद्य कोटितीर्थस्य चोत्तरे ॥१४॥

तत्राश्रमपदं कृत्वा लिङ्गं संस्थाप्य शाम्भवम् ॥ तपस्तेपे निराहारो वर्षाणामयुतं नृप ॥१५॥

ततस्तुतोष भगवान् तपसा तस्य शङ्करः ॥ आविर्बभूव तल्लिङ्गात् पार्वत्या च समन्वितः ॥१६॥

उवाच विश्वकर्माणं वचनं मधुरं तदा ॥ विश्वकर्मन् महाप्राज्ञ तपसा तव तोषितः ॥१७॥

वरं वरय भद्रन्ते तद्ददाम्यविलम्बितम् ॥ इति शर्वेरितं वाक्यं श्रुत्वा चोन्मील्य लोचने ॥१८॥

विश्वकर्मा समुत्थाय स्वासनात्तं ननाम च ॥ स्तुत्वा च विविधैः स्तोत्रैः शङ्करं वाक्यमब्रवीत् ॥१९॥

विश्वकर्मोवाच ॥

वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ शिल्पशास्त्रे मया तुल्यो न भवेत् कोपि शङ्कर ॥२०॥
यथा मनसि चेच्छामि शिल्पं भाव्यं तथेश्वर ॥ लिङ्गमेतन्महाभाग सर्वकामप्रदं भवेत् ॥२१॥
विश्वकर्मेरितं श्रुत्वा वचनं शङ्करस्तदा ॥ मेघगम्भीरया वाचा पुनः प्रोवाच तं नृप ॥२२॥
विश्वकर्मन् तथा भूयान्मनसा यद्यदिच्छसि ॥ शिल्पं यथा भाव्यमिति तथा भवतु नान्यथा ॥२३॥
त्वया कृतमिदं लिङ्गं सर्वकामप्रदं भवेत् ॥ त्वन्नाम्ना ख्यातिमायातु सर्वलोकेषु पुत्रक ॥२४॥
राधेऽक्षय्यत्रतीयायामत्रागत्य नरोत्तमाः ॥ ये पूजयन्ति लिङ्गेस्मिन् भक्त्या मां त्वत्कृते शुभे ॥२५॥
तेषामभीप्सितं कामान् ददाम्येव न संशयः ॥ इति दत्वा वरं तस्मै पार्वत्या सह शङ्करः ॥२६॥
तत्रैवान्तर्दधे लिङ्गे शङ्करो भक्तवत्सलः ॥ ततः स्वर्लोकमगमद्विश्वकर्माऽतिहृष्टवान् ॥२७॥
लब्ध्वा मनोरथान् सर्वान् यथापूर्वमतिष्ठत ॥

---

## गौतमेश्वरः,गौतमतीर्थं च

शतानीक उवाच ॥

सूत मे सुरनाथस्य चरितं ब्रूहि साम्प्रतम् ॥२८॥
गौतमेन पुरा शप्तो किमर्थं च दिवस्पतिः ॥ इन्द्रः किमकरोत्तस्य गौतमस्य तपोनिधेः ॥२९॥
कथं गौतमशापाद्धि विमुक्तः पाकशासनः ॥ गोकर्णे शाम्भवक्षेत्रे सूत मे कृपया वद ॥३०॥

सूत उवाच ॥

इन्द्रेण यत्कृतं पूर्वं तद्वक्ष्यामि शृणुष्व भो ॥ पुरा पुरन्दरः श्रीमान् कदाचिद्गौतमाश्रमम् ॥३१॥
जगाम तत्र चापश्यद्गौतमस्य प्रियां शुभाम् ॥ अहल्यां रूपसम्पन्नां सर्वावयवसुन्दरीम् ॥३२॥
तस्यां प्रविष्टभावोऽसौ चिन्तयामास चेतसा ॥ कथमेनां रमयिष्ये इति मत्वाश्रमे स्थितः ॥३३॥
ततो मध्याह्नवेलायां गौतमो वनमाविशत् ॥ फलान्याहर्तुकामोऽसौ तस्मिन् काले दिवस्पतिः ॥३४॥
गौतमस्य वपुर्धृत्वा अहल्यान्तिकमाययौ ॥ तामाह वासवो राजन् रतिर्मे सम्प्रदीयताम् ॥३५॥
अहल्या तद्वचः श्रुत्वा पतिरूपं शचीपतिम् ॥ इदमाह तदा साध्वी विपरीतं प्रभाषसे ॥३६॥
सर्वधर्मार्थतत्वज्ञ दिवा त्वं रतिमिच्छसि ॥ गर्हितां हि द्विजातीनां निषिद्धं पुण्यकर्मिणाम् ॥३७॥
अस्वर्ग्यमयशस्यं च व्यवायं दिवसे पते ॥ किं काङ्क्षसे महास्वामिन्नुभयोर्नरकप्रदम् ॥३८॥

इन्द्र उवाच ॥

किमादर्शेन चान्धस्य किं गृहैर्भैक्षजीविनः ॥ किं पुस्तकेन मूढस्य अस्त्रीकस्य धनेन किम् ॥३९॥
कामातुरस्य मे तन्वि सर्वं व्यर्थं त्वयोदितम् ॥ अहल्या तद्वचः श्रुत्वा पतिवाक्यानुसारिणी ॥४०॥
अङ्गीचकार सहसा तद्वाक्यं विस्मयान्विता ॥ ततः शचीपतिस्तां वै रेमे राजन् यथासुखम् ॥४१॥
ततो जगाम देवेशो यथाकामं नृपोत्तम ॥ अहल्या लज्जिता खिन्ना उटजे ह्यवसत्तदा ॥४२॥
गौतमोपि वनाद्राजन् फलान्यादाय चागतः ॥ स्वाश्रमं मुनिशार्दूलो अपश्यत् स्वाश्रमे प्रियाम्
॥४३॥
अहल्यां खिन्नवदनां किमेतदिति चिन्तयन् ॥ वासवेन कृतं कर्म ज्ञात्वा क्रोधवशङ्गतः ॥४४॥
उवाच पत्नीमाहूय त्वत्कृतं कर्मचोच्यताम् ॥ अहल्या लज्जिता वक्तुं न शशाक प्रणम्य तम्
॥४५॥
उवाच वचनं सूक्ष्मं बद्धाञ्जलिपुटा तदा ॥ क्षमस्व मेऽपराधं त्वमज्ञानात् कर्मगर्हितम् ॥४६॥
मया कृतं मुनिश्रेष्ठ सर्वधर्मविरोधि यत् ॥ तच्छ्रुत्वा प्राह तां राजन् गौतमो वचनं प्रियम् ॥४७॥
पापिष्ठे किं कृतं कर्म निन्दितं स्त्रीजनस्य वै ॥ त्वयाद्य यत्कृतं कर्म तद्भोक्तव्यमितः परम् ॥४८॥
षष्टियोजनविस्तीर्णा शतयोजनमायता ॥ शिला भूत्वा वसाद्यैव दशसाहस्रकं समाः ॥४९॥
अस्मिन् वने वरारोहे वस रामाऽऽगमावधि ॥ यस्मादज्ञानतः कर्म गर्हितं च त्वया कृतम् ॥५०॥
तस्मान्मच्छापतो मुक्ती रामाङ्घ्रिस्पर्शनाद्भवेत् ॥ इति शप्त्वा तदा भार्यां पुरुहूतं ततोऽशपत्
॥५१॥
यस्मात् त्वमीदृशं कर्म गर्हितं कृतवान् हरे ॥ सर्वाङ्गे तव पापिष्ठं भगचिह्नं भवेद्ध्रुवम् ॥५२॥
इति शप्त्वा गौतमोपि अहल्याञ्च पुरन्दरम् ॥ ततः स निर्ययौ राजन् स्वाश्रमान्मुनिसत्तमः ॥५३॥
तीर्थयात्राप्रसङ्गेन बदर्याश्रमपूर्वकम् ॥ तत्र तत्र पवित्राणि आश्रमाणि महात्मनाम् ॥५४॥
स्नात्वा तत्रत्यतीर्थेषु तत्रत्यं लिङ्गमर्चयन् ॥ भुवः प्रदक्षिणं कुर्वन् क्रमात् गोकर्णमागमत् ॥५५॥
तत्रासङ्ख्यानि तीर्थानि दृष्ट्वा लिङ्गानि सर्वशः ॥ कोटितीर्थं समुद्रञ्च सार्वभौमं महाबलम् ॥५६॥
ताम्रपर्णीं तथा राजन् सन्तोषं परमं ययौ ॥ सागरेशात् पूर्वदिशि रुद्रयोन्यास्तु दक्षिणे ॥५७॥
तत्राश्रमपदं कृत्वा लिङ्गं संस्थाप्य शाम्भवम् ॥ नित्यं स्नात्वा कोटितीर्थे लिङ्गं सम्पूजयन्नृप
॥५८॥
तपश्चचार सुचिरं ब्रह्मध्यानपरायणः ॥ एवं बहुतिथे काले तस्य तुष्टो महेश्वरः ॥५९॥
गत्वा समीपं ब्रह्मर्षिं गौतमं प्राह शङ्करः ॥

रुद्र उवाच ॥

तपसा तव तुष्टोस्मि वरं वरय काङ्क्षितम् ॥६०॥

तद्दाम्यविलम्बेन यद्यपि स्यात् सुदुर्लभम् ॥ एतदेव वरं मेद्य दर्शनं तव शङ्कर ॥६१॥

दर्शनादेव ते स्वामिन् कृतार्थोस्मि न संशयः ॥ लिङ्गमेतत् सुरश्रेष्ठ पूजयन्ति नरोत्तमाः ॥६२॥

तेषामभीप्सिता सिद्धिर्भवेच्च त्वदनुग्रहात् ॥

शङ्कर उवाच ॥

सिद्धोसि त्वं पूर्वमेव मत्प्रसादाद्विशेषतः ॥६३॥

लिङ्गमेतन्मुनिवर त्वन्नाम्ना ख्यातिमेष्यति ॥ पूजयिष्यति यो मर्त्यो लिङ्गमेतन्मुनीश्वर ॥६४॥

यं यं कामयते कामं तं तमाप्नोति मानवः ॥ इत्युक्त्वा भगवान् शम्भुस्तस्मिन् लिङ्गे व्यलीयत ॥६५॥

ततः स गौतममुनिः पूजयित्वा महाबलम् ॥ यथाकामं जगामाशु तीर्थयात्राकृतोद्यमः ॥६६॥

मासि भाद्रपदे शुक्ले नवम्यां ये नरोत्तमाः ॥ गौतमेशं पूजयन्ति यथाविधि नृपोत्तम ॥६७॥

तेषामभीष्टसिद्धिः स्यान्नात्र कार्या विचारणा ॥

---

## इन्द्रेश्वरः इन्द्रतिर्थं च

शतानीक उवाच ॥

शप्तः शक्रो गौतमेन कृतवान् किं द्विजोत्तम ॥६८॥

कथं मुक्तिमवापासौ गोकर्णे तद्वदस्व मे ॥

सूत उवाच ॥

यदा शप्तो गौतमेन इन्द्रः खिन्नस्तदा क्षणात् ॥६९॥

अङ्गे भगस्वरूपं तु दृष्ट्वा लज्जान्वितस्तदा ॥ स्वर्गं न प्राप्तवान् भूयो ययौ मेरोर्गुहान्तरम् ॥७०॥

ज्ञात्वा तदा मुनेः शापं शक्रस्याप्तं तदा नृप ॥ एतत्सर्वं च देवर्षिर्नारदोऽगात् सुरालयम् ॥७१॥

इन्द्राण्यै कथयामास गत्वा तच्छापकारणम् ॥ शक्रस्य नृपशार्दूल मुनेः शापञ्च कुत्सितम् ॥७२॥

कथयित्वा च सद्यस्तु ययौ स्वैरगतिर्मुनिः ॥ श्रुत्वा पत्युस्तदा शापमिन्द्राणी नारदान्मुनेः ॥७३॥

दुःखेन महता युक्ता गौतमान्तिकमाययौ ॥ गौतमं मुनिशार्दूलं नमस्कृत्वा प्रसाद्य च ॥७४॥

मद्भर्त्रा च कृतं कर्म तत्क्षन्तव्यं महामुने ॥ अनाथां कृपणां दीनां पाहि मां करुणाकर ॥७५॥

इति शच्योदितं श्रुत्वा गौतमः प्राह तां मुदा ॥

गौतम उवाच ॥

अन्यथा न भवेच्छापो देवि मे कथयाम्यहम् ॥७६॥
तथापि तव वाक्येन शृणु वक्ष्यामि ते हितम् ॥ वल्लभस्य तवाङ्गे वै यावन्तो योनयोऽबले ॥७७॥
ताः सर्वा नेत्रतां यान्तु लोकानां पश्यतां शुभे ॥ परस्त्रीसङ्गजनितदोषस्यास्य निवृत्तये ॥७८॥
गोकर्णं क्षेत्रप्रवरं गत्वा शम्भुं प्रसाद्य च ॥ तपसा महता देवि पतिस्तु तव शोभने ॥७९॥
पापाद्विमुच्यते देवि नात्र कार्या विचारणा ॥ गौतमेनेरितं श्रुत्वा पौलोमी मुदितानना ॥८०॥
नमस्कृत्वा मुनिं देवी अनुज्ञाप्य ययौ तदा ॥ मेरोर्गुहां नृपश्रेष्ठ पत्ये सर्वं न्यवेदयत् ॥८१॥
गौतमोक्तं नृपश्रेष्ठ तत्र दृष्ट्वा तु वल्लभम् ॥ ततः शच्योदितं श्रुत्वा वासवस्त्वरयान्वितः ॥८२॥
गोकर्णक्षेत्रमासाद्य श्लेष्मातकवने शुभे ॥ आग्नेय्यां रुद्रयोन्यास्तु कुबेरेश्वरसन्निधौ ॥८३॥
लिङ्गं संस्थाप्य यत्नेन तीर्थं कृत्वा सुनिर्मलम् ॥ तपश्चचार सुचिरं परमेण समाधिना ॥८४॥
स्नानं त्रिषवणं तत्र कुर्वन् भारतसत्तम ॥ तल्लिङ्गं पूजयन्नित्यं ध्यायन् ब्रह्म सनातनम् ॥८५॥
बद्धपद्मासनो मौनी नासाग्रन्यस्तलोचनः ॥ निराहारो जितक्रोधो ब्रह्मचारी जितेन्द्रियः ॥८६॥
एवं तपस्यतस्तस्य बहुकालोऽत्यगान्नृप ॥ ततस्तु तपसा तुष्टः शङ्करो भक्तवत्सलः ॥८७॥
तस्य प्रत्यक्षमगमद्वासवस्य तदा नृप ॥ तं दृष्ट्वा पुरतः शम्भुमभ्युत्थायासनात्तदा ॥८८॥
तुष्टाव वाग्भिरिष्टाभिः प्रणम्य च पुनः पुनः ॥ सहस्राक्षोऽथ राजेन्द्र शङ्करं भक्तवत्सलम् ॥८९॥

इन्द्र उवाच ॥

नमस्ते देव देवेश नमस्ते भक्तवत्सल ॥ नमस्ते पार्वतीकान्त त्राहि मां दुःखसागरात् ॥९०॥
इति स्तुतोऽथ भगवान् वासवेन महेश्वरः ॥ तं प्राह वासवं प्रीत्या शङ्करो भरतर्षभ ॥९१॥
वरं वरय भद्रन्ते यत्तेऽभिलषितं हृदि ॥ तत्तेहं सम्प्रदास्यामि यद्यपि स्यात् सुदुर्लभम् ॥९२॥

इन्द्र उवाच ॥

वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ अहल्यासङ्गजनितं दोषं नाशय मे हर ॥९३॥
मया कृतमिदं तीर्थं लिङ्गञ्च सुरसत्तम ॥ सर्वकामप्रदं भूयात् प्रसादात् तव शङ्कर ॥९४॥
देहि मे यदि तुष्टोसि वरावेतौ महेश्वर ॥ इन्द्रस्य वचनं श्रुत्वा शङ्करः प्राह तं पुनः ॥९५॥

शङ्कर उवाच ॥

तपसा तव भक्त्या च तुष्टोस्मि नितरां हरे ॥ तस्मात् त्वया कृतात् पापान्मुक्तस्त्वं मत्प्रसादतः ॥९६॥

त्वया कृतमिदं तीर्थं लिङ्गञ्च सुरसत्तम ॥ त्वन्नाम्ना ख्यातिमायातु सर्वपापहरं भवेत् ॥९७॥
ऊर्जशुक्लदशम्यां तु अत्रागत्य सुरेश्वर ॥ स्नात्वा तीर्थेऽत्र देवेश त्वल्लिङ्गं पूजयन्ति वै ॥९८॥
अगम्यागमनं दोषं परस्त्रीसङ्गजं तथा ॥ मत्प्रसादाद्विनश्येत तेषामिष्टं भवेद्ध्रुवम् ॥९९॥
इत्युक्त्वा भगवान् शम्भुस्तस्मिन् लिङ्गे व्यलीयत ॥ ततः शक्रः प्रसन्नात्मा पापान्मुक्तस्तदा नृप ॥१००॥
स्वर्गलोकं ययौ भूयः शच्या सह पुरन्दरः ॥ गोकर्णान्नृपशार्दूल मुदा परमया युतः ॥१०१॥
पूर्ववत् पालयन्नास्ते त्रैलोक्यं वासवस्तदा ॥

सूत उवाच ॥

इन्द्रेश्वरस्य माहात्म्यं वर्णितं तव भूपते ॥१०२॥
सर्वपापहरं नृणां श्रवणात् कीर्तनादपि ॥ असङ्ख्येयानि तीर्थानि सन्ति तत्र नृपोत्तम ॥१०३॥
यत्पृष्टं भवता राजन् तत्सर्वं कथितं मया ॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे विश्वकर्मेश्वर गौतमेश्वर इन्द्रेश्वर महिमानुवर्णनं नाम द्व्यशीतितमोऽध्यायः ॥८२॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ८३ ॥ NEXT>> श्लोक संख्या–६१

॥ तृणाग्न्यादि आश्रमाणि ॥

|| £dPdde›¦d - I¶¯Sd§d - I¶§dd£d - ±dT±dd - I¶±dTf - ®d±d - ¦d®d›dUdPdd - ªd›d,¡d«dQe›¦d,¸¶£d,§d¬d±£Sd,AeÎd,
Ae›dT±d,ªddTÙd¡d,¦ddTQd¦dd - e®dÛdd®d±d,£d©dè,eŸdÎd±d¦d,›d¥d®d,A§±dT±d,e±dÕ,«dè£d,±dd¥Sd,Sd´d,Td´d±d,
eI¶êdT,›dãI¶,eI¶§dè°d,e®dØd¥dTdPdd - ®dd¬«dfI¶Z - A¦Sd°dd«de§d F°dfPdd,Q®d£dd¦dd,Td¡d°dfPdd,«d¦df¦dd -
Aœd¦dde¯d¦df£dfT±¤dde¦d Ÿd AdÚd«d§dQde¦d £df¤dde¦d Ÿd ||

---

तृणाग्नि

शतानीक उवाच ॥

सूत सर्वार्थतत्वज्ञ व्यासशिष्य महामते ॥ गोकर्णक्षेत्रमाहात्म्यं श्रुतं तव मुखान्मुने ॥१॥

न तृप्तिमधिगच्छामि भूयः कथय मेऽनघ ॥ अनुक्तानीह तीर्थानि देवसिद्धर्षिरक्षसाम् ॥२॥
लिङ्गान्याश्रमवर्याणि दिव्यानि मुनिसत्तम ॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि यत्पृष्टं भवतानघ ॥३॥

अनुक्तान्याश्रमाणीह तीर्थं लिङ्गानि कृत्स्नशः ॥ देवर्षीणां च राजेन्द्र सावधानमनाः शृणु ॥४॥

तृणाग्नेराश्रमं दिव्यं देवर्षिगणसेवितम् ॥ पवित्रं दुरितघ्नं वै शिवं सिद्धिकरं नृणाम् ॥५॥

तृणाग्निरिति विख्यातः काश्यपस्यात्मसम्भवः ॥ स तपस्वी तपस्तेपे शतशृङ्गस्य मूर्धनि ॥६॥

कृत्वाश्रमपदं पुण्यं वर्षाणामयुतं नृप ॥ ततस्तुतोष भगवान् कपर्दी नीललोहितः ॥७॥

आविर्बभूव देवेशः पुरतस्तस्य शङ्करः ॥ वरं ब्रूहीति चोवाच सादरं ऋषिसत्तमम् ॥८॥

इत्युक्ते शम्भुना राजन् तृणाग्निः शङ्करं तदा ॥ प्रणम्य दण्डवद्भूमौ स्तुत्वा प्राह कृताञ्जलिः ॥९॥

त्वत्पादकमले भक्तिममरत्वं तथा स्थिरम् ॥ देहि मे यदि तुष्टोसि देवदेव नमोस्तु ते ॥१०॥

ततस्तु प्राह भगवान् तथास्त्विति पिनाकधृक् ॥ लब्ध्वा वरं पुनश्चेदं प्रणिपत्याब्रवीद्धरम् ॥११॥

मया कृतमिदं तीर्थमाश्रमं च महेश्वर ॥ सर्वपापहरं चास्तु त्वत्प्रसादाच्च कामदम् ॥१२॥

तं तथास्त्विति राजेन्द्र शङ्करोन्तरधीयत ॥ तदाश्रमं पुण्यतमं देवर्षिगणसेवितम् ॥१३॥

शतशृङ्गस्य राजेन्द्र तटे दक्षिणपश्चिमे ॥ उमावनस्य सविधे शरपाते स्थितं महत् ॥१४॥

---

## कश्यपाश्रमं

तस्मात्पूर्वोत्तरे राजन् काश्यपाश्रममुत्तमम् ॥ आस्ते पवित्रं पापघ्नं देवगन्धर्वसेवितम् ॥१५॥

तत्र सिद्धिमगाद्राजन् काश्यपो भगवानृषिः ॥ तस्य तीर्थे नरः स्नात्वा सर्वान् कामानवाप्नुयात्
॥१६॥

ये पश्यन्ति नरा राजन् काश्यपस्याश्रमं शुभम् ॥ ते सर्वपापनिर्मुक्ताः शिवलोकं व्रजन्ति वै
॥१७॥

---

## कपोताश्रमं

तस्मादुत्तरतो राजन् शरपातोपरिस्थितम् ॥ महर्षेराश्रमं पुण्यं कपोतस्याघनाशनम् ॥१८॥

तद्दृष्ट्वाऽऽजन्मचरितं पापं नश्यत्यसंशयम् ॥ अतिरात्रस्य यज्ञस्य फलञ्चाविकलं भवेत् ॥१९॥

---

## सुरसाश्रमं

तस्माद्वायव्यदिग्भागे सुरसाश्रममुत्तमम् ॥ सुरसा नाम नागानां माता परमशोभना ॥२०॥

तत्र तप्त्वा तपो घोरं शिवमुद्दिश्य सा चिरम् ॥ तीर्थं कृत्वा यथान्यायं सिद्धिं प्राप्ता महेश्वरात् ॥२१ ॥

तत्तीर्थस्नानमात्रेण नृणां भवति वाञ्छितम् ॥

---

## केसर्याश्रमं

तस्माद्वायव्यदिक्संस्थमाश्रमं श्रमनाशनम् ॥२२॥

केसरेर्वानरेन्द्रस्य हनुमान्यत्र जज्ञिवान् ॥ तदाश्रमं पुण्यतमं वानरर्क्षसमन्वितम् ॥२३॥

---

## विश्वेदेवाश्रमम्

विश्वेदेवास्तपस्तप्त्वा यत्र सिद्धिमुपागताः ॥ तं दृष्ट्वा नाप्नुयाद्दुःखं जन्मजन्मनि कौरव ॥२४॥

पौण्डरीकस्य यज्ञस्य फलं चाविकलं भवेत् ॥

---

## वस्वाश्रमं

तस्माद्वायव्यदिग्भागे वसूनामाश्रमं शुभम् ॥२५॥

वसोर्धारमिति ख्यातं स्थितं पुण्यतमं नृप ॥ वसवस्तत्र संसिद्धाः प्रसादाच्छूलपाणिनः ॥२६॥

तत्तीर्थस्नानमात्रेण स साम्राज्यमवाप्नुयात् ॥

---

## नवग्रहाश्रमं

उमावनादर्धक्रोशे प्राच्यां दिशि नृपोत्तम ॥२७॥

नवग्रहाश्रमं पुण्यं ग्रहाणां सिद्धिदं शुभम् ॥ तीर्थञ्च तेषां तत्रास्ते ग्रहाणां कुरुपुङ्गव ॥२८॥

तत्तीर्थस्नानमात्रेण ग्रहपीडा विनश्यति ॥

---

## भृगु,जमदग्नि,क्रतु,पुलस्त्य,अत्रि,भौम,अंगिरस,भारद्वाज,नारदानां आश्रमाणि

तत्तीर्थात् पूर्वदिग्भागे शरपाते नृपोत्तम ॥२९॥

सर्वपापक्षयकरं भृगोराश्रममुत्तमम् ॥ जमदग्नेः क्रतोश्चैव पुलस्त्यस्याश्रमं तथा ॥३०॥

अत्रेश्चैव तथा भौमं अङ्गिरस्याश्रमं तथा ॥ भारद्वाजस्य देवर्षेर्नारदस्याश्रमं तथा ॥३१॥

एतेषामाश्रमं पुण्यं तीर्थञ्चैव यथाक्रमम् ॥ दर्शनादेव पापानि ज्ञानाज्ञानकृतानि वै ॥३२॥

नश्यन्त्येव न सन्देहो नृणां भरतसत्तम ॥

---

विश्वावसु,तुंबुरु,चित्रसेन,गंधर्व,अप्सरस,सिद्ध,मरुत्,साध्य,यक्ष,राक्षस,
किन्नर,गुह्यक,किंपुरुष,विद्याधराणामाश्रमाणि

तस्मादीशान्यदिग्भागे शरपाते स्थितानि वै ॥३३॥
विश्वावसोस्तुम्बरोश्च चित्रसेनस्य पार्थिव ॥ गन्धर्वाणां तथान्येषां स्त्रीणामप्सरसां तथा ॥३४॥
सिद्धानां मरुताञ्चैव साध्यानां यक्षराक्षसाम् ॥ किन्नराणाञ्च राजेन्द्र गुह्यकानां पृथक् पृथक् ॥३५॥
तथा किम्पुरुषाणाञ्चाश्रमाणि बहून्यपि ॥ विद्याधराणां राजेन्द्र तीर्थलिङ्गानि भागशः ॥३६॥
सर्वाघौघहराण्येव दर्शनाद्भरतर्षभ ॥

---

वाल्मीक्याश्रमं

तस्मात्प्राच्यां स्थितं राजन् वाल्मीकेराश्रमं शुभम् ॥३७॥
सर्वाघौघहरं पुण्यं देवर्षिगणसेवितम् ॥ नानावृक्षसमाकीर्णं नानागुल्मलताकुलम् ॥३८॥
आस्ते कामाघनाशिन्यास्तीरे भरतसत्तम ॥ तत्राश्रमपदं कृत्वा तथा तीर्थं महत्तरम् ॥३९॥
लिङ्गं संस्थाप्य विधिवद्वल्मीकिर्मुनिपुङ्गवः ॥ तपस्तेपे निराहारो जितक्रोधो जितेन्द्रियः ॥४०॥
मनसा निर्मलेनैव ध्यायन् ब्रह्म सदा नृप ॥ एवं तपस्यतस्तस्य व्यतीयुर्नियुतं समाः ॥४१॥
ततस्तुतोष भगवान् शङ्करो भक्तवत्सलः ॥ प्रत्यक्षमगमत् तस्य वाल्मीकेर्भरतर्षभ ॥४२॥
प्राह तं भगवान् शम्भुः प्रहृष्टेनान्तरात्मना ॥ वरं वरय भद्रन्ते यत्तेऽभिलषितं हृदि ॥४३॥
तपसा तव तुष्टोस्मि तद्ददाम्यविलम्बितम् ॥ इति शर्वेरितं वाक्यं श्रुत्वा मुनिवरस्तदा ॥४४॥
प्रणम्य दण्डवद्भूमौ भक्त्या परमया युतः ॥ स्तुत्वा च विविधैः स्तोत्रैर्बद्धाञ्जलिपुटस्तदा ॥४५॥
शङ्करं प्राह तुष्टात्मा वाल्मीकिर्मुनिपुङ्गवः ॥

वाल्मीकिरुवाच ॥

एतदेव वरं मेद्य दर्शनं तव शङ्कर ॥४६॥
सिद्धिमिच्छामि देवेश परमां त्वत्प्रसादतः ॥ मया कृतमिदं तीर्थं लिङ्गञ्चैव महेश्वर ॥४७॥
त्रैलोक्ये श्रेष्ठतामेतु दर्शानात् सिद्धिदं नृणाम् ॥ यदि तुष्टोसि देवेश वरमेतद्ददातु मे ॥४८॥

शङ्कर उवाच ॥

त्वया कृतमिदं तीर्थं लिङ्गञ्च मुनिसत्तम ॥ त्रैलोक्योत्तमतामेतु मत्प्रसादान्न संशयः ॥४९॥
चैत्रमासे शुक्लपक्षे पञ्चम्यां ये नरोत्तमाः ॥ अत्रागत्य विधानेन स्नात्वा तीर्थवरे तव ॥५०॥
त्वया कृतमिदं लिङ्गं पूजयन्ति विधानतः ॥ तेषामभीष्टसिद्धिः स्यान्मत्प्रसादान्मुनीश्वर ॥५१॥

तथा सिद्धिर्भवतु ते इत्युक्त्वान्तरधीयत ॥ शङ्करो नृपशार्दूल वाल्मीकिश्च ततः परम् ॥५२॥
लब्ध्वा वरानभिमतान् ययौ स्वैरगतिर्मुनिः ॥

---

अन्येषामपि ऋषीणां,देवतानां,राजर्षीणां,मुनीनां च आश्रमाणि

तथान्ये नृपशार्दूल ऋषयो देवता गणाः ॥५३॥
नानाराजर्षयश्चैव सिद्धिं प्राप्ता पुरानघ ॥ आश्रमाणि च सर्वेषां मुनीनां भावितात्मनाम् ॥५४॥
अन्येषाञ्चैव देवानां तीर्थलिङ्गान्यनेकशः ॥ असङ्ख्यातानि राजेन्द्र सन्ति तत्र महागिरौ ॥५५॥
आक्रीडाशैलमारभ्य शतशृङ्गतटे शुभे ॥ दक्षिणे कुरुशार्दूल सन्ति तत्र पृथक् पृथक् ॥५६॥

---

अघनाशिनीतीरस्थाश्रमपदानि तीर्थानि च

कामाघनाशिनी यत्र नदी पुण्यजला शुभा ॥
तन्मध्यस्थिततीर्थानां फलं वक्तुं न शक्यते ॥५७॥
ये महत्वमभीप्सन्ति ते तत्र निवसन्ति हि ॥ युगं पश्चिममासाद्य तेऽदृश्या विचरन्ति हि ॥५८॥
तपःस्वाध्यायनिरता यजन्तो वृषभध्वजम् ॥ न तेषां नामधेयानि वक्तुं शक्तः कुरूद्वह ॥५९॥

---

तस्माच्छ्रेष्ठतमं लोके गोकर्णं सुरपूजितम् ॥ तस्मिन् क्षेत्रे नृपश्रेष्ठ मुक्तिवासा वसन्ति वै ॥६०॥
दानं व्रतोपवासञ्च तपः स्वाध्यायमेव च ॥ तत्र कुर्वन्ति ये राजन् लभन्ते ते समाहिताः ॥६१॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे तृणाग्न्यादि आश्रमवर्णनंनाम त्र्यशीतितमोऽध्यायः ॥८३॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ८४ ॥  NEXT>>  श्लोक संख्या–४९

॥ व्याधाश्रम महिमानुवर्णनम् ॥

॥ व्याधाश्रमम् ॥

शतानीक उवाच ॥

श्रुत्वेदं महदाश्चर्यं क्षेत्रमाहात्म्यमुत्तमम् ॥ तृप्तिर्नाभून्महाबुद्धे अमृतस्येव पीयतः ॥१॥
भूयः कथय तस्मान्मे क्षेत्रस्यास्य प्रभावताम् ॥ रहस्यञ्च प्रकाशञ्च श्रोतुमिच्छा प्रवर्तते ॥२॥
यानि तीर्थान्यनुक्तानि आश्रमाणि महामते ॥ सरांसि सरितश्चैव वनान्युपवनानि च ॥३॥

यत्पृष्टं यच्च नापृष्टं सर्वं मे वक्तुमर्हसि ॥

सूत उवाच ॥

श्रूयतामभिधास्यामि अनुक्तानि मयाधुना ॥४॥

तीर्थानि कौरवश्रेष्ठ आश्रमाणि महान्ति च ॥ पुरा व्याधस्तु दुष्टात्मा सह्याद्रिशिखरे नृप ॥५॥

दुर्मुखो नाम तत्रास्ते निर्वाणः पापजीवनः ॥ पशून् हन्ति द्विजांश्चैव तथैव मृगपक्षिणः ॥६॥

मांसगृध्रः स दुष्टात्मा सर्वप्राणिविहिंसकः ॥ सकुटुम्बा हतास्तेन ब्राह्मणा बहवो नृप ॥७॥

तथा गावः सवत्साश्च गर्भिण्यश्चैव कौरव ॥ सुखार्थं हन्ति सर्वाणि भूतानि स्वेच्छया नृप ॥८॥

तद्भीत्या सर्वभूतानि तं देशं नोपचक्रमुः ॥ एवं विचरतस्तस्य पापिष्ठस्य दुरात्मनः ॥९॥

कालोऽत्यगान्महाराज सह्यदुर्गनिवासिनः ॥ ततोऽभ्यगात् कौशिकाख्यस्तीर्थसेवी द्विजोत्तमः ॥१०॥

गोकर्णस्थेषु तीर्थेषु स्नात्वाऽभ्यर्च्य महाबलम् ॥ कमण्डलौ निधायाथ सर्वतीर्थानि कौशिकः ॥११॥

ततोऽभ्यगात् सह्यगिरिं यत्रास्ते निर्घृणः खलः ॥ तं दृष्ट्वाभ्यद्रवत् पापो निहन्तुं ब्राह्मणं नृप ॥१२॥

गृहीत्वा समलं खड्गं चर्म चापि कुरूद्वह ॥ तिष्ठ तिष्ठेति निर्भर्त्सन् विधुन्वन् खड्गचर्मणी ॥१३॥

तमापतन्तं शबरं समालोक्यातिविह्वलः ॥ कौशिकोऽथ भयाविष्टो गृहीत्वाऽथ कमण्डलुम् ॥१४॥

तस्योपरि स चिक्षेप भ्रामयित्वा द्विजोत्तमः ॥ तत्तस्य मस्तकं प्राप्य व्यशीर्यत सहस्रधा ॥१५॥

तस्य पापैः समं राजन् तदद्भुतमिवाभवत् ॥ स्पृष्टमात्रेऽम्भसा तस्य तीर्थानां कुरुपुङ्गव ॥१६॥

पापहानिरभूत् सद्यो लुब्धकस्य दुरात्मनः ॥ तीर्थोदकेन संसिक्तो मन्त्रपूतेन पापकृत् ॥१७॥

दयावानभवत् सद्यस्त्यक्त्वा स्वाभाविकीं मतिम् ॥ धिग्धिगित्यब्रवीद्राजन् विनिन्द्यात्मानमात्मना ॥१८॥

निरस्य चर्म खड्गञ्च प्रतिजज्ञे तदा नृप ॥ अद्यप्रभृति भूतानां मत्तः स्वस्ति भविष्यति ॥१९॥

दास्याम्यभयदानं च सर्वेषां प्राणिनामहम् ॥ उत्थाय प्राञ्जलिर्भूत्वा इदं वचनमब्रवीत् ॥२०॥

पापोहं पापकर्माहं मामुद्धर नमोस्तु ते ॥ इति तद्वचनं श्रुत्वा भयार्तो ब्राह्मणोत्तमः ॥२१॥

उत्थाय किञ्चिदाश्वास्य तच्चेष्टामवलोकयन् ॥ उवाच श्लक्ष्णया वाचा लुब्धकं कौशिकस्तदा ॥२२॥

स्वागतं ते महाप्राज्ञ किमिदं तव चेष्टितम् ॥ तच्छ्रुत्वा लुब्धकः सोऽथ प्रणिपत्येदमब्रवीत् ॥२३॥

नमोस्तु ते विप्रवर प्रसादं कुरु हे विभो ॥ पापिष्ठोऽहं दुरात्माऽहं निर्घृणः शबराधमः ॥२४॥

मया हता बहुविधा भूतसङ्घा द्विजोत्तम ॥ त्वां दृष्ट्वा विप्रशार्दूल निहन्तुं चागतोऽस्म्यहम् ॥२५॥

भयात्त्वं क्षिप्तवान् कुम्भं तीर्थयुक्तं ममोपरि ॥ तदम्भःप्रोक्षणाद् ब्रह्मन् पापहानिरभून्मम ॥२६॥
मन्मतिर्विमला जाता वैराग्यं समजायत ॥ अद्यप्रभृति विप्रेन्द्र न द्रोग्धा प्राणिनामहम् ॥२७॥
नाश्नामि विप्रशार्दूल न खादामि पिबाम्यहम् ॥ तव सन्दर्शनाद्विप्र विमलाभून्मतिर्मम ॥२८॥
तपश्चर्तुमिहेच्छामि उपदेशात् तव प्रभो ॥ मन्त्रोपदेशदानेन मामुद्धर महामते ॥२९॥
कृपालवो भविष्यन्ति त्वद्विधा द्विजसत्तम ॥ इति तद्वचनं श्रुत्वा कौशिको ब्राह्मणोऽब्रवीत् ॥३०॥
यद्येवं निश्चितं वीर त्वयाद्य व्याधसत्तम ॥ व्रतेनानेन संयुक्तो गोकर्णं गन्तुमर्हसि ॥३१॥
तत्राश्रमपदं कृत्वा यजन् विश्वेश्वरं हरम् ॥ दशाक्षरं जपन्मन्त्रमघौघप्रणुदं महत् ॥३२॥
जपं तत्र कुरुष्व त्वं यावज्जीवं ममाज्ञया ॥ पापं तव विनश्येत अन्ते स्वर्गं गमिष्यसि ॥३३॥
इत्युक्त्वा मन्त्रराजं तं शबराय ददौ द्विजः ॥ यथागतिर्ययौ राजन् कौशिको ब्राह्मणोत्तमः ॥३४॥
व्याधोपि त्यक्त्वा सर्वस्वं विप्राज्ञां प्रतिगृह्य च ॥ जगाम गोकर्णमितस्तदानीमेव सुव्रत ॥३५॥
सम्प्राप्य तत्क्षेत्रवरं तपस्तेपे सुदुश्चरम् ॥ वृक्षमूलमुपाश्रित्य निराहारो गतव्यथः ॥३६॥
दशाक्षरं जपन्नास्ते वर्षाणां पञ्चविंशतिम् ॥ शिवसङ्कीर्तनात् तस्य पापहानिरजायत ॥३७॥
ततः पञ्चत्वमापन्नो गोकर्णे राजसत्तम ॥ तेन पुण्येन महता व्याधः कैलासमाप्तवान् ॥३८॥
महाकाल्याश्रमाद्राजन्नीशान्यां दिशि संस्थितम् ॥ व्याधाश्रममितिख्यातं तीर्थं तस्य विमुक्तिदम् ॥३९॥
सर्वपापहरं पुण्यं पवित्रं पापनाशनम् ॥ नानाविधानि पापानि व्याधस्य नृपसत्तम ॥४०॥
क्षणान्नाशमुपागच्छन् गोकर्णे क्षेत्रसत्तमे ॥ दिव्यं विमानमारुह्य दिव्यस्त्रीगणसेवितम् ॥४१॥
सोपि कैलासमगमत् किं ततोऽधिकमुच्यते ॥

## गोकर्णक्षेत्रप्रशंसा

तस्मात् तदेव पुण्यं स्यात् त्रिषुलोकेषु भारत ॥४२॥
स्वर्गमोक्षप्रदं पुंसां गोकर्णं नात्र संशयः ॥ पापप्रक्षालकं राजन् जन्तूनामपि सर्वशः ॥४३॥
तदाश्रित्य पुरा सर्वे सिद्धाः सिद्धिमुपागताः ॥ स्वर्गे देवत्वमपि च गन्धर्वत्वमथापरे ॥४४॥
यक्षविद्याधरत्वं च तत्संयोगादथाप्नुयुः ॥ न तस्य महिमा शक्यो वक्तुं वर्षशतैरपि ॥४५॥
अत्र स्थिताः शिला वृक्षा रुद्ररूपा न संशयः ॥ पाषाणं गृह्य तत्रस्थं ये यजन्ति नृपोत्तम ॥४६॥
ते रुद्रलोकं गच्छन्ति किमु लिङ्गार्चनान्नृप ॥ त्रयस्त्रिंशत् प्रधानानि लिङ्गान्यत्र नृपोत्तम ॥४७॥

तावत्कोटीनि लिङ्गानि गोकर्णे निवसन्ति हि ॥ आश्रमाणि त्रयस्त्रिंशन्मुनीनां भावितात्मनाम् ॥४८॥

हनुमदीश्वरवर्णनोपक्रमः

हनूमान् वानरश्रेष्ठस्तत्र कृत्वा महत्तपः ॥ पुरा सिद्धिमगाद्राजन् किमन्यच्छ्रोतुमिच्छसि ॥४९॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे व्याधाश्रम महिमानुवर्णनंनाम चतुरशीतितमोऽध्यायः ॥८४॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ८५ ॥  NEXT>>  श्लोक संख्या–४६

॥ हनुमदीश्वरवर्णने–हनुमज्जन्म,विकटासुरवधश्च ॥

हनुमदीश्वरवर्णनम

शतानीक उवाच ॥

कथं चचार स तपो हनूमान् वानरोत्तमः ॥ एतद्विस्तार्य नो ब्रूहि सूत पौराणिकोत्तम ॥१॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि यत्पृष्टोऽहं त्वयाऽनघ ॥ हनूमांस्तत्र राजेन्द्र वायुपुत्रो महाबलः ॥२॥

तपश्चचार सुचिरं घोरमुद्दिश्य शङ्करम् ॥ दुर्गाकुण्डस्य सविधे आग्नेय्यां दिशि भारत ॥३॥

तपसा तस्य वीरस्य शिवः प्रत्यक्षतां गतः ॥ तुष्टो वानरशार्दूलमब्रवीद्भगवान् हरः ॥४॥

तुष्टोऽस्मि ते हरिवर तपसा तव वानर ॥ ब्रूहि यत्तेऽभिलषितं तद्ददाम्यविलम्बितम् ॥५॥

सप्ताहेन त्वया वीर कृतं कर्म सुदुष्करम् ॥ दृष्ट्वा प्रीतोऽस्मि भद्रन्ते अशक्यं देवदानवैः ॥६॥

पुत्रस्त्वं मे हरिवर वायोः पुत्रस्तथैव च ॥ क्षेत्रे केसरिणस्तात उत्पन्नस्त्वं महाबल ॥७॥

शुश्रूषार्थं हि रामस्य सुग्रीवस्य च सत्तम ॥ देवानां कार्यसिध्यर्थं विनाशाय च रक्षसाम् ॥८॥

जानक्याश्च प्रसादेन मृत्युर्न भविता तव ॥ तस्माद्ददामि ते भद्र यद्यपि स्यात् सुदुर्लभम् ॥९॥

ततस्तुष्टं शिवं ज्ञात्वा हनूमान् प्रणिपत्य तम् ॥ प्रसाद्य देवदेवेशमिदं वचनमब्रवीत् ॥१०॥

युध्यमानस्य मे देव जयो भवतु सर्वदा ॥ त्वत्पादयुगुले चैव अचला भक्तिरस्तु मे ॥११॥

अत्रागत्य नरा ये वै त्वां भजन्ते महेश्वर ॥ तेषामपि भवेदेवं प्रसादात् तव शङ्कर ॥१२॥

ततस्तमाह भगवान् तथास्त्विति नृपोत्तम ॥ दत्वा वरं कपर्देवस्तत्रैवान्तरधीयत ॥१३॥

तदाश्रमं पुण्यतमं गत्वा तु सुसमाहितः ॥ हनूमेशं महालिङ्गं पूजयेद्विधिपूर्वकम् ॥१४॥
एवं करोति यस्तत्र सोग्निष्टोमफलं लभेत् ॥ रिपून् कामादिकांश्चैव स जयेत् कुरुपुङ्गव ॥१५॥

---

शतानीक उवाच ॥

कोऽसौ हनूमान् किं तेन कृतं साहसमुत्तमम् ॥ सप्ताहिकेन बालेन येन तुष्टो महेश्वरः ॥१६॥
कोसौ रामो महातेजाः का सा स्त्री जानकी शुभा ॥ सुग्रीवो नाम को ब्रह्मन् किमर्थं राक्षसा हताः
॥१७॥
एतत्सर्वं ममाचक्ष्व सूत पौराणिकोत्तम ॥

सूत उवाच ॥

शृणुष्वैकमना राजन्नाञ्जनेयकथां शुभाम् ॥१८॥
अञ्जना नाम भद्रन्ते रूपेणाप्रतिमा भवत् ॥ वानरी वामनयना सुता उष्णकरस्य सा ॥
कनीयसी हरीन्द्रस्य सुग्रीवस्य महात्मनः ॥ रूपयौवनसम्पन्ना नृणां चित्तप्रमाथिनी ॥२०॥
उपयेमे च तां बालां केसरी नाम वानरः ॥ शतशृङ्गलयो राजन् महाबलपराक्रमः ॥२१॥
वालीसुग्रीवयोराज्ञां पालयन् परिवर्तते ॥ सापि तं वरयामास शुश्रूषापरमा सती ॥२२॥
तया सार्धं कुरुश्रेष्ठ स रेमे सुचिरं मुदा ॥ चकमे तां वरारोहां मारुतः काममोहितः ॥२३॥
ऋतुस्नातां सुचार्वङ्गीं वानरीं वनमध्यगाम् ॥ कामसन्तप्तहृदयो गृहीत्वा तां महाबलः ॥२४॥
धर्षयामास पवनो ह्यकामां वानरीं नृप ॥ सङ्गम्य स तया सार्धमिदं वचनमब्रवीत् ॥२५॥
पुत्रश्च भविता सुभ्रु महाबलपराक्रमः ॥ अंशेन देवदेवस्य मम चैव शुभानने ॥२६॥
जनिष्यति सुराणां च तव शोकप्रणाशनः ॥ इत्युक्त्वा स तु तां देवो मारुतोऽन्तर्दधे नृप ॥२७॥
सापि लज्जान्विता बाला भर्तारं समुपागमत् ॥ शुश्रूषामकरोत् तस्य यथापूर्वमनिन्दिता ॥२८॥
तस्यास्तु गर्भो ववृधे शुक्लपक्ष इवोडुराट् ॥ प्रासूत सा महाभागा बालं भास्करसन्निभम् ॥२९॥
तं पालयामास पिता केसरी पुत्रमौरसम् ॥ सप्ताहं कुरुशार्दूल शतशृङ्गस्य मूर्धनि ॥३०॥
तस्मिंस्तथा वर्तमाने विकटो नाम चासुरः ॥ बलवान् वीर्यसम्पन्नो ह्यवध्यो देवदानवैः ॥३१॥
गन्धर्वयक्षमनुजैः पतङ्गोरगकिन्नरैः ॥ देवासुरैरवध्यश्च ब्रह्मणो वरदर्पितः ॥३२॥
तस्य दत्वा वरान् ब्रह्मा वधोपायं निदिष्टवान् ॥ वानराद्वधमाप्नोति पापोऽयमिति भारत ॥३३॥
तं दृष्ट्वा विद्रवन्ति स्म सर्वभूतानि कौरव ॥ शतशृङ्गं गिरिवरं स जगाम यदृच्छया ॥३४॥
ददर्श चाञ्जना तत्र तत्पुत्रस्तं निरदिशत् ॥ विद्रुता सा सुतं त्यक्त्वा केसरी तत्र नाभवत् ॥३५॥

ततोऽसुरोऽगाद्वेगेन बालं रविशशिप्रभम् ॥ रुदन्तं रोदसीकम्पं स्तन्यार्थिनमरिन्दमम् ॥३६॥
विकटस्तु क्षुधाविष्टो भक्ष्यं दृष्ट्वा ननाद च ॥ तं गृह्योदपतत् पापो विहायसमरिन्दमः ॥३७॥
वियद्गतौ तु तौ वीरौ सञ्चितौ रविराहुवत् ॥ जिघृक्षन्तं स तं पापं ताडयामास मारुतिः ॥३८॥
पादहस्ततलैरेनं नखैर्दन्तैस्तथैव च ॥ स च क्षताङ्गोऽतिरुषा ददंश कपिकुञ्जरम् ॥३९॥
हस्ताभ्यां पीडयित्वा तु मूर्ध्नि तस्य महात्मनः ॥ बभञ्ज तस्य दन्ता वै काठिन्यात्तस्य शीर्षतः ॥
४०॥
ततो बुबोध भगवान् मारुतः पुत्रसङ्कटम् ॥ बोधयामास तं वीरं प्रविश्यात्मानमात्मना ॥४१॥
बोधितो मारुतेनाशु बालो मुष्ट्या तमाहनत् ॥ मूर्ध्नि तस्य कुरुश्रेष्ठ रुदन् वै लीलया कपिः ॥४२॥
मुष्टिप्रहाराभिहतो सोऽम्बरे गतजीवितः ॥ चिक्षेपाम्भोनिधौ राजन् स कपिर्दानवाधमम् ॥४३॥
दानवं तं विनिर्हत्य हनूमान् मारुतात्मजः ॥ वायुना प्रेरितगतिः शतशृङ्गमुपागमत् ॥४४॥
हते तस्मिन् सुराः सर्वे शतशृङ्गमुपाययुः ॥ सभाग्यकं कपिश्रेष्ठं वरं दत्वा पृथक् पृथक् ॥४५॥
यथागतं ययुः सर्वे किमन्यच्छ्रोतुमिच्छसि ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे हनुमदीश्वर महिमानुवर्णनंनाम पञ्चाशीतितमोऽध्यायः ॥८५॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ८६ ॥  NEXT>>  श्लोक संख्या–७५

## ॥ हनुमदीश्वरवर्णने–रामायणकथा–सुग्रीवराज्याभिषेकान्तम् ॥

### हनुमतः रुद्रपुत्रत्ववर्णनम्

शतानीक उवाच ॥

कथं स रुद्रपुत्रोऽभूद्धनूमान् मारुतात्मजः ॥ जातः केसरिणः क्षेत्रे वायोरिति मया श्रुतम् ॥१॥

सूत उवाच ॥

श्रूयतां कुरुशार्दूल अवतारं पिनाकिनः ॥ उमासहायो भगवानीश्वरो नन्दने वने ॥२॥
क्रीडन् चचार स शिवो मुदा तु परमेश्वरः ॥ वानरीभिः सह विभो वने क्रीडन्ति वानराः ॥३॥
तान्निरीक्ष्याब्रवीद्देवी भर्तारं कमलेक्षणा ॥ धृत्वा सा वानरीरूपं मनोज्ञं मनुजाधिप ॥४॥
कपिरूपधरस्त्वं मां रमयस्व महेश्वर ॥ तां तथेत्यब्रवीद्देवो कृत्वा रूपं कपेर्महत् ॥५॥

रमयामास देवेशो देव्या सह शिलातले ॥ तयोः शुक्लं प्रचस्कन्द अगृह्णात् तद्धि मारुतः ॥६॥
शुक्लाभिभूतो भगवान् कन्दर्पेण च मोहितः ॥ उपेयादञ्जनां वीरो रुद्रपुत्रस्ततः स्मृतः ॥७॥

## रामायणकथा–सुग्रीवराज्याभिषेकान्तम्

शतानीक उवाच ॥

कोसौ रामो महातेजाः का सा स्त्री जानकी शुभा ॥ किमर्थं तस्य शुश्रूषामकरोन्मारुतात्मजः ॥८॥
तत् सर्वं तु यथा वृत्तं श्रोतुमिच्छामि तत्वतः ॥ सुग्रीवस्य च मे शंस भूयश्चरितमुत्तमम् ॥९॥

सूत उवाच ॥

शृणु राजन् कथां दिव्यां रामसुग्रीवयोर्नृप ॥ इक्ष्वाकुवंशप्रभवो राजा दशरथाह्वयः ॥१०॥
बभूवुस्तस्य वै पुत्राश्चत्वारो लोकविश्रुताः ॥ रामश्च भरतश्चैव लक्ष्मणः शत्रुहा तथा ॥११॥
कौसल्या सुषुवे रामं कैकेयी भरतं तथा ॥ शत्रुघ्नलक्ष्मणौ देवी सुमित्रा सुषुवे नृप ॥१२॥
बाल्ये गृहीत्वा रामञ्च लक्ष्मणञ्च महान् ऋषिः ॥ शिक्षयामास भगवान् विश्वामित्रो महातपाः ॥१३॥
सर्वविद्यासु निष्णातो रामो दशरथात्मजः ॥ प्रसादात् तस्य राजेन्द्र विश्वामित्रस्य धीमतः ॥१४॥
रक्षार्थं तस्य यज्ञस्य ताटकां हतवान् प्रभुः ॥ यज्ञविघ्नकरांश्चान्यान् राक्षसान् कुरुसत्तम ॥१५॥
हतवान्राघवो राजन् तस्य तुष्टोऽभवदृषिः ॥ अस्त्राणि शिक्षयामास जयत्वं समरे सदा ॥१६॥
तौ गृहीत्वा महातेजा विश्वामित्रो महातपाः ॥ अभ्यगच्छत राजानं जनकं मिथिलाधिपम् ॥१७॥
दुहिता तस्य वैदेही सीता नाम्नी जनेश्वर ॥ उपयेमे च तां राम ऊर्मिलां लक्ष्मणस्तदा ॥१८॥
भङ्क्त्वा माहेश्वरं चापं विश्वामित्राज्ञया नृप ॥ कृत्वा विवाहं रामश्च विजित्य पथि भार्गवम् ॥१९॥
अयोध्यामगमद्रामः सीताभ्रातृभिरन्वितः ॥ अभ्यनन्दत तं दृष्ट्वा राजा दशरथः सुतम् ॥२०॥
सर्वज्ञं कृतदारं तं विशिष्टगुणवत्तरम् ॥ प्रियं समस्तलोकस्य दृष्ट्वा प्रीतोऽभवन्नृपः ॥२१॥
अङ्कमानीय तं पुत्रं मूर्ध्न्युपाघ्राय राघवः ॥ आलिङ्ग्य दोर्भ्यां रामं तु इदं वचनमब्रवीत् ॥२२॥
राम राम महाबाहो कुरुष्व वचनं मम ॥ अलङ्घ्यं वचनं राम पितृवाक्यमिति श्रुतिः ॥२३॥
तच्छ्रुत्वा चाब्रवीद्रामः कृताञ्जलिपुटो नृपम् ॥ त्वदाज्ञां शिरसा तात वहिष्ये न तु लङ्घये ॥२४॥
भूयोऽब्रवीत्ततो राजा रामं दशरथः सुतम् ॥ अभिषेक्ष्यामि त्वां पुत्र राज्ये राजीवलोचन ॥२५॥
पूर्वजैः स्वीकृतं पुत्र गन्तास्मि तपसे वनम् ॥ इक्ष्वाकूणामिदं पुत्र पारम्पर्यागतं व्रतम् ॥२६॥
बाल्ये विद्यार्जनं तात कौमारे विनयं तथा ॥ यौवने सर्वभूतानि पालयित्वा यथाविधि ॥२७॥

देवानृषीन् पितॄन् पुत्र सन्तर्प्य च यथाक्रमम् ॥ राज्येऽभिषिच्य वार्धक्ये कनीयसमरिन्दम ॥२८॥
तपसे धृतसङ्कल्पा वनं यास्यन्ति पार्थिवाः ॥ तस्माद्वनं गमिष्यामि वृद्धोऽहं रघुनन्दन ॥२९॥
राज्यं पालय धर्मेण यदि मत्प्रियमिच्छसि ॥ तच्छ्रुत्वा वचनं रामो वज्रपातोपमं वचः ॥३०॥
दुःखशोकपरो भूत्वा न किञ्चित् प्रत्यभाषत ॥ अलङ्घनीयं मत्वा तु तथेति प्रत्यभाषत ॥३१॥
ततो दशरथो राजा प्रकृतीरिदमब्रवीत् ॥ रामं राज्येऽभिषेक्ष्यामि अद्यैव रघुनन्दनम् ॥३२॥
इत्युदीर्य तु सम्भारानानयामास पार्थिवः ॥ ऋत्विक्पुरोहिताचार्यान् वसिष्ठप्रमुखांस्तदा ॥३३॥
आह्वयामास नृपतिस्तद्विदित्वा तु मन्थरा ॥ कैकेयीं समुपागम्य तया सम्मन्त्र्य पार्थिवम् ॥३४॥
अयाचत वरद्वन्द्वं राजा दशरथस्तदा ॥ अमन्यत पुनस्तं वै मन्थरा वाक्यमब्रवीत् ॥३५॥
वनं गच्छतु वै रामो वल्कलाजिनसंवृतः ॥ चतुर्दशसमा राजन् कैकेयीवचनान्नृप ॥३६॥
अभिषेकस्तु कर्तव्यो भरतस्येति साऽब्रवीत् ॥ तच्छ्रुत्वा दुर्मना राजा पपात च मुमोह च ॥३७॥
रामस्तथेति तामुक्त्वा अनुज्ञाप्य नृपोत्तमम् ॥ वनं जगाम कौरव्य भार्यया सह सीतया ॥३८॥
लक्ष्मणोऽनुगतो वीरश्चित्रकूटं समागमत् ॥ पुत्रशोकाभिसन्तप्तो राजा पञ्चत्वमागतः ॥३९॥
ततः प्रकृतयः सर्वा वसिष्ठप्रमुखा नृप ॥ मातुलस्य गृहाच्छीघ्रमानाय्य भरतं नृप ॥४०॥
अब्रुवन् ते यथावृत्तं भरताय यथाक्रमम् ॥ रामस्य गमनं चैव राज्ञः स्वर्गतिमेव च ॥४१॥
तच्छ्रुत्वा भरतः कोपं चकारातीव दुःखितः ॥ धिग्धिगित्यब्रवीद्देवीं कैकेयीं राघवानुजः ॥४२॥
स्वमातरं विनिन्द्यैवं संस्कारमकरोत् पितुः ॥ ततः स्वसैन्यसहितो राघवान्तिकमागमत् ॥४३॥
ददर्श चित्रकूटस्थं ववन्दे राघवानुजः ॥ पितुश्च स्वर्गतिं तस्मै न्यवेदयदरिन्दमः ॥४४॥
तच्छ्रुत्वा राघवस्तत्र दुःखात् कृत्वौर्ध्वदेहिकीम् ॥ भरतं पुनराहूय सस्वजे रघुनन्दनः ॥४५॥
सान्त्वयन् भरतं रामो इदं वचनमब्रवीत् ॥ गच्छ पालय राज्यं त्वं पित्र्यं चैव यथाक्रमम् ॥४६॥
ममाज्ञया रघुश्रेष्ठ यावदागमनं मम ॥ तच्छ्रुत्वा भरतो रामं प्रत्युवाच कृताञ्जलिः ॥४७॥
अहं वनं गमिष्यामि त्वं राज्यं कुरु राघव ॥ लक्ष्मणो वा रघुश्रेष्ठो नाहं गन्तास्मि वै पुरम् ॥४८॥
तच्छ्रुत्वा राघवो वाक्यं भरतस्याब्रवीत् पुनः ॥ मत्प्रियं कुरु पुत्र त्वं नोल्लङ्घयितुमर्हसि ॥४९॥
इत्युक्त्वा पादुके दत्वा राज्यार्थं कुरुनन्दन ॥ अभ्यनुज्ञाय भरतं शरभङ्गाश्रमं ययौ ॥५०॥
गृहीत्वा पादुके वीरो भरतोऽपि पुरं गतः ॥ हत्वा विराधं काकुत्स्थो दण्डकारण्यमागमत् ॥५१॥
तत्रस्थो रघुशार्दूलः खरं हत्वा महासुरम् ॥ चतुर्दशसहस्राणि विनिहत्य च रक्षसाम् ॥५२॥
नासाच्छेदं चकाराथ शूर्पनख्याश्च लक्ष्मणः ॥ विकृतां भगिनीं दृष्ट्वा रावणोऽगात्तदन्तिकम् ॥५३॥

मारीचेन समं राजन् मृगरूपेण रावणः ॥ मोहयित्वा महात्मानौ जहार जनकात्मजाम् ॥५४॥
हत्वा जटायुषं शूरो सीतां लङ्कामनीनयत् ॥ ततो रामो लक्ष्मणश्च दुःखेन महता युतौ ॥५५॥
अन्वीषतुर्जनकजां ददृशाते जटायुषम् ॥ निहतं रक्षसा तेन सीतावृत्तं निशम्य च ॥५६॥
हत्वा कबन्धं रामोऽपि ऋष्यमूकमुपागमत् ॥ ददृशतुः कपिं तत्र हनूमन्तं महाबलम् ॥५७॥
हनूमानपि तौ दृष्ट्वा सुग्रीवाय न्यवेदयत् ॥ सुग्रीवाज्ञापितो वीरो रामं पुनरुपागमत् ॥५८॥
अब्रवीत् कौ युवां वीरौ वदतां त्वत्र चागमम् ॥ तच्छ्रुत्वा लक्ष्मणः प्राह राजा दशरथाह्वयः ॥५९॥
रघुवंशसमुत्पन्नो रामस्तस्यात्मजो ह्ययम् ॥ पितुर्नियोगाद् भद्रन्ते वनवासाय चागमत् ॥६०॥
मया सह महाबाहुः सीतया भार्यया समम् ॥ रावणेन हृता सीता वञ्चयित्वा रघूत्तमम् ॥६१॥
सुग्रीवं वानरपतिं द्रष्टुमिच्छति राघवः ॥ सहायार्थं महाबुद्धे ऋष्यमूकमुपागतः ॥६२॥
को भवान् ब्रूहि तत्वेन आह्लादयसि बन्धुवत् ॥ तच्छ्रुत्वा हनुमानाह रामं गत्वा कृताञ्जलिः ॥६३॥
सुग्रीवसचिवं विद्धि वानरं मां रघूत्तम ॥ क्षेत्रे केसरिणो जातं मारुतस्य प्रियं सुतम् ॥६४॥
सुग्रीवो हृतदारश्च स्वभ्रातृहृतराज्यकः ॥ वालिनिष्कासितो राम ऋष्यमूकमुपागमत् ॥६५॥
अतस्तत्सन्निधिं राम गच्छाम यदि मन्यसे ॥ तथेत्युक्त्वा तु तं रामः सुग्रीवान्तिकमभ्यगात् ॥६६॥
हनूमद्वचनाद्रामं सुग्रीवो वानराधिपः ॥ पूजयामास काकुत्स्थं प्रीतिमानभवन्नृप ॥६७॥
वयस्यत्वं च सम्प्राप्य वह्निसाक्षिकमप्युभौ ॥ ततः प्रतिज्ञामकरोत् सुग्रीवो वानरोत्तमः ॥६८॥
सीतामन्विष्य दास्यामि तव रामेति भारत ॥ तच्छ्रुत्वाह रघुश्रेष्ठः सुग्रीवं प्रियवादिनम् ॥६९॥
हन्तास्मि वालिनं युद्धे तव भार्यापहारिणम् ॥ एवं प्रतिज्ञां कुर्वाणौ नरवानरपुङ्गवौ ॥७०॥
दृष्ट्वा वीर्यं रामचन्द्रे ह्यतिमानुषमुत्तमम् ॥ अभ्येत्याह्वानमकरोत् सुग्रीवो वालिनं प्रति ॥७१॥
तेनाहूतो महातेजा युद्धाय समुपागतः ॥ विलङ्घ्य तारावचनं तारापतिनिभाननः ॥७२॥
ततो युद्धमतीवासीद्वालिसुग्रीवयोर्नृप ॥ ततस्तु राघवो रामो इषुणैकेन वालिनम् ॥७३॥
जघान मदरक्ताक्षं कपिराजं तथैव च ॥ सुग्रीवं वानरपतिं कृत्वा तुष्टाः कपीश्वराः ॥७४॥
ततस्तु राघवस्तत्र चातुर्मास्यानुवास ह ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे रामायणे सुग्रीवराज्याभिषेकोनाम षडशीतितमोऽध्यायः ॥८६॥

## ।। हनुमदीश्वरवर्णने–रामायणकथा– सेतुबन्धनान्तम् ।।

### रामायणकथा– सेतुबन्धनान्तम्

सूत उवाच ।।

रावणोपि पुरीं गत्वा तामादाय च वीर्यवान् ।। अन्तःपुरेऽशोकवने राक्षसीमध्यतो न्यधात् ।।१।।
राक्षसीभिः परिवृता क्रूराभिर्जनकात्मजा ।। न्यवसत् तत्र कौरव्य तर्ज्यमाना दिवानिशम् ।।२।।
दुःखशोकातुरा देवी जपती राममन्त्रकम् ।। राक्षसी त्रिजटा नाम सान्त्वयामास जानकीम् ।।३।।
कथां रामस्य सुभगा कथयित्वा शुभोदयाम् ।। तया च नित्यमाश्वस्ता सीता व्याकुलमानसा ।।४।।
कदाचिद्रावणो राजन्नागत्य जनकात्मजाम् ।। उवाच चैनां चार्वङ्गीं भार्या मे भव सुन्दरि ।।५।।
त्रैलोक्यस्थानि रत्नानि सर्वस्वमपि ते ददे ।। तच्छ्रुत्वा जानकी वाक्यं तृणमन्तरितं व्यधात् ।।६।।
उवाच रावणं देवी न वश्याऽहं तवाधम ।। नाप्नोमि राघवादन्यं भास्कराच्च प्रभा यथा ।।७।।
तच्छ्रुत्वा क्रोधताम्राक्षो रावणो वाक्यमब्रवीत् ।। षण्मासाभ्यन्तरे सीते न करिष्यसि मत्प्रियम् ।।८।।
ततस्त्वां भक्षयिष्यन्ति राक्षस्यो मम शासनात् ।। इत्युक्त्वा समयं कृत्वा स्वगृहं प्रतिजग्मिवान् ।।९।।

सूत उवाच ।।

रामोपि चतुरो मासानुषित्वा सह लक्ष्मणः ।। शरत्कालः समायातो राज्ञामुद्योगसाधनः ।।१०।।
विस्मृतः समयो मेऽद्य सुग्रीवेण दुरात्मना ।। गच्छ जानीहि किष्किन्धां सुग्रीवस्य विचेष्टितम् ।।११।।
नयामि वालिपदवीं सुग्रीवं तं दुरात्मकम् ।। विस्मृत्य मां सुखे सक्तं नायान्तं मम सन्निधिम् ।।१२।।
सौमित्रस्तु तथेत्युक्त्वा प्रगृह्य सशरं धनुः ।। विवेश रम्यां किष्किन्धां रामबाण इव ज्वलन् ।।१३।।
तं दृष्ट्वा लक्ष्मणं भीत्या सुग्रीवो वानरेश्वरः ।। अपत्यभृत्यैः सहितो सान्त्वयित्वा तमर्चयत् ।।१४।।
प्रीतः प्रोवाच सौमित्री रामेण प्रेषितोऽस्म्यहम् ।। मत्सन्निधावानयस्व सुग्रीवमिति वादिना ।।१५।।
सुग्रीवोप्याह तच्छ्रुत्वा लक्ष्मणं हर्षयन् वचः ।। कृतोद्योगोऽस्मि भद्रन्ते सीतायाः परिमार्गणे ।।१६।।
दिशः प्रस्थापिता दूता सर्वे मे रघुपुङ्गव ।। वानरर्क्षप्रवीराणां इहैवागमनाय वै ।।१७।।
अहमप्यागमिष्यामि रामसन्निधिमञ्जसा ।। तच्छ्रुत्वादाय सुग्रीवं लक्ष्मणो राममभ्यगात् ।।१८।।

वानराश्च ततः सर्वे समायातास्तदन्तिकम् ॥ रामस्यानुमतः सर्वान् वानरान् वानरेश्वरः ॥१९॥
दिशः प्रस्थापयामास सीतान्वेषण कर्मणि ॥ हनूमन्तं समालोक्य दत्वा च स्वाङ्गुलीयकम् ॥२०॥
रामः सुग्रीवसहितस्तत्रैव न्यवसत् स्वयम् ॥ गतास्तिस्रश्च आशास्तु सुग्रीवं पुनरागताः ॥२१॥
ऊचुः प्राञ्जलयः सर्वे न सा दृष्टेति वानराः ॥ यो गन्ता दक्षिणामाशां सीतां मृग्यतु सर्वतः ॥२२॥
ततः शिष्टेषु सर्वेषु हनूमान् पुप्लुवेऽर्णवम् ॥ तत्र दृष्ट्वा जनकजां हत्वा ह्यक्षादिराक्षसान् ॥२३॥
दत्वाऽङ्गुलीयं सीतायै ततश्चूडामणिं दधौ ॥ पुनस्तीर्त्वाऽम्बुधिं वीरो वानरान्तिकमाययौ ॥२४॥
तैः समेतोऽभ्यगाद् रामसन्निधिं कपिकुञ्जरः ॥ दत्वा चूडामणिं तस्मै हनूमान्राममब्रवीत् ॥२५॥
दृष्टा सीता रघुश्रेष्ठ लङ्कामध्ये मया विभो ॥ रावणान्तःपुरे साध्वी उपवासपरायणा ॥२६॥
वयमन्वेषमाणा वै वैदेहीं दक्षिणा दिशि ॥ न दृष्ट्वा क्वापि जलधेस्तीरे मरणनिश्चयाः ॥२७॥
ततश्चाभ्यागतः पक्षी सम्पातिर्नाम सोऽनुजः ॥ जटायुषश्च भ्राताऽस्मानिदं वचनमब्रवीत् ॥२८॥
के भवन्तो महाकायाः किमर्थं चात्र संस्थिताः ॥ तच्छ्रुत्वा तस्य तत्सर्वं अस्मद्वृत्तमुदीरितम् ॥२९॥
तच्छ्रुत्वा तु स सम्पातिर्दृष्ट्वा सीतेत्युवाच ह ॥ रावणान्तःपुरे सीता राक्षसीमध्यतः स्थिता ॥३०॥
रुदन्ती राम रामेति शतयोजनदूरतः ॥ तच्छ्रुत्वाहं वायुवेगात् पुप्लुवे लवणार्णवम् ॥३१॥
लङ्कां प्राविश्य दृष्टा तु मया सीता न संशयः ॥ मलिना चीरवसना रुदन्ती कुररी यथा ॥ ३२॥
दृष्ट्वा तामब्रवं रामदूतोऽस्मीति ननाम च ॥ भर्ता ते कुशली रामो लक्ष्मणश्च महाबलः ॥३३॥
मित्रभावंचोपलब्धौ सुग्रीवेण महात्मना ॥ क्षिप्रं द्रक्ष्यसि काकुत्स्थं ससुग्रीवं सलक्ष्मणम् ॥३४॥
इत्युक्त्वा दत्तवानस्मि अङ्गुलीयं रघूत्तम ॥ दृष्ट्वा तं मयि विश्वस्ता देवी चूडमणिं ह्यदात् ॥३५॥
उवाच मां विशालाक्षी क्षिप्रं गच्छ रघूत्तमम् ॥ प्रयच्छेमं मणिं वीर रामाय विदितात्मने ॥३६॥
चित्रकूटे शिलायां तु सुप्तवान् रघुपुङ्गवः ॥ तत्रैको बलिभुङ्मां तु दारयामास निर्दयः ॥३७॥
ततो बुध्वा तु काकुत्स्थो दृष्टवान् मां विदारिताम् ॥ ततः क्रुद्धो मुमोचास्त्रं हन्तुं वायसमञ्जसा ॥३८॥
अस्त्रेणानुद्रुतोरिष्टिस्ततः किल सुरासुरान् ॥ रक्षार्थमात्मनस्तात शरणं क्वाप्यलब्धवान् ॥३९॥
रामं पुनरुपागम्य वचनं चेदमब्रवीत् ॥ शरणं भव काकुत्स्थ रक्षस्वेति पुनः पुनः ॥४०॥
रामस्तं मोचयामास वामाक्षिच्छेदनेन हि ॥ इति रामाह वैदेही यथावत् कथितं मया ॥४१॥
तच्छ्रुत्वा मारुतेर्वाक्यं संस्मृत्य जनकात्मजाम् ॥ मोहितो मुदितो रामो लक्ष्मणेन समन्वितः ॥४२॥
प्रतस्थे दक्षिणामाशां वानरर्क्षसमन्वितः ॥ हनूमन्तं समारुह्य मुदा रामो महामनाः ॥४३॥

लक्ष्मणोऽङ्गदमारुह्य ययौ दक्षिणमम्बुधिम् ॥ समुद्रं सन्दधे बाणं ततोऽगान्मकरालयः ॥४४॥
प्रत्यक्षत्वं रामपार्श्वे उवाच रघुपुङ्गवम् ॥ गच्छ राम पुरीं लङ्कां बध्वा सेतुं मयि प्रभो ॥४५॥
नलो नाम महावीर्यो वानरः शिल्पिसम्मतः ॥ स यत्क्षिपति काकुत्स्थ तृणङ्काष्ठं शिलां मयि ॥४६॥
तं धारयामि सुदृढं तेन सेतुर्भविष्यति ॥ इत्युक्त्वा वरुणो राजन् तत्रैवान्तरधीयत ॥४७॥
तच्छ्रुत्वा राघवो राजन्नलमाहूय चाब्रवीत् ॥ कुरु सेतुं महाबुद्धे समुद्रे वरुणालये ॥४८॥
ऋक्षवानरसंयुक्तः शिलावृक्षमहीधरैः ॥ तच्छ्रुत्वा राघवेणोक्तं बबन्ध जलधौ तदा ॥४९॥
सेतुं दृढतरं राजन् शतयोजनमायतम् ॥ तच्छ्रुत्वा रावणो राजन् राक्षसानिदमब्रवीत् ॥५०॥
रामेण कपिभिः सार्धं समुद्रे राक्षसेश्वराः ॥ सेतुर्बद्धो दृढतरः सन्नद्धा भवताधुना ॥५१॥
तच्छ्रुत्वाह ततस्तस्य भ्राता वाग्मी बिभीषणः ॥ शृणु राजन् मम वचो हितं वक्ष्यामि तेऽनघ
॥५२॥
हरिर्जातो रघुकुले साम्प्रतं रामसंज्ञया ॥ स्थितिसंयमकर्ताऽसौ स एव जगदीश्वरः ॥५३॥
विरोधो न क्षमस्तेन सन्धिस्तत्र विधीयताम् ॥ सुग्रीवो बलवान् वीरो वानरैर्बहुभिर्वृतः ॥५४॥
लक्ष्मणश्च महातेजाः शेषांशो नात्र संशयः ॥ एकेन वानरेन्द्रेण दग्धं पुरमिदं विभो ॥५५॥
किं पुनस्तैरसङ्ख्यातैरसाध्यं नास्ति सर्वतः ॥ तस्मात् सन्धिं कुरु विभो सीता चास्मै प्रदीयताम्
॥५६॥
तच्छ्रुत्वा रावणः क्रोधाद्भर्त्सयामास चानुजम् ॥ धिक्त्वां पापसमाचार भीत्या शंससि राघवम्
॥५७॥
मानुषं कृपणं दीनं रामं शाखामृगाश्रयम् ॥ त्यक्त्वा त्रैलोक्यमिन्द्राद्या मम किङ्करतां गताः ॥५८॥
तस्माद्वध्योऽसि पापिष्ठ वैरी भ्रातृस्वरूपधृक् ॥ सहोदरत्वात् त्वां पापं न हनिष्यामि वै रिपुम्
॥४९॥
अद्यैव गच्छ पापिष्ठ विषयान्तं सुदुर्मते ॥ यदि तिष्ठसि दुर्बुद्धे हन्तास्मि त्वां न संशयः ॥६०॥
तस्य तद्भाषितं श्रुत्वा बुद्धिमान् स विभीषणः ॥ चतुर्भिर्मन्त्रिभिः सार्धं रामं शरणमाययौ ॥६१॥
प्रतिजग्राह रामस्तं तथेति कुरुनन्दन ॥ सर्वराक्षसराज्ये तमभ्यषिञ्चद्विभीषणम् ॥६२॥
विभीषणेन सम्मन्त्र्य तेन सार्धं रघूत्तमः ॥ ससैन्यः सेतुना लङ्कां गत्वा तां च रुरोध वै ॥६३॥
निवेश्योपवने सैन्यं सम्यग्रक्षां विधाय च ॥ उवाचाङ्गदमाहूय याहि लङ्कां कपीश्वर ॥६४॥
दूतो भूत्वा मम वचो ब्रूहि तस्मै दुरात्मने ॥ तच्छ्रुत्वा रामवचनं स तथेति ययौ कपिः ॥६५॥

लङ्कां रक्षोगणैर्गुप्तां दुर्धर्षां देवदानवैः ॥ विवेश वालितनयो राक्षसानां च संसदि ॥६६॥
समासाद्य स रक्षेन्द्रममात्यैरभिसंवृतम् ॥ यदि ते जीविते वाञ्छा विद्यते राक्षसाधम ॥६७॥
दत्वा रामाय वैदेहीं शीघ्रं शरणमाव्रज ॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे रामायणेसेतुबन्धनंनाम सप्ताशीतितमोऽध्यायः ॥८७॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ८८ ॥  NEXT>>  श्लोक संख्या–१०९

## ॥ हनुमदीश्वरवर्णने–रामायणकथा–रामाभिषेकान्तम् ॥

### रामायणकथा–रामाभिषेकान्तम्

सूत उवाच ॥

तच्छ्रुत्वामर्षितो वाक्यं रावणोऽङ्गदभाषितम् ॥ संक्रुद्धं रावणं ज्ञात्वा चत्वारो रजनीचराः ॥१॥
जगृहुर्वालितनयं तानादाय स चाक्षिपत् ॥ वालिसूनुर्महातेजास्तेऽपतन् सागराम्भसि ॥२॥
ततो राममुपागम्य सर्वमावेदयद्बली ॥ तच्छ्रुत्वा तस्य चरितमङ्गदस्य महात्मनः ॥३॥
प्रीतिमानभवद्रामः ससुग्रीवः सलक्ष्मणः ॥ निरुध्य तां पुरीं लङ्कां विभज्य कपिवाहिनीम् ॥४॥
चतुर्धा च चतुर्द्वारे न्ययुङ्क्त रघुपुङ्गवः ॥ विभीषणं हनूमन्तं नलं नीलं सुलोचनम् ॥५॥
सुप्रभं विद्रुमं चापि पनसं पवनं तथा ॥ लङ्कायाः पश्चिमद्वारे तानयोजयदच्युतः ॥६॥
अङ्गदादीन् कपिवरान् योजयामास दक्षिणे ॥ द्वारं रामोऽभ्ययात् पूर्वं सुग्रीवानुजसंयुतः ॥७॥
तथान्यान् पश्चिमद्वारे न्ययुङ्क्त रघुपुङ्गवः ॥ ते नियुक्ता राघवेण तत्तद्वारं ययुः क्षणात् ॥८॥
ततस्ते हरयः सर्वे असङ्ख्येयाश्च सर्वतः ॥ इतश्चेतश्च राजेन्द्र लङ्कामाविविशुः क्षणात् ॥९॥
ते नखैः पर्वतैर्दन्तैः पादपैरश्मभिर्नृप ॥ स्तम्भाद्यैरायसैः सर्वे तदाघ्नन् रजनीचरान् ॥१०॥
अदृश्यत तदा लङ्का सर्वतो वानरैर्वृता ॥ ततः क्रुद्धो राक्षसेन्द्रो रक्षांसि समचोदयत् ॥११॥
निर्गत्य रावणोत्सृष्टराक्षसाः कपिवाहिनीम् ॥ शरैः शूलैरिष्टिभिश्च खड्गैः शक्तिभिरेव च ॥१२॥
मुद्गरैर्मुसलैश्चैव शतघ्नीभिश्च वानरान् ॥ राक्षसास्ताडयामासुर्हताः पेतुश्च वानरैः ॥ १३॥
अन्योन्यमभवद्युद्धं तुमुलं रोमहर्षणम् ॥ न भूतं नापि भविता तदा च कुरुनन्दन ॥१४॥
धूम्राक्षो रावणसुतः प्रहस्तो मंत्रिसत्तमः ॥ युयुधाते हनुमता हतौ तेन महात्मना ॥१५॥

तच्छ्रुत्वा रावणः पुत्रप्रहस्तनिधनं तदा ॥ अतीव दीर्घं निःश्वस्य कुम्भकर्णं व्यबोधयत् ॥१६॥
ततः प्रबुद्धं रक्षेन्द्रं भ्रातरं रावणोऽब्रवीत् ॥ इक्ष्वाकुवंशप्रभवो रामो नाम जनेश्वरः ॥१७॥
नाम्ना सीता तथा तस्य भार्या त्वपहृता मया ॥ स रामो वानरैः सार्धं बद्ध्वा सेतुं महार्णवे ॥१८॥
प्रहस्तप्रमुखा वीरा बान्धवा निहता रणे ॥ ततो युद्धायागतस्तु महाकायो महाबलः ॥१९॥
सुग्रीवः सानुमुद्यम्य कुम्भकर्णमताडयत् ॥ ततो रामो महातेजाः कुम्भकर्णं महाजवम् ॥२०॥
शरेण क्रूररूपेण ताडयामास वक्षसि ॥ स रामशरसन्तप्तः कुम्भकर्णो महासुरः ॥२१॥
पपात भिन्नसर्वाङ्गो मुमोह च ममार ह ॥ ततश्चचाल पृथिवी सशैलवनकानना ॥२२॥
गुप्तरूपेण दुर्गस्थान् रक्षसान्रघुनन्दनः ॥ स्वशरैः प्रैषयद्राजन् यमस्य निलयं प्रति ॥२३॥
हतं श्रुत्वा कुम्भकर्णं रावणो व्यथितोऽभवत् ॥ आहूयेन्द्रजितं पुत्रमिदं वचनमब्रवीत् ॥२४॥
कुम्भकर्णो हतः पुत्र प्रहस्तश्च निपातितः ॥ वज्रवेगः प्रमाथी च धूम्राक्षश्च महासुरः ॥ २५॥
वानरैरकृतार्थास्ते यमस्य निलयं गताः ॥ तस्मात्त्वं गच्छ खे क्षिप्रं युध्यस्व सह शत्रुभिः ॥२६॥
त्वया हि मम सत्पुत्र यशो विमलमूर्जितम् ॥ निहत्य रामं सुग्रीवं लक्ष्मणञ्च महाबलम् ॥२७॥
सर्वानन्यान्निहत्याजौ सम्पादय यशः सुत ॥ तं तथेति प्रतिज्ञाय रथमारुह्य वीर्यवान् ॥२८॥
इन्द्रजित् प्रययौ योद्धुं पितुर्वचनयन्त्रितः ॥ राक्षसैर्बहुभिर्युक्तो महाबलपराक्रमैः ॥२९॥
तं लक्ष्मणोऽभ्ययात्तूर्णं सिंहः क्षुद्रमृगं यथा ॥ ततः समभवद्युद्धं तुमुलं रोमहर्षणम् ॥३०॥
तत्रैवान्तर्दधे वीरो मायावी राक्षसात्मजः ॥ अदृश्यस्ताडयामास रामं लक्ष्मणमेव च ॥३१॥
सुग्रीवादीन् कपिवरान् ताडयामास रावणिः ॥ ततो रामोप्यदृश्यस्तु ताडयामास राक्षसान् ॥३२॥
राघवौ रावणिर्विध्वा ब्रह्मदत्तवरैः शरैः ॥ तौ बबन्ध दुरात्माऽसौ नागपाशाभियन्त्रितौ ॥३३॥
ततस्तौ पतितौ वीरौ निश्चेष्टौ समपद्यताम् ॥ सुग्रीवः परिवार्यैनं ससैन्यः सर्वतः स्थितः ॥३४॥
हतौ मत्वा रावणिः स पित्रे गत्वा शशंस च ॥ सोऽभ्यनन्दत् ततः पुत्रं हतौ श्रुत्वा तु राघवौ
॥३५॥
विभीषणस्तु तौ दृष्ट्वा प्रज्ञास्त्रेण न्यबोधयत् ॥ उत्थाय राक्षसान् जघ्ने शरैरादित्यसन्निभैः ॥३६॥
इन्द्रजिच्चापि तं वीरं लक्ष्मणं क्रोधमूर्छितः ॥ शरवर्षेण महताऽताडयद्राघवं रणे ॥३७॥
ततो विभीषणमते स्थित्वा सौमित्रिरप्यथ ॥ सन्धायैकशरं दिव्यं चापे दृढपराक्रमः ॥३८॥
हृदये ताडयामास रावणस्यात्मसम्भवम् ॥ ततः पुनरमेयात्मा सुतीक्ष्णं सायकोत्तमम् ॥३९॥
ब्रह्मास्त्रेणाभिसंयोज्य विचकर्ष महाबलः ॥ मुमोच कण्ठदेशे तु राक्षसस्य स राघवः ॥४१॥

आक्रम्यकण्ठदेशे तं पातयामास वै शिरः ॥ निहत्येद्रजितं तस्य सारथिं चाप्यपातयत् ॥४१॥
पतितं रावणिं दृष्ट्वा प्राद्रवन् राक्षसास्ततः ॥ मेघनादो हत इति रावणाय न्यवेदयन् ॥४२॥
तच्छ्रुत्वा रावणः पापः सीतां हन्तुं समुद्यतः ॥ न युक्तमिति तं राजन् अविन्ध्यस्तं न्यवारयत्
॥४३॥
रामं जहि महाराज न स्त्रियं हन्तुमर्हसि ॥ हता एषा पूर्वमेव बन्दीभूता गृहे यतः ॥४४॥
एवमुक्तस्त्वविन्ध्येन रथमारुह्य निर्ययौ ॥ युद्धाय कृतसन्नाहः सह राक्षसपुङ्गवैः ॥४५॥
हत्वा कपीन् बहून् रक्षो राममभ्यद्रवत् स्वयम् ॥ ततो रामस्त्वरायुक्तः सविभीषणलक्ष्मणः ॥४६॥
ययौ युद्धाय सशरं धनुरादाय चाब्रवीत् ॥ त्वया जितं किल पुरा त्रैलोक्यं सचराचरम् ॥४७॥
त्वामद्य निशितैर्बाणैर्हनिष्यामि न संशयः ॥ तच्छ्रुत्वा रावणो वाक्यं विहस्येदं तमब्रवीत् ॥४८॥
श्रूयते तव वीर्यं तु शूरस्त्वं किल वै महान् ॥ हता त्वया पुरा पाप ताटका नाम राक्षसी ॥४९॥
नासाभेदं च कृतवान् शूर्पणख्याश्च लक्ष्मणः ॥ ततो वाली त्वया पाप अदृश्येन दुरात्मना ॥५०॥
एवमादीनि कर्माणि ह्यप्रशस्तान्यनेकशः ॥ कृत्वा ख्यापयसे वीर्यमात्मनः स्वयमेव हि ॥५१॥
इत्युक्त्वा रावणः क्रुद्धः शरवर्षैरिवाकिरत् ॥ रामोपि निशितैर्बाणै रावणं प्रत्ययुध्यत ॥५२॥
तद्युद्धमभवद्घोरं रामरावणयोर्महत् ॥ न भूतं नापि भविता तत्समं युद्धमेव हि ॥५३॥
उभौ दिव्यास्त्रसम्पन्नौ युयुधातेऽस्त्रमायया ॥ यद्यन्मुमोच पौलस्त्यो रामेप्यस्त्रं महाबलः ॥५४॥
तत्तच्चक्रे वृथा रामः प्रत्यस्त्रैः कुरुसत्तम ॥ ततः क्रुद्धो राक्षसेन्द्रोप्यमुञ्चच्छूलमुत्तमम् ॥५५ ॥
शतघण्टं महाघोरं कालाग्निसमवर्चसम् ॥ तदन्तरे रघुश्रेष्ठश्चिच्छेद दशधा शरैः ॥५६॥
तद्दृष्ट्वा महदाश्चर्यं राक्षसा भयमाविशन् ॥ अपूजयन् तदा देवा रामं राजीवलोचनम् ॥५७॥
ततोऽसृजन्महामायां राक्षसः क्रोधमूर्च्छितः ॥ रामलक्ष्मणयो रूपं कृत्वा तौ प्रत्ययुध्यत ॥५८॥
ततस्तदद्भुतं दृष्ट्वा मुमोह हरिवाहिनी ॥ अन्तरिक्षगतो रामं भूमिस्थं प्रत्ययुध्यत ॥५९॥
तं दृष्ट्वा प्रैषयद्रामं स्वं रथं मघवानथ ॥ आगत्य मातली राममिदं वचनमब्रवीत् ॥६०॥
वासवः प्रेषयामास रथमेतं तवानघ ॥ आस्थायेमं रथं दिव्यं रावणं जहि दुर्मतिम् ॥६१॥
रामो मायां बुबोधाथ आह तं स विभीषणः ॥ न मायेयं रघुश्रेष्ठ आतिष्ठ रथमुत्तमम् ॥६२॥
तथेत्यारुह्य स रथं युयुधे रक्षसा समम् ॥ ततः शरं महाघोरं सन्धायेक्ष्वाकुनन्दनः ॥६३॥
ब्रह्मास्त्रेणाभिमन्त्र्याथ कालाग्निसमवर्चसम् ॥ विकृष्य प्रैषयद्रामो रावणान्तकरं शरम् ॥६४॥
निर्भिद्य रावणं सोपि पातालमगमच्छरः ॥ रावणोपि पपातोर्व्यां छिन्नमूल इव द्रुमः ॥६५॥

रावणं पतितं दृष्ट्वा देवा ऋषिगणैः सह ॥ ववर्षुः पुष्पवृष्टिं ते तुष्टुवू राममागताः ॥६६॥
देवदुन्दुभयो नेदुः स्वस्थमासीत्तदा जगत् ॥

सूत उवाच ॥

हत्वा तु रावणं रामः प्रीत्या चाह विभीषणम् ॥६७॥
गच्छ लङ्कां महाबुद्धे पालयस्व च राक्षसान् ॥ मया दत्तमिदं राज्यं भुंक्ष्व त्वं शाश्वतीः समाः ॥६८॥
तथेत्यानम्य तं लङ्कां प्रविवेश बिभीषणः ॥ प्रविश्याशोकवनिकां ससुग्रीवः सलक्ष्मणः ॥६९॥
सीतां निर्यापयामास रामाय जनकात्मजाम् ॥ ततः सीतां पुरस्कृत्य अवन्ध्यो नाम राक्षसः ॥७०॥
शीलवान् गुणसम्पन्नो रामं वचनमब्रवीत् ॥ प्रतीच्छेमां महाबाहो भार्यां तव रघूत्तम ॥७१॥
शुद्धां शुद्धस्वभावेन निःशङ्कं प्रतिगृह्यताम् ॥ तच्छ्रुत्वा राघवो वाक्यं सीतां दृष्ट्वेदमब्रवीत् ॥७२॥
सीते मुक्तासि गच्छ त्वं यथाकामं यथासुखम् ॥ मामनुप्राप्य भर्तारमयुक्तं रोधनं तव ॥७३॥
तस्माद्धत्वा दशग्रीवं मोचितासि मया शुभे ॥ न सम्भोगाय भविता नारी शत्रुवशं गता ॥७४॥
मद्विधानां विशेषेण शुना स्पृष्टं हविर्यथा ॥ तच्छ्रुत्वा भर्तृवचनं वज्रपातोपमं तदा ॥७५॥
सीता पपात कौरव्य मोहयुक्ता सुमध्यमा ॥ निश्चेष्टाः समपद्यन्त सर्वे वानरयूथपाः ॥७६॥
ततस्तं देशमाजग्मुर्ब्रह्माद्या देवतागणाः ॥ सप्तर्षयो महात्मानः पिता दशरथस्तथा ॥७७॥
तत उत्थाय वैदेही शिरसा प्रणिपत्य च ॥ वचनं चाह कम्पन्ती रामं सीता कृताञ्जलिः ॥७८॥
बलान्नीतास्मि राजेन्द्र रावणेन दुरात्मना ॥ अत ऊर्ध्वं विजानन्ति मद्वृत्तान्तं हि देवताः ॥७९॥
पञ्चभूताः शरीरेस्मिन् वसन्त्येव हि देवताः ॥ सन्त्यत्र साक्षिणो देव चन्द्रसूर्यादयोञ्जसा ॥८०॥
तच्छ्रुत्वा चागतो वायू राघवं प्रत्यभाषत ॥ अहं हि सर्वभूतानां अन्तःस्थित्वा रघूत्तम ॥८१॥
कर्म तेषां विजानामि शुभं चाशुभमेव च ॥ अपापा मैथिली राम गृह्यतां नात्र संशयः ॥८२॥
ततो ब्रह्मा जगत्सृष्टा शृणु रामेति चाब्रवीत् ॥ पतिव्रता महाभागा वैदेही पतिदेवता ॥८३॥
नलकूबरशापेन रक्षिता सा मयानघ ॥ अकामां यदि वा नारीं सकृद्यद्युपगच्छति ॥८४॥
सद्यस्तु तस्य मूर्धा च भेदं याति न संशयः ॥ रावणस्य वधार्थाय उत्पन्ना जानकी पुरा ॥८५॥
तस्मात्र शङ्का कर्तव्या राम सीता प्रगृह्यताम् ॥ ततो दशरथोऽप्याह पिताहं तव राघव ॥८६॥
निर्दोषा जानकी पुत्र गृह्यतां नात्र संशयः ॥ मया दत्तं राज्यमेतद्रक्ष त्वं रघुनन्दन ॥८७॥
तच्छ्रुत्वा पितरं रामो अभिवाद्येदमब्रवीत् ॥ गच्छामि सीतया सार्धमयोध्यां तव शासनात् ॥८८॥

इत्युक्त्वा तं तदा रामो जानकीं जगृहे विभुः ॥ त्रिजटायै वरं दत्वा पूजयामास राघवः ॥८९॥
विभीषणायामरत्वं दत्तवान् रघुपुङ्गवः ॥ ततश्चान्तर्दधुः सर्वे ब्रह्मशक्रादयः सुराः ॥९०॥
आरुह्य पुष्पकं रामः ससुग्रीवः सलक्ष्मणः ॥ विभीषणेन च विभुः सीतया सहितस्तदा ॥९१॥
तीर्त्वाम्बुधिं पुना रामः किष्किन्धां प्राप्य वेगतः ॥ गृहीत्वा वानरीस्तत्र भरद्वाजाश्रमं ययौ ॥९२॥
हनूमन्तं समाहूय रामो वचनमब्रवीत् ॥ याहि नन्दिग्रामगतं भरतं भ्रातृवत्सलम् ॥९३॥
मम चागमनं तस्मै कथयाद्य यथातथम् ॥ तथेत्युक्त्वा जगामाशु हनूमान् भरतान्तिकम् ॥९४॥
गत्वा ददर्श मलिनं भरतं चीरवाससम् ॥ नमस्कृत्वाऽब्रवीद्वाक्यं हनूमान् राघवानुजम् ॥९५॥
गुरुस्तवाग्रजो रामो भरद्वाजाश्रमं गतः ॥ सीतया सहितः श्रीमान् लक्ष्मणेन च वीर्यवान् ॥९६॥
विभीषणेन सहितः ससुग्रीवो महाबलः ॥ हत्वा युधि दशग्रीवं सभृत्यबलवाहनम् ॥९७॥
तस्य तद्वचनं श्रुत्वा भरतो राघवानुजः ॥ पूजयामास तं राजन् वाग्भिरुच्चावचैस्तदा ॥९८॥
गृहीत्वा पादुके तस्य शिरसा भरतस्तदा ॥ अभिनन्दन्नभ्यगच्छद्रामं रामानुजस्तदा ॥९९॥
भरद्वाजाश्रमे तत्र प्रणम्य च पुनः पुनः ॥ दत्वास्य पादुके पश्चात् प्रणम्य शिरसा गुरुम् ॥१००॥
कृताञ्जलिपुटो भूत्वा रामं वचनमब्रवीत् ॥ गृहाण राज्यं काकुत्स्थ न्यासभूतं पुरा मयि ॥१०१॥
ततो रामः परिष्वज्य मूर्ध्न्युपाघ्राय राघवम् ॥ अयोध्यां प्रविवेशाथ सङ्गतोनरवानरैः ॥ १०२॥
नमस्कृत्य गुरून् सर्वान् कथामकथयत् प्रभुः ॥ अभिषिक्तस्तु तै रामः पालयामास मेदिनीम् ॥१०३॥
ततः सत्कृत्य सुग्रीवं पौलस्त्यञ्च विभीषणम् ॥ अनुजज्ञे स्वयं रामः पालयामास मेदिनीम् ॥१०४॥
दशवर्षसहस्राणि दशवर्षशतानि च ॥ अयजत् क्रतुभिश्चैव बहुभिर्भूरिदक्षिणैः ॥१०५॥
उत्पाद्य पुत्रौ काकुत्स्थो दत्वा हनुमते वरम् ॥ यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥१०६॥
यावद्रामकथा लोके तावज्जीव स्वपुत्रक ॥ इत्युक्त्वा प्रययौ स्वर्गं संस्थाप्य स्वयशो भुवि ॥१०७॥
हनूमान् समनुप्राप्य हिमवन्तं महागिरिम् ॥ दिव्यान् भोगान् स भुञ्जानो आस्ते वै शाश्वतीः समाः ॥१०८॥
इत्येवं सर्वमाख्यातं हनूमज्जन्मकर्म च ॥ राक्षसानां वधश्चैव रामस्य चरितं महत् ॥१०९॥
इतिश्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे रामाभिषेकोनाम अष्टाशीतितमोऽध्यायः ॥ ८८॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ८९ ॥  NEXT>>  श्लोक संख्या–५१

## ॥ नागशृङ्ग महिमानुवर्णनम् ॥

### गरुडेन नागशृङ्गनयनम्

शतानीक उवाच ॥

नागशृङ्गं कथं तात ह्यपतद्वरुणालये ॥ कश्च नागपतिस्तत्र संस्थितः सूतनन्दन ॥१॥
तन्ममाचक्ष्व कारुण्यान्माहात्म्यं भुजगस्य वै ॥

सूत उवाच ॥

शृणु राजन् कथां दिव्यां दुर्मुखस्य महात्मनः ॥२॥
शेषवंशोद्भवः श्रीमान् सुनन्दो नाम नागराट् ॥ तस्य पुत्रो महातेजा दुर्मुखो नाम पन्नगः ॥३॥
स तपस्वी तपस्तेपे शतशृङ्गगतो वशी ॥ तं दृष्ट्वाऽऽदाय गरुड उत्पपात विहायसा ॥४॥
तपसा तस्य नागस्य रुद्रभक्त्या च कौरव ॥ पुनः पपात तत्रैव यत्र पूर्वमवस्थितः ॥५॥
बिलं कृत्वा विवेशाथ भयात् पक्षिपतेर्नृप ॥ ततः समुत्पाट्य गिरिं शतशृङ्गैः सह प्रभुः ॥६॥
गोकर्णमभ्यगाद्राजन् भाविकर्मप्रचोदितः ॥ भारार्तात् पतगेन्द्रात्तु पपाताब्धौ तदा नृप ॥७॥
त्रियोजनोत्तरे तस्माद्गौरीशृङ्गं पपात ह ॥ समुद्रे नृपशार्दूल गरुडाद्युगपत् प्रभो ॥८॥
उपरिष्टान्निपतितो भारार्तो गरुडस्तदा ॥ तत्रस्थो दुर्मुखो राजन् सस्मार वृषभध्वजम् ॥९॥
शरणं भव मे देव मृत्योर्भीततरस्य वै ॥ भक्तोऽहमिति मत्वा मां रक्षस्वेति पुनः पुनः ॥१०॥
तच्छ्रुत्वा नागराजस्य भाषितं परमेश्वरः ॥ प्रत्यक्षमगमत्तस्य वचनं चेदमब्रवीत् ॥ ११॥
नाग मा भैर्न ते मृत्युर्मत्प्रसादाद्भविष्यति ॥ इत्युक्त्वा मूर्ध्नि नागस्य त्रिशूलेनोल्लिखत् प्रभुः ॥१२॥
नागस्य रक्षां कृत्वाथ तत्रैवान्तर्दधे विभुः ॥ तं दृष्ट्वा गरुडो राजन् त्रिशूलाङ्कं शिरस्यथ ॥१३॥
रुद्रदत्तवरं राजन् वर्जयामास पक्षिराट् ॥ ततःप्रभृति तन्नाम्ना ख्यातो भवदरिन्दम ॥१४॥
सोऽद्यापि वर्तते तस्मिन् त्रिशूलाङ्को विषायुधः ॥ नागभोगान् समासाद्य स्थितोऽसौ पर्वते यथा ॥१५॥
तस्मिन्नागबिलं नाम विविक्तं सेव्यमुत्तमम् ॥ सर्वरत्नमयं राजन् सुरकिन्नरसेवितम् ॥१६॥

नागराजस्य भवनं त्रिशूलाङ्कस्य सत्तम ॥ अर्धयोजनविस्तारं सार्धयोजनमायतम् ॥१७॥
नागस्त्रीभिः परिवृतो दिव्यरूपाभिरच्युतः ॥ तासां कलासु नार्हन्ति तथा च अमराङ्गनाः ॥१८॥
न मृत्युर्न जरा तासां न व्याधिर्नेन्द्रियक्षयः ॥ प्रविश्य च वसन्ति स्म सुचिरं तत्र केचन ॥१९॥
तपसा महता राजन् मन्त्रौषधिसमन्विताः ॥ ताभिः सहैव मोदन्ते बिलसिद्धिर्हि सा स्मृता ॥२०॥
रुद्रेण शुक्रमुत्सृष्टं निहितं तद्बिले पुरा ॥ तद्रक्षार्थं नियुक्तस्तु त्रिशूलाङ्कस्त्रिशूलिना ॥२१॥
औषध्यो बहवस्तत्र जरामृत्युप्रबाधकाः ॥ तत्प्राश्य रुद्रो भवति नात्र कार्या विचारणा ॥२२॥
रुद्रप्रसादद्भद्रन्ते नान्यथा कुरुनन्दन ॥

---

## नागशृङ्गस्थपञ्चतीर्थानि

वसन्ति पञ्चतीर्थानि तस्मिन् शृङ्गवरे नृप ॥२३॥
रुद्रकुण्डं नागतीर्थं वसोर्धारमिति प्रभो ॥ अपरं विद्यते तत्र सर्वतीर्थमयं शुभम् ॥२४॥
शङ्खतीर्थमिति ख्यातं सर्वकिल्बिषनाशनम् ॥ सिद्धकुण्डं च तत्रैव तीर्थान्येतानि कौरव ॥२५॥
तीर्थेषु तेषु यः स्नाति सोऽनन्तं फलमश्नुते ॥

---

## त्रिशूलाङ्केन प्रतिमासं गोकर्णक्षेत्रागमनम्

बिलात् तस्माद्विनिष्क्रम्य त्रिशूलाङ्को विषायुधः ॥२६॥
आगच्छति स गोकर्णं मासे पूर्णे तु कौरव ॥ पूर्वपक्षस्य पञ्चम्यां सभृत्यः सहबान्धवः ॥२७॥
इदानीमपि कौरव्य मार्गस्तस्य महात्मनः ॥ दृश्यते भरतश्रेष्ठ आगोकर्णात्तु सागरे ॥२८॥
शिलायां दृश्यते मार्गस्तस्य नागस्य सत्तम ॥ गोकर्णक्षेत्रमासाद्य सम्पूज्य च महाबलम् ॥२९॥
स्नात्वा सर्वेषु तीर्थेषु सर्वलिङ्गान्यनुक्रमात् ॥ सम्पूज्य नागराजोऽसौ पुनर्गच्छति कौरव ॥३०॥
एवं संवर्तते राजन् त्रिशूलाङ्को विषायुधः ॥ तस्मिन् शैले कुरुश्रेष्ठ षण्मासात् सिद्धिमाप्नुते ॥३१॥
सर्वेन्द्रियाणि संयम्य रागद्वेषविवर्जितः ॥ मौनव्रतधरस्तूष्णीं कन्दमूलफलाशनः ॥३२॥
सम्पूजयेज्जगन्नाथमीश्वरं पार्वतीपतिम् ॥ नागराजञ्च राजेन्द्र सावित्रीजपतत्परः ॥३३॥
स महासिद्धिमाप्नोति अणिमादिं न संशयः ॥

---

## कर्णधारः

कर्णधार इति ख्यातः क्षेत्रपालः प्रतापवान् ॥३४॥
तच्छृङ्गपालनार्थं हि नियुक्तः शूलपाणिना ॥ सोऽद्यापि दृश्यते राजन् शतशृङ्गे महागिरौ ॥३५॥

कृष्णपक्षे चतुर्दश्यां बलिं दत्वा महाप्रभुम् ॥ नमस्ते कर्णधाराय कामपालाय ते नमः ॥३६॥
सर्वभूतपते तुभ्यं नमस्ते क्षेत्रपालक ॥ इति प्रसाद्य तं पश्चाद्बलिं दद्याद्दिशो दश ॥३७॥
तस्याशु सिद्धिर्भवति सोपि प्रत्यक्षतां व्रजेत् ॥ स्वप्ने वा दर्शयेदस्य तदेव ज्ञापनं नृप ॥३८॥
सिद्धोक्तं यद्वचः स्वप्ने तत्कुर्यात् सिद्धिमाप्नुयात् ॥ यद्यदिच्छति तत्कार्यं तेन सिद्धिर्भविष्यति ॥३९॥
विशालो नाम राजासीत् पुरा कृतयुगे नृप ॥ स तत्र सिद्धिमापन्नः प्रसादात् परमेष्ठिनः ॥४०॥
अणिमादि महाराज ऐश्वर्यं सोऽधितिष्ठति ॥ सर्वेषां प्रददौ राजा तत्सिद्धिमविशङ्कितः ॥४१॥
ततः क्रुद्धः कर्णधारस्तं गृहीत्वा महाबलः ॥ पाषाणो भव पापेति प्राक्षिपद्वरुणालये ॥४२॥
क्षिप्तस्तेन महाराजा निश्चेष्टः समपद्यत ॥ शिलामयतनू राजा स्थितोऽसौ मकरालये ॥४३॥
येन गच्छति नागोऽसौ त्रिशूलाङ्के महाबलः ॥ निक्षिप्य तं क्षेत्रपाल इदं वचनमब्रवीत् ॥४४॥
अनेनैव पथा त्वं हि गोकर्णं गच्छ पार्थिव ॥ यदा गन्तासि गोकर्णं तदा मुक्तो भविष्यसि ॥४५॥
मासेन गच्छति विभुः स राजा चतुरङ्गुलम् ॥ अभ्यागच्छति गोकर्णात् येन मार्गेण नागराट् ॥४६॥
तन्मार्गस्थो नृपश्रेष्ठो ऊह्यते चतुरङ्गुलम् ॥ शिलारूपेण तद्रूपं तन्मार्गेणार्णवे विभो ॥४७॥
महाबलस्य पुरतो यदा प्राप्नोति पार्थिव ॥ तदा तत्पापमोक्षः स्यादिति वै शासनं कृतम् ॥४८॥
सोद्यापि दृश्यते मार्गश्चाब्धिमध्ये शिलामयः ॥ तस्मात् सम्पूजनीयोसौ कर्णधारो महीपते ॥४९॥
य इच्छेदात्मनः सिद्धिं तस्य पूजां समाचरेत् ॥५०॥

---

## दुर्गाशृङ्गवर्णनोपक्रमः

सूत उवाच ॥

नागशृङ्गस्य माहात्म्यमुक्तं संक्षेपतो मया ॥ शृणु भूयः प्रवक्ष्यामि दुर्गाशृङ्गस्य सम्भवम् ॥५१॥
इतिश्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे नागशृङ्गमहिमानुवर्णनंनाम एकोन नवतितमोऽध्यायः ॥ ८९॥

---

*वि.सू.– नागशृङ्गं समुद्रे पतितम् । तस्मात् त्रियोजनोत्तरे गौरीशृङ्गं पतितं इत्युक्तम् । तथा च नागशृङ्गं गोकर्णे स्थितात् गौरीशृङ्गात् त्रियोजनं दक्षिणे समुद्रमध्ये पतितं इत्यर्थो भवति । तेन नागशृङ्गं गोकर्णे नास्ति इति गम्यते । अग्रेऽपि "आगच्छति स गोकर्णं " इत्युक्तत्वात् गोकर्णाद् बहिरेव नागशृङ्गं इति प्रतिभाति ॥

॥ गौरीशृङ्गदुर्गाकुण्ड माहात्म्य वर्णनम् ॥

गौरीजननम्–वेत्रासुरवधः–गरुडेन गौरीशृङ्गनयनम्

शतानीक उवाच ॥

कथं गौरी समुत्पन्ना दुर्गा कात्यायनी शुभा ॥ किमर्थं सा तपस्तेपे शतशृङ्गगतानघ ॥१॥

सूत उवाच ॥

प्रकृतिः पुरुषश्चैव नित्यौ तौ दम्पती नृप ॥ तयोर्जज्ञे चाविलन्तु त्रैलोक्यं सचराचरम् ॥२॥

न विना पुरुषेणासौ प्रकृतिर्वर्ततेनघ ॥ तया विना न पुरुषः कदाचिदपि तिष्ठति ॥३॥

अविनाभाविनौ तौ हि परस्परमरिन्दम ॥ तया प्रकृत्या त्रैलोक्यं व्याप्तमासीन्निरामयम् ॥४॥

सा योगनिद्रा देवस्य विष्णोरमिततेजसः ॥ तदुद्भवं प्रवक्ष्यामि शृणु स्वस्त्ययनं महत् ॥५॥

नाम्ना वेत्रासुरो राजन् वेत्रवत्याम भून्नृप ॥ प्राग्ज्योतिषाधिपतिः सिन्धुद्वीपे बलान्वितः ॥६॥

भूलोकमजयत् पूर्वं सशैलवनकाननम् ॥ ततो जित्वा भुवर्लोकं मेरुपृष्ठमथो बली ॥७॥

तत्र स्वर्गं समासाद्य इन्द्रादीन् देवतागणान् ॥ क्रमेण लोकपालांश्च जित्वा स्वर्गाधिपोऽभवत् ॥८॥

प्राद्रवन् ते भयात्तस्य देवा देवर्षयस्तथा ॥ स्वानि स्थानानि सन्त्यज्य ब्रह्मलोकं गता नृप ॥९॥

इन्द्रादीनां स्वयं चक्रे अधिकारं महासुरः ॥ निराकृताः सुरास्तेन ब्रह्माणं शरणं गताः ॥१०॥

शरणं भव देवेशेत्यूचुः सर्वेऽमरास्तदा ॥ वेत्रासुरभयार्तानामस्माकं सुरसत्तम ॥११॥

तेन नाथेन देवेश अनाथान् पाहि साम्प्रतम् ॥ स्वानि स्थानानि सन्त्यज्य दारानुपवनानि च ॥१२॥

केवलं भावयन् देव जीवनार्थमुपागताः ॥ ततो ब्रह्मा प्रसन्नस्तु विष्णुमाराधयत् स्वयम् ॥ १३॥

सुप्रसन्नो जगन्नाथः शङ्खचक्रगदाधरः ॥ तस्मै निवेदयामास विधिर्दानवचेष्टितम् ॥१४॥

तच्छ्रुत्वा भगवान् विष्णुः क्रोधमाहारयद्भृशम् ॥ वधाय तस्य दुर्बुद्धेः क्रुद्धस्य वदनाद्विभोः ॥१५॥

ब्रह्मणः शङ्करस्यापि शक्रादीनां ललाटतः ॥ उत्थितं सुमहत्तेजस्तच्चैक्यं समपद्यत ॥१६॥

तत्तेजो ववृधे राजन्रोदसी प्रत्यदीपयत् ॥ तत्क्षणादभवन्नारी देवी दिव्यस्वरूपिणी ॥१७॥

सर्वदेवसमुद्भूतां देवीं दृष्ट्वा दिवौकसः ॥ मुदिताश्चाभवन् राजन् स्वानि स्वान्यायुधान्यदुः ॥१९॥
भूषणानि विचित्राणि वाहनादीनि पाण्डव ॥ ततो ननाद सा देवी कम्पयन्तीव रोदसी ॥१९॥
जगदाविग्नमभवद्देव्यास्तु गर्जितेन भो ॥ तां दृष्ट्वा तुष्टुवुर्देवाः स्तोत्रेण परमेश्वरीम् ॥२०॥
जय त्वं देवि लोकानां माता असि च भामिनि ॥ त्वया व्याप्तमिदं विश्वं मायया च चराचरम् ॥
२१॥
त्वत्तोद्भूता गुणा देवी सत्वराजसतामसाः ॥ सर्वभूतेषु भूतेशि व्याप्ता त्वमसि भामिनि ॥२२॥
विश्वञ्च प्रथितं देवि वेत्रासुरभयार्दितम् ॥ विश्वोपकरणी यस्माच्छरणं भव नोनघे ॥२३॥
सर्वेषां प्राणिनां त्वं हि शक्तिरित्यभिधीयसे ॥ त्वदुपेक्षया जगत्सर्वं हीयते सचराचरम् ॥२४॥
त्वदपेक्षया हि वर्धेत देवो वा दानवोपि वा ॥ स्थितिसंयमकर्त्री त्वं भूतानां भूतभामिनि ॥२५॥
त्वमेव जानासि जगत्त्वां न जानाति कश्चन ॥ पुरुषाधिष्ठितत्वाच्च योगनिद्रेति कथ्यते ॥२६॥
इदानीं सर्वदेवानां देहान्निष्क्रम्य शोभने ॥ स्वरूपं धारिता देवि दृष्टिगोचरतां गता ॥२७॥
दुर्जया च अगम्यत्वान्नाम्ना दुर्गा भवानधे ॥

सूत उवाच ॥

इति स्तुता सुरैर्देवी ननाद परमेश्वरी ॥२८॥
तच्छुत्वा सकला लोकाश्चुक्षुभुः कुरुसत्तम ॥ वेत्रासुरोपि तच्छुत्वा नादं लोकभयङ्करम् ॥२९॥
किमेतदिति तं देशमगमत् सबलस्तदा ॥ ददर्श रूपं तद्दिव्यं त्रैलोक्यव्याप्यधिष्ठितम् ॥३०॥
सहस्रबाहुभिर्व्याप्तं दिशो दश विजृम्भितम् ॥ असुरे जातसन्त्रासो युयुधे सबलो नृप ॥३१॥
ततः प्रववृते युद्धं तया तैर्महदद्भुतम् ॥ शरास्त्रवर्षैरसुरा अभ्यघ्नन्नम्बिकां नृप ॥३२॥
सापि भित्वाऽस्त्रवर्षाणि रक्षसां भद्रकर्णिका ॥ जहासोच्चैर्भगवती रोदसी कम्पयन्त्यथ ॥३३॥
ततो मुखेन निश्चेरुर्विविधायुधपाणयः ॥ देव्याःसुवदनाद्घोरान्नानारूपधरा नृप ॥३४॥
गणा भयानकाः क्रूराः सर्वप्रहरणोद्यताः ॥ युयुधू राक्षसैः सार्धं भक्षयामासुरोजसा ॥३५॥
ते भक्ष्यमाणा ह्यसुराः क्षणान्नेशुरितस्ततः ॥ पराजयं स्वसैन्यस्य दृष्ट्वा सेनापतिर्महान् ॥३६॥
वियसो नाम दैत्येन्द्रः सोभ्यधावत वीर्यवान् ॥ गृहीत्वा त्रिशिखं राजन् बहुयोजनविस्तृतम् ॥ ३७॥

भ्रामयित्वा स चिक्षेप गौरीं प्रति रुषान्वितः ॥ चूर्णयामास तद्देवी शतधा च सहस्रधा ॥३८॥
चक्रेण शितधारेण वज्रेण च शुभानना ॥ ततस्त्रिशूलमुद्यम्य चिक्षेप वियसोरसि ॥३९॥

निर्भिन्नहृदयः सोथ पपात च ममार च ॥ तस्मिन् हते महावीर्ये प्रखरे च भयङ्करे ॥४०॥
प्राद्रवन् भयसन्त्रस्ता राक्षसाः सर्वगा दिशः ॥ तान् दृष्ट्वा दनुजश्रेष्ठो खट्वाङ्गो नाम वीर्यवान् ॥४१॥

अभिदुद्राव वेगेन भद्रकालीं निशाचरः ॥ ततः केशं गृहीत्वा तं चक्रेण च चकर्त सा ॥४२॥
हृतं शिरः पपातोर्व्यां खट्वाङ्गो गतजीवितः ॥ तस्यानुसैनिकान् हत्वा ननाद परमेश्वरी ॥४३॥
ततो वेत्रासुरः क्रुद्धश्चतुरङ्गबलान्वितः ॥ देवीमभ्यद्रवद्राजन् तिष्ठ तिष्ठेत्यभाषत ॥४४॥
ततः प्रववृते युद्धं घोरं लोकभयङ्करम् ॥ क्षणेन राक्षसान् घोरान्नाशयामास सङ्गिना ॥ ४५॥
अभ्यधावत वेगेन वेत्रासुरमनर्गलम् ॥ आयतीमतिवेगेन सम्प्रेक्ष्य च महासुरः ॥४६॥
जघान देवीं शस्त्रौघैर्वज्रकल्पैर्दुरासदैः ॥ तान् बिभेद क्षणाद्देवी तस्य चक्रेण मूर्धनि ॥४७॥
भित्वा जघान तं देवी दैत्यं शूलेन वेगिना ॥ एवं परस्परं राजन् चक्रतुर्युद्धमद्भुतम् ॥४८॥
ततो जग्राह सा देवी मूर्धजेषु महासुरम् ॥ शूलेन ताडयामास खड्गेन च वरानना ॥४९॥
चक्रेण कालदण्डेन वज्रेण युगपन्नृप ॥ तत्याज जीवितं सद्यः पपात भुवि दैत्यराट् ॥५०॥
हते वेत्रासुरे देवास्तुष्टुवुः परमेश्वरीम् ॥ त्वया वयं भाव्यमाना वसामोऽत्राकुतोभयाः ॥५१॥
त्वं माता सर्वभूतानां तस्मात्त्वामम्बिकां विदुः ॥ योगानां प्रविभागज्ञा द्वैताद्वैतविधायिनी ॥५२॥
योगेश्वरीति त्वामाहुर्योगिनो वरवर्णिनि ॥ त्वं मायया मोहयसि जगत्स्थावरजङ्गमम् ॥५३॥
तस्मादाहुश्च मुनयो महामायेति पार्वति ॥ प्रसन्ना यस्य वै त्वं हि स देवो नात्र संशयः ॥५४॥
अप्रसन्ना हि यस्य त्वं स क्षिप्रं हीयतेऽनघे ॥ भक्तार्तिभञ्जनपरे तेषां प्राप्याभयप्रदे ॥५५॥
त्वया हतोऽद्य पापीयान् दुष्टो वेत्रासुरो मृधे ॥ तद्भीत्या त्यक्तसर्वस्वा देवा अपि दरिं गताः ॥५६॥
त्वत्प्रसादात् पुनः प्राप्ता स्वस्थानं देवतागणाः ॥ तस्मान्नमोस्तु वै तुभ्यं भद्रं नः प्रदिशानघे ॥५७॥

इति संस्तूयमाना सा देवी देवैर्मुदं ययौ ॥ अथ तामाह भगवान् ब्रह्मा लोकगुरुः स्वयम् ॥ ५८॥
भविष्यत्कार्यमुद्दिश्य भूतंभव्यभविष्यवित् ॥ गच्छ भद्रे हिमगिरिं मन्त्रियोगादनिन्दिते ॥५९॥
शतशृङ्गमिति ख्यातं शृङ्गमस्य महागिरेः ॥ ममाश्रमं महाभागे सुरासुरसुपूजितम् ॥६०॥
तत्र त्वं वस कल्याणि उत्पत्स्यन्ते महासुराः ॥ महिषो नाम शुम्भश्च निशुम्भश्च महासुरः ॥ ६१ ॥
तपसा महता देवि भविष्यति बलाधिकः ॥ मृत्युरूपा हि तेषां त्वं तस्माद्गच्छ महागिरिम् ॥६२॥
इत्युक्त्वा भगवान् ब्रह्मा देवैश्चान्तरधीयत ॥ ततो दुर्गा भगवती गत्वा हिमगिरिं तदा ॥६३॥

अजशृङ्गं समासाद्य तत्रोवास यथासुखम् ॥ आर्याशृङ्गमिति ख्यातं तद्धि गौर्यधिवासनात् ॥६४॥
तेन सार्धं समुत्पाट्य गरुडो ह्यानय द्रिरिम् ॥ पपात गोकर्णमभि वायव्यां तद्धि सागरे ॥६५॥

## गौरीशृङ्गस्थदशतीर्थानि

दशतीर्थानि कौरव्य गौरीशृङ्गे वसन्ति हि ॥ शक्रादीनाञ्च तीर्थानां मुख्यानि कुरुपुङ्गव ॥६६॥
गङ्गाधारं वसोर्धारं माहिषं तीर्थमुत्तमम् ॥ गौरीह्रदं भागतीर्थं चामुण्डोद्भव मेव च ॥६७॥
कालीहृदञ्च कौमारमाप्सरं वारुणं तथा ॥ मुख्यानि तानि राजेन्द्र सहस्रप्रवराणि च ॥६८॥
तेषु स्नात्वा नरो भक्त्या नवम्याञ्च विशेषतः ॥ त्रिजन्मचरितात् पापान्मुक्तो रुद्रत्वमाप्नुयात् ॥
६९॥

## नन्दिनी(आरामविनायकनिकटे),दुर्गाकुण्ड,दुर्गाणां माहात्म्यवर्णनम्

आर्याशृङ्गता देवी दुर्गा दुर्गार्तिनाशिनी ॥ गोकर्णक्षेत्रमासाद्य दृष्ट्वा तीर्थान्यनेकशः ॥७०॥
महाबलं देवदेवं धर्माश्रम मुपागमत् ॥ तीर्थं कृत्वा सुविमलं शतशृङ्गतटे शुभे ॥७१॥
तपश्चचार सुचिरं ध्यायन्ती परमेश्वरम् ॥ एवं बहुतिथे काले शिवः प्रत्यक्षतां गतः ॥७२॥
ततो दुर्गा भगवती दृष्ट्वा शम्भुं महेश्वरम् ॥ ननाम शिरसा भक्त्या तुष्टाव विविधैस्तवैः ॥७३॥
ततस्तुतोष भगवान् शङ्करो भक्तवत्सलः ॥ उवाच श्लक्ष्णया वाचा दुर्गां दुर्गार्तिनाशिनीं ॥७४॥
अयि दुर्गे विशालाक्षि तुष्टोहं तपसा तव ॥ भक्त्या च नियमेनाद्य वरं वरय कांक्षितम् ॥७५॥
इत्युक्त्वा शम्भुना देवी दुर्गा प्रोवाच तुष्टधीः ॥ दर्शनं तव देवेश वरमेतन्न संशयः ॥७६॥
मया कृतमिदं तीर्थं स्थानञ्च सुरसत्तम ॥ मन्नाम्ना ख्यातिमायातु त्रैलोक्योत्तमतां व्रजेत् ॥७७॥

शङ्कर उवाच ॥

त्वया कृतमिदं स्थानं तीर्थञ्च वरवर्णिनि ॥ त्वन्नाम्ना ख्यातिमायाति सर्वपापहरं भवेत् ॥ ७८ ॥
एकांशेन वस त्वं हि गौरीशृङ्गे मनोरमे ॥ अपरेण महाभागे यमलोकस्य दक्षिणम् ॥७९॥
द्वारं पालय भद्रन्ते नन्दिनी नाम नामतः ॥ चैत्रमासे सिते पक्षे प्रतिपत्प्रभृति क्रमात् ॥८०॥
नवम्यन्तं च ये मर्त्या स्नात्वा तीर्थे तु सत्तमे ॥ त्वन्मूर्तिं पूजयेयुर्ये तेषामिष्टं ददाम्यहम् ॥८१॥
इति देव्यै वरं दत्वा शङ्करोन्तर्दधे नृप ॥ एवं दुर्गा वरं लब्ध्वा शङ्करद्राजसत्तम ॥८२॥
एकांशेन तथा गत्वा यमलोकस्य दक्षिणम् ॥ द्वारं साद्यापि राजेन्द्र नन्दिनी {नाम नामतः ॥८३॥

गौरीशृङ्गेऽपरेणासावास्ते दुर्गा {मनोरमा ॥ दुर्गाकुण्डं नागतीर्थमस्ति धर्माश्रमान्नृप ॥८४॥
दक्षिणे राजशार्दूल शरपातेऽतिशोभनम् ॥ सर्वपापहरं पुण्यं सर्वयज्ञफलप्रदम् ॥८५॥
सर्वसिद्धिप्रदं नृणां नात्र कार्या विचारणा ॥ ऐश्वर्यं सिद्धिजनकं किमन्यच्छ्रोतुमिच्छसि ॥८६॥
इति श्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे गौरीशृङ्गदुर्गाकुण्ड माहात्म्यवर्णनंनामनवति तमोऽध्यायः ॥९०॥

---

वि.सू.–
दुर्गाकुण्डसमीपे एका मूर्तिः अस्ति । सा दुर्गा या तपः कृत्वा सिद्धिमवाप ॥ आरामविनायकस्य निकटे धर्माश्रमस्य दक्षिणे एका मूर्तिः अस्ति । सा दुर्गाया एकः अंशः नन्दिनी इति विख्याता । अत्र यमः इत्युक्ते धर्मः । सूर्यपुत्रत्वात् । यमधर्म इति प्रसिद्धेश्च । यमलोक इत्युक्ते भूलोके धर्माश्रमम् । तस्य दक्षिणे एव नन्दिनीमूर्तेः सत्वम् । इति मम भाति ॥

---

वि.सू.–एतस्या एव दुर्गायाः अपरः अंशः एतदुत्तराध्याये वर्णिता भद्रकाली । कथमिति चेत् इयं दुर्गा एकांशेन गौरीशृङ्गं आश्रित्य स्थिता इति अत्र वर्णितम् । उत्तराध्याये तयैव दुर्गया रक्तबीजादीनां वधः वर्णितः । पुनः सैव एका भूत्वा शुम्भमपि जघान । ततः सैव शम्भुना गोकर्णक्षेत्ररक्षार्थं गोकर्णक्षेत्रस्य पूर्वद्वारि नियुक्ता इति तत्र वर्णनात् ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ९१ ॥  NEXT>>  श्लोक संख्या–९४

## ॥ भद्रकाली–कालीह्रदवर्णनम्(आलद केरे) ॥

### दुर्गया रक्तबीजादिवधः

सूत उवाच ॥

ततो देवादयः सर्वे हते तस्मिन् महासुरे ॥ कृताञ्जलिपुटाः सर्वे स्तोत्रं चक्रुः पृथक्पृथक् ॥१॥

देवा ऊचुः ॥

देवि प्रसीद जगतां रिपुनाशनेन त्रातास्त्वया महर्षिमनुष्ययक्षाः ॥
नमोस्तु सर्वेश्वरि देवि तुभ्यं नमस्त्रिशूलासिधरे नमोस्तु ते ॥ २ ॥
त्वत्पादपङ्कजरजः शिरसा विधृत्य सृष्टिं करोति भुवनानि च पद्मयोनिः ॥

विष्णुस्तथैव परिरक्षति जीवलोकं स्थाणुस्तथैव विलयं प्रकरोति चान्ते ॥ ३॥
सृष्टिस्थित्यन्तकरणे महामोहप्रदायिनि ॥ नमोस्तु ते महामाये सर्वभूतस्थिते नमः ॥ ४॥
नमोस्तु सर्वभूतानां चिन्तानाशनतत्परे ॥ प्रकृतिस्त्वं परा सूक्ष्मा त्वां न जानन्ति देवताः ॥ ५॥
त्वय्येवोत्पद्यते सर्वस्त्वय्येव परिवर्तते ॥ त्वय्येव लीयते चान्ते कृत्स्नस्थाणुचरप्लवः ॥ ६॥
शक्तिस्त्वं सर्वभूतानां विष्णुमाये नमोस्तु ते ॥ त्वामधिष्ठाय पुरुषः परमात्मा सनातनः ॥ ७॥
पञ्चभूतमये देहे साक्षिवत् परिवर्तते ॥ योगनिद्रे नमस्तुभ्यं पाहि लोकान् सदानघे ॥ ८॥
तव प्रसादान्महिषासुरश्च वेत्रासुरश्चण्डमुण्डौ च देवि ॥
षड्भागधूम्राक्षमुखास्तथान्ये देवारयो देवि गता यमालयम् ॥९॥
स्वाहा सुराणां बलवृद्धिदा त्वं स्वधा पितृणामपि तृप्तिहेतुः ॥
विद्या विनीता विदुषां त्वमार्ये मातासि भद्रे सचराचराणाम् ॥ १०॥
त्वं श्रीः स्वयं सुकृतिनां भवनेषु लक्ष्मीः पापात्मनामपि गृहेषु सदा ह्यलक्ष्मीः ॥
लज्जासि देवि सकलप्रभवा ह्यनिन्द्ये तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ११॥
ये त्वां भजन्ति मनुजा न तेषां दुर्गतिर्भवेत् ॥ येषां प्रसन्ना चण्डेशि सुखिनस्ते सदाम्बिके ॥ १२॥
एवं संस्तूयमाना सा देवैर्देवी तदा नृप ॥ संस्थापयामास सुरान् स्वस्वस्थानेषु चाम्बिका ॥१३॥
आर्याशृङ्गं समासाद्य तत्रोवास यथासुखम् ॥१४॥

शतानीक उवाच ॥

कथं तया हतौ पापौ राक्षसौ घोरविक्रमौ ॥ निशुम्भशुम्भौ भद्रन्ते रक्तबीजो हतः कथम् ॥१५॥
कोऽसौ निशुम्भः शुम्भश्च रक्तबीजश्च सत्तम ॥ शृण्वतो न हि मे तृप्तिः सूत मे वक्तुमर्हसि ॥
१६॥

सूत उवाच ॥

स्वायम्भुवेन्तरे राजन् सम्भूतौ तौ महासुरौ ॥ असुरायां महवीर्यौ त्वाष्ट्रजज्ञे कनीयसी ॥१७॥
कस्य क्रोधवती नाम्नी रक्तबीजस्तदात्मजः ॥ ततस्ते पापकर्माणो ब्रह्मदत्तवरान्नृप ॥ १८ ॥
शोणितं नामनगरमध्यतिष्ठन् दुरात्मकाः ॥ जित्वा त्रिलोकीं शुम्भस्तु स्वयमिन्द्रो बभूव ह ॥१९॥
अन्येषां लोकपालानामधिकारं चकार ह ॥ स्वानि स्थानानि सन्त्यज्य देवाः शक्रादयो नृप ॥२०॥
ब्रह्माणं शरणं जग्मुः शुम्भदैत्यनिराकृताः ॥ ऊचुः प्राञ्जलयः सर्वे स्तुत्वा स्तोत्रैरनेकशः ॥२१॥
नष्टयज्ञोत्सवं विश्वं बभूवास्वस्थमप्युत ॥ तेजसा शुम्भदैत्यस्य भ्रष्टराज्या वयं प्रभो ॥२२॥

त्वां वयं शरणं प्राप्ता अस्मान्रक्ष जगद्गुरो ॥

सूत उवाच ॥

ततो ब्रह्मा जगत्स्रष्टा सम्मन्त्र्य सह विष्णुना ॥२३॥
प्रेषयामास भगवान्नारदं कलहप्रियम् ॥ नारदोभ्याययौ हृष्टः शुम्भं प्रति मुनिस्तदा ॥२४॥
दृष्ट्वागतं सुरमुनिमभ्युत्थायाभिवाद्य च ॥ दत्वार्घ्यमासनं तस्मै शुम्भः प्रीतोऽभवन्नृप ॥२५॥
आशीर्भिर्वर्धयामास नारदं स निशाचरः ॥ उपविष्टं सभामध्ये नारदं पर्यपृच्छत ॥२६॥
का वार्ता सम्प्रति मुने अपूर्वा तद्वदस्व मे ॥ इति पृष्टः स देवर्षिः प्रोवाचेदं वचो मुनिः ॥२७॥
सुरासुरेषु यच्छुम्भ रत्नान्याहृतवानसि ॥ एकावशिष्टा ह्यसुर तां विना त्वं न शोभसे ॥२८॥
तत्तेहं सम्प्रवक्ष्यामि स्त्रीरत्नं शृणु राक्षस ॥ सर्वलक्षणसम्पन्ना सर्वाभरणभूषिता ॥२९॥
प्रालेयशैलनिलया सर्वाश्चर्यमयी शुभा ॥ तामानयाशु भद्रन्ते सर्वेच्छां पूरयिष्यति ॥३०॥
इत्युक्त्वान्तर्दधे राजन्नारदो भगवानृषिः ॥ तच्छ्रुत्वा प्रेषयामास देव्यै शुम्भस्तु भद्रकम् ॥३१॥
स गत्वा प्राह तां देवीं दौत्यकर्मणि कोविदः ॥ देवि शुम्भस्य दूतोहं यदुक्तं तेन तच्छृणु ॥३२॥
मद्वशे वर्तते ह्यद्य त्रैलोक्यं सचराचरम् ॥ मामुद्दिश्य यजन्ते वै ऋषयः शंसितव्रताः ॥३३॥
त्रैलोक्ये यानि रत्नानि तानि मय्येव शोभने ॥ रत्नार्हा हि वयं भद्रे स्त्रीरत्नं त्वं हि शोभने ॥३४॥

तस्मादस्मानुपागच्छ भुंक्ष्व भोगान् यथेप्सितान् ॥ इत्युक्ता तेन सा देवी हास्यमुत्तरमब्रवीत् ॥३५॥

सत्यमुक्तं त्वया भद्र शुम्भोऽतीव बलान्वितः ॥ बाल्ये वयासि वर्तन्त्या मयाऽज्ञानात् प्रतिश्रुतम्
॥३६॥
यो मां जयति सङ्ग्रामे स मे भर्ता भविष्यति ॥ जित्वा मां संयुगे भद्र पाणिं गृह्णातु मे लघु
॥३७॥

दूत उवाच ॥

त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥ इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥३८॥
तस्माद्गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ॥

देव्युवाच ॥

मया पूर्वं प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ॥३९॥

बहुनात्र किमुक्तेन गच्छ ब्रूहि मयोदितम् ॥ तच्छ्रुत्वा शुम्भमागम्य कथयामास तद्वचः ॥४०॥
दूतोक्तं तद्वचः श्रुत्वा शुम्भः क्रोधविमूर्छितः ॥ रक्तबीजमथोवाच गच्छ दैत्य हिमालयम् ॥४१॥
स्वसैन्यैः सह संयुक्तस्तामिहानय चण्डिकाम् ॥ स तथेति प्रतिज्ञाय प्रालेयं शैलमागमत् ॥४२॥
गत्वा तां चण्डिकामाह एह्येहीति पुनःपुनः ॥ यदि सान्त्वेन नायासि बलात्त्वां च नयाम्यहम् ॥४३॥

इत्युक्त्वा सोभ्यधावत्तामसुरः कालचोदितः ॥ ततो युद्धमभूद्घोरं तया सह दुरात्मनः ॥४४॥
तमैन्द्री ताडयामास वज्रेणास्राणि सुस्रुवुः ॥ तेभ्यो दैत्याः समुद्भूताः शतशोथ सहस्रशः ॥ ४५ ॥
तद्रूपास्तद्बला राजन् ते चापि युयुधे रणे ॥ चक्रेण वैष्णवी राजन् ताडयामास राक्षसम् ॥४६॥
सुस्राव बहुधा रक्तं राक्षसा बहुशोऽभवन् ॥ तैश्च रक्तोद्भवैर्दैत्यैः पूरिताभूद्वसुन्धरा ॥४७॥
ततो देवगणाः सर्वे दुद्रुवुः सर्वतो दिशम् ॥ राक्षसानां बलं वीक्ष्य चुकोप परमेश्वरी ॥ ४८॥
देव्या मुखाद्विनिष्क्रान्ता विश्वरूपातिविस्तृता ॥ सहस्रभुजसंयुक्ता महादंष्ट्रा दिशोरिहा ॥४९॥
अभ्येत्य चण्डिकामाह किङ्करोमि प्रशाधि माम् ॥ तामाह दुर्गा चामुण्डा विस्तीर्णं वदनं कुरु ॥५०॥

मच्छस्त्रपातसम्भूतान् रक्तबिन्दूंश्च राक्षसान् ॥ वक्त्रेणानेन भद्रन्ते भक्षय त्वं वरानने ॥५१॥
नोत्पत्स्यन्ति पुनस्ते हि क्षीणे रक्ते तु राक्षसाः ॥ ततस्तं निहनिष्यामीत्युक्ते देव्या तु कालिका ॥५२॥
ददार वक्त्रकुहरं ततो दैत्यान् जघान सा ॥ शूलेन गदया शक्त्या बाणैरसिभिरिष्टिभिः ॥५३॥
काली रक्तास्थिमांसानि भक्षयामास तत्क्षणात् ॥ ततोऽक्षीयन्त रक्षांसि रक्तबीजे मृते नृप ॥५४॥
तदा खड्गेन चण्डेशी रक्तबीजशिरोऽहरत् ॥ तस्मिन् हते मुदं प्रापुर् ऋषयो देवतागणाः ॥५५॥
देवी तस्यै चकाराथ महाकालीति चाभिधाम् ॥

सूत उवाच ॥

रक्तबीजं हतं श्रुत्वा ससैन्यौ राक्षसाधिपौ ॥५६॥
असंख्येयैः परिवृतौ राक्षसैर्घोरविक्रमैः ॥ जग्मतुस्तौ महादैत्यौ यत्रास्ते भद्रकर्णिका ॥
दृष्ट्वा तद्राक्षसबलं ज्याघोषमकरोत् तदा ॥५७॥
ततो ववर्षुस्तां देवीं शरवर्षेण दानवाः ॥ ततो देवशरीरेभ्यो निर्गताः सर्वशक्तयः ॥५८॥
निर्जघ्नुर्दानवान् सर्वान् सायुधास्ते लयं ययुः ॥ ततो युद्धमभूद्घोरं देव्याः शुम्भनिशुम्भयोः ॥५९॥

ततः शुम्भो निपत्योच्चैर्मूर्ध्नि सिंहमताडयत् ॥ ततः क्रुद्धा शरैर्देवी विव्याध हृदयेऽसुरम् ॥६०॥
धनुरस्याच्छिनद्देवी शरेणानतपर्वणा ॥ ततश्चिक्षेप परिघं दैत्यो देव्यै महाबलः ॥६१॥
तं शरेण द्विधा चक्रे परिघं परमेश्वरी ॥ राक्षसान्तकरं देवी निशुम्भायाक्षिपन्नृप ॥६२॥
तन्निशुम्भासुरमादाय जगाम धरणीतलम् ॥ स पपात क्षितौ पापश्छिन्नमूल इव द्रुमः ॥६३॥
तस्मिन्निपतिते घोरे निशुम्भे घोरविक्रमे ॥ भ्रातास्य बलवान् शुम्भः क्रोधमाहारयद्भृशम् ॥६४॥
रथेनाकाशवेगेन वियतिस्थोऽभ्यवर्षत ॥ नानाविधानि शस्त्राणि नानारूपधरोऽसुरः ॥६५॥
ज्याशब्दं कुर्वती देवी उत्पपात विहायसम् ॥ उत्प्लुत्याकाशमसुरं जघान स मृगाधिपः ॥६६॥
ततश्चान्यान् महादेवी जघानाशु निशाचरान् ॥ दुरात्मन् तिष्ठ तिष्ठेति अभ्यधावत्तदाम्बिका ॥६७॥
ततः शुम्भोप्युवाचेदं देवीं प्रति नृपोत्तम ॥ अन्यासां बलमाश्रित्य निशुम्भं हतवत्यसि ॥६८॥

देव्युवाच ॥

एकैवाहं जगत्यस्मिन्नेता मम विभूतयः ॥ इत्युक्त्वा चाहरद्देवी ताः शक्तीः पुनरात्मनि ॥६९॥
एका भूत्वा तदा देवी शुम्भमभ्यद्रवद्युधि ॥ शस्त्रास्त्रैर्बहुधा मुक्तैर्युयुधाते परस्परम् ॥७०॥
शुम्भः खड्गमुपादाय देवीमभ्यपतद्रणे ॥ तस्यापतत एवाशु चण्डिका सा चतुःशरैः ॥७१॥
चतुरोश्वान् पातयित्वा सारथेश्च शिरोऽहरत् ॥ स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥७२॥
मुष्टिमुद्यम्य वेगेन मूर्ध्नि सिंहमताडयत् ॥ ततः क्रुद्धा जगन्माता देवी चक्रमुपाददे ॥७३॥
दुर्दर्शनममित्राणां देवानाञ्च सुदर्शनम् ॥ सहस्रसूर्यप्रतिमं देवानां भयनाशनम् ॥७४॥
वैष्णवं तद्धि चिक्षेप वधायास्य दुरात्मनः ॥ आक्रम्य कण्ठदेशे तु शिरश्चिच्छेद रक्षसः ॥७५॥
स गतासुः पपातोर्व्यां वज्राहत इवाचलः ॥ तं दृष्ट्वा पतितं भूमौ हतशिष्टा निशाचराः ॥७६॥
पाताळमगमन् भीताः सहिता दैत्यदानवैः ॥ ववौ वायुः सुखस्पर्शः पुष्पवृष्टिः पपात च ॥७७॥
देवदुन्दुभयो नेदुर् ननृतुश्चाप्सरोगणाः ॥ तुष्टुवुर्निहते तमिन् देवीं देवाः सहर्षिभिः ॥७८॥
इन्द्रादयः स्वधिष्ण्यानि सम्प्राप्य सुखिनोऽभवन् ॥

## भद्रकाली–कालीह्रदः–महाकाल्याश्रमम्

सूत उवाच ॥

एवं सा राक्षसान् हत्वा शुम्भादीन् भद्रकालिका ॥ ७९ ॥
स्वान्यायुधानि संक्षाल्य शतशृङ्गतटेऽमले ॥ तपसे कृतसङ्कल्पा आस्ते सा दक्षिणामुखा ॥८०॥

आयुधानि क्षालितानि यत्र वै कुरुसत्तम ॥ तत्कालीह्रदमाख्यातं दर्शनात् पुण्यवर्धनम् ॥८१॥
तत्र स्नानञ्च कुर्वीत शुभे कालीह्रदे नृप ॥ दृष्ट्वैव पूजां कुर्वीत तदनन्तफलप्रदम् ॥८२॥
महाकालीं समभ्यर्च्य सर्वान् कामानवाप्नुयात् ॥ आयुरारोग्यमैश्वर्यं कार्यसिद्धिञ्च विन्दति ॥८३॥
गोकर्णक्षेत्ररक्षार्थं नियुक्ता शम्भुना हि सा ॥ तदारभ्य महाकाली शम्भोराज्ञां प्रगृह्य च ॥८४॥
क्षेत्रस्यास्य महाराजन् पूर्वद्वारि स्थिता शुभा ॥ दुष्टबाधादिकं यच्च महामार्युद्भवं तथा ॥८५॥
शमयत्येव सा देवी तस्मिन् क्षेत्रे कुरूद्वह ॥ नवम्यां ये समागम्य महाकालीं नृपोत्तम ॥ ८६॥
पञ्चामृतैः पञ्चगव्यैः शुद्धतोयैः समन्त्रकैः ॥ गन्धैर्माल्यैर्धूपदीपैर्नैवेद्यैर्विविधैरपि ॥८७॥
सुरामांसोपहारैश्च स्त्रीणाञ्चैव समर्चनैः ॥ पूजाञ्चैव प्रकुर्वन्ति आश्विने तु विशेषतः ॥८८॥
तेषामभीष्टसिद्धिः स्यान्नात्र कार्या विचारणा ॥ महाकाल्याश्रमं पुण्यं सर्वपापप्रणाशनम् ॥८९॥
तादेतद्द्वयोन्यास्तु प्राच्यां दिशि हि विद्यते ॥ शरपातोपरि शुभं दर्शनात् सिद्धिदं नृणाम् ॥९०॥
महाकाल्याश्रमाद्राजन् वायव्यां दिशि संस्थितम् ॥ अधोभागे महापुण्यं तीर्थं पापप्रणाशनम् ॥९१॥
कालीह्रदमिति ख्यातं दर्शनान्मुक्तिदं नृणाम् ॥

---

तस्माद्वायव्यदिग्भागे क्रोशमध्ये तु पावनम् ॥ ९२॥
रुद्रपादमिति ख्यातं सर्वपापप्रणाशनम् ॥ तत्र पिण्डप्रदानेन तथैव तिलतर्पणात् ॥९३॥
तृप्ताः स्वर्गं गमिष्यन्ति नरकस्था अपि नृप ॥ पितरस्तेषु आपन्ना किमन्यच्छ्रोतुमिच्छसि ॥९४॥
इतिश्रीस्कान्देसनत्कुमारसंहितायांगोकर्णखण्डे कालीह्रदवर्णनंनाम एकनवतितमोऽध्यायः ॥ ९१ ॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ९२ ॥ NEXT>> श्लोक संख्या–७१

## ॥ रुद्रपादमहिमानुवर्णनम् ॥

### सुहोत्रकथा–रुद्रपादमहिमा

शतानीक उवाच ॥

रुद्रपाद इति ख्यातं भवता सूतनन्दन ॥ कुतः पितॄणां श्रेष्ठं स्यात् सिद्धिः को वाऽत्र शंस मे ॥१॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि रुद्रपादस्य सम्भवम् ॥ समासेन कुरुश्रेष्ठ सर्वाघौघहरं परम् ॥ २॥

मथुरायां द्विजः कश्चित् सुहोत्र इति विश्रुतः ॥ आस्ते तत्रातिलोभेन धनार्जनपरः सदा ॥३॥
ब्रह्मक्षत्रविशः शूद्रान् याजयन् परवञ्चकः ॥ महादानानि सङ्गृह्णन् कुर्वन् दुष्टप्रतिग्रहम् ॥४॥
पर्वकालेषु सर्वेषु दानं गृह्णन् विशेषतः ॥ न व्ययं कृतवान् सोपि लोभेन महता युतः ॥५॥
पित्रोः श्राद्धदिने चापि प्रतिगृह्णन् द्विजाधमः ॥ पुण्यर्क्षे पुण्यदिवसे ग्रहणे चन्द्रसूर्ययोः ॥६॥
न दत्तं विप्रमुख्येभ्यो धनं वा धान्यमेव वा ॥ लिङ्गार्चनं लिङ्गदानं हरिपूजार्चनं गुरोः ॥७॥
हरिशङ्करयोश्चैव कीर्तनं स्मरणं तथा ॥ मासत्रयव्रतं चैव चातुर्मास्यव्रतं तथा ॥८॥
एकादशीव्रतञ्चैव जयन्तीन्दुदिने तथा ॥ अयने च तथा सौरं गाणपत्यं च दौर्गिकम् ॥९॥
तथा युगादिमन्वादिव्रतमश्वत्थसेवनम् ॥ वृन्दावनार्चनं चैव कार्तिके मासि वै नृप ॥१०॥
दीपार्चनं तथादानं न कृतं तेन पापिना ॥ एवं कतिपयाहस्सु गतेषु भरतर्षभ ॥११॥
द्रव्यार्जनाय विप्रः स एकदाऽगात् स्वधिष्ण्यतः ॥ देशाद्देशमनुक्रामन् पुण्यक्षेत्रादिकं द्विजः ॥१२॥
तत्र तत्रार्जितं वित्तं न दत्तं तेन पापिना ॥ ययौ सह्याद्रिविपिनं भृत्यैः कतिपयैः सह ॥१३॥
तत्र सह्याटवीमध्ये सुहोत्रो दृष्टवान्नृप ॥ विच्छायं बहुशाखाढ्यं निष्पत्रं शाल्मलीतरुम् ॥१४॥
शाखेषु लम्बमानांश्च ऊर्ध्वपादानधोमुखान् ॥ शुष्ककण्ठान् बृहद्वक्त्रानधरोष्ठभयानकान् ॥१५॥
बृहत्कायान् विकारांश्च शुष्ककण्ठोष्ठतालुकान् ॥ हा हेति क्रन्दमानांश्च क्षुत्तृड्भ्यां परिपीडितान् ॥१६॥
सुहोत्रोऽतीवसन्त्रस्तो दृष्ट्वा तान् विकृताननान् ॥ वेगेन महताविष्टो गन्तुं समुपचक्रमे ॥१७॥
द्राव्यमाणं सुहोत्रं ते पिशाचा दुःखितास्तदा ॥ ज्ञात्वा स्वगोत्रजं तं वै प्रोचुश्च दीनदीनवत् ॥१८॥

पिशाचा ऊचुः ॥

सुहोत्रागच्छ भद्रन्ते पुत्र मा भैश्च साम्प्रतम् ॥ पालयास्मान् पितॄन् तेद्य क्षुत्तृड्भ्यां परिपीडितान् ॥१९॥
अस्मत्कर्मानुसारेण प्राक्तनेन तु पुत्रक ॥ तत् त्वादृशेन पापेन पैशाचीं योनिमागतान् ॥२०॥
पतमानान् सुघोरे तु नरके कालसूत्रके ॥ स्वपितॄणां वचः श्रुत्वा सुहोत्रोऽतीवविह्वलः ॥२१॥
तद्वृक्षमूलमागत्य पितॄन् दृष्ट्वाऽतिदुःखितान् ॥ साष्टाङ्गं प्रणिपत्याह दुःखेन महाता युतः ॥२२॥
पापोहं पापकर्माहं पापात्मा पापसम्भवः ॥ मया कृतेन पापेन यूयं पैशाच्यमागताः ॥२३॥
मया कृतश्चापराधः क्षन्तव्यश्च हि साम्प्रतम् ॥ युष्माकं येन पुण्येन मत्कृतेन हितं भवेत् ॥२४॥
तद्वदध्वं करिष्येऽहं पुण्यं स्वर्गप्रदायकम् ॥ पुत्रस्य वचनं श्रुत्वा सुहोत्रस्य तदा नृप ॥२५॥

पितरस्तं पुनः प्रोचुर्दुःखहर्षसमन्विताः ॥ शृणु पुत्र प्रवक्ष्यामो ह्यस्माकं यद्धितं भवेत् ॥२६॥
गच्छ त्वमद्य गोकर्णं शैवं क्षेत्रमनुत्तमम् ॥ क्षिप्रं सिद्धिकरं नृणां भुक्तिमुक्तिप्रदायकम् ॥२७॥
पश्चिमस्योदधेस्तीरे आस्ते तत्क्षेत्रमुत्तमम् ॥ तत्र वैवाहिको नाम गिरिरास्ते शिवप्रियः ॥२८॥
तत्प्रतीच्यां दिशि सुत शरपाते शुभेस्थले ॥ रुद्रपादं नाम सुत वर्तते तच्छिलातले ॥२९॥
पुरा राजा मित्रसहः सूर्यवंशसमुद्भवः ॥ वसिष्ठेनैव शप्तः सन् रक्षस्त्वं समुपागतः ॥३०॥
तेनैव रोषेण मुनेः पुत्रानेकोत्तरं शतम् ॥ भक्षयामास दुष्टात्मा राक्षसो घोरदर्शनः ॥३१॥
दुर्मृतित्वं ततः प्राप्ता वसिष्ठस्य सुता सुत ॥ तेषां तद्दोषशान्त्यर्थं शक्तिपुत्रः पराशरः ॥३२॥
वसिष्ठेन समाज्ञप्तो गोकर्णं क्षेत्रमागमत् ॥ रुद्रपादं प्रतिष्ठाप्य तीर्थं कृत्वा सुनिर्मलम् ॥३३॥
तपसा महता युक्तस्तोषयामास शङ्करम् ॥ तदाज्ञया तत्र मुनिः श्राद्धं चक्रे विधानतः ॥३४॥
पिण्डं तिलोदकं दत्वा स्वपितृभ्यः समाहितः ॥ ततः शक्त्यादयः सर्वे वसिष्ठस्यात्मजाः सुत ॥३५॥

तृप्ताः सर्वे ब्रह्मलोकं जग्मुः सर्वसुखावहम् ॥ तस्मात् सुहोत्र त्वमपि तत्र गत्वा विधानतः ॥३६॥
तपश्चर महाबुद्धे तत्पादं सम्यगर्चयन् ॥ श्राद्धं कुरु विधानेन दानं वित्तानुसारतः ॥३७॥
पितॄन् सर्वान् प्रणम्याशु तेभ्योऽनुज्ञां प्रगृह्य च ॥ तत्क्षणात् प्रययौ राजन् गोकर्णक्षेत्रमुत्तमम् ॥३८॥

रुद्रपादं समागम्य तपश्चर्तुं प्रचक्रमे ॥ नित्यं त्रिषवणं स्नानं कुर्वन् स वरुणालये ॥३९॥
तत्तीर्थेपि नृपश्रेष्ठ नियतः शुद्धमानसः ॥ बद्धपद्मासनो मौनी संयम्यात्मानमात्मनि ॥४०॥
नित्यश्राद्धं चरन् विप्रो देवर्षिपितृतर्पणम् ॥ शिवपूजापरो नित्यं कुर्वन् ब्राह्मणतर्पणम् ॥४१॥
कुर्वन् दानानि बहुशो पितृणां मुक्तये नृप ॥ स्वयं भुञ्जन् हविष्यान्नं ब्राह्मणानुज्ञया नृप ॥४२॥
उपविश्य शुचिर्भूत्वा विप्रैः कतिपयैः सह ॥ पुराणश्रवणं कुर्वन् ब्रह्मध्यानपरायणः ॥४३॥
प्रदोषे शिवमभ्यर्च्य नृत्यगीतपरोऽभवत् ॥ एवं प्रतिदिनं विप्रो बभूव नियमप्रियः ॥४४॥
ततो बहुतिथे काले शिवः प्रत्यक्षतां गतः ॥ दृष्ट्वा सुहोत्रं शम्भुस्तु इदमाह कुरूद्वह ॥४५॥
तुष्टोऽस्मि नितरां ब्रह्मन् भक्त्या चानन्यया तव ॥ वरं वरय भद्रन्ते यत्तेऽभिलषितं हृदि ॥४६॥
तद्दाम्यविलम्बेन वाञ्छितं ते न संशयः ॥ इत्युक्तः शम्भुना विप्रः सुहोत्रो भरतर्षभ ॥४७॥
दृष्ट्वा रुदन् ननामोर्व्यां स्तुत्वा च विविधैस्तवैः ॥ कृताञ्जलिपुटो भूत्वा वरं वव्रे मनोगतम् ॥४८॥

वरं ददासि चेन् मह्यं वरार्हो यदि चाप्यहम् ॥ मया लोभेन महता न कृतः पुण्यसञ्चयः ॥४९॥
पितृणां मुक्तिदं कर्म न कृतं पापिना मया ॥ तस्मान्मत्पितरः सर्वे पिशाचत्वमुपागताः ॥५०॥
यद्यस्ति मयि कारुण्यं पितृणां मुक्तिदो भव ॥ त्वत्पादकमले भक्तिं नितरां देहि मे प्रभो ॥५१॥
सुहोत्रेणैवमुक्तस्तु शङ्करो भक्तवत्सलः ॥ तं प्राह वचनं भूयः सुहोत्रं भरतर्षभ ॥५२॥
यत्तेऽभिलषितं सर्वं मत्प्रसादाद्भविष्यति ॥ अत्रागत्य नरो यस्तु कन्यासंस्थे दिवाकरे ॥५३॥
पितॄनुद्दिश्य सङ्कल्प्य काले कुतपसंज्ञिते ॥ श्राद्धं कुर्वन् रुद्रपादे पितृणां मुक्तिदे द्विज ॥५४॥
पिण्डं तिलोदकं चैव पितॄनुद्दिश्य यो ददेत् ॥ उद्धृत्यैकोत्तरशतं कुलं च स नरोतमः ॥५५॥
मम लोकमनुप्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥ ततोऽमृतत्वं लभते मत्प्रसादान्न संशयः ॥५६॥
तस्मात् कुरु द्विजश्रेष्ठ पितॄन् प्रति यथाविधि ॥ पिण्डं तिलोदकं चापि मोक्ष्यसे पैतृकादृणात् ॥५७॥
ततस्त्वं प्राप्स्यसि ब्रह्मन् पितृभिः सह मत्पदम् ॥ इत्युक्त्वा ब्राह्मणं राजन् तत्रैवान्तर्दधे शिवः ॥५८॥
ततः सुहोत्रोऽभिमतं वरं प्राप्य महेश्वरात् ॥ यथोक्तं शम्भुना सर्वमकार्षीत् सुसमाहितः ॥५९॥
ततस्तत्पितरो जग्मुर्ब्रह्मलोकं मुदान्विताः ॥ सुहोत्रोपि द्विजश्रेष्ठो भुक्त्वा भोगान् यथेप्सितान् ॥६०॥
अन्ते जगाम कैलासं पुनरावृत्तिवर्जितम् ॥

सूत उवाच ॥

तस्माच्छ्रेष्ठतमश्चासीद्रुद्रपादो महीपते ॥६१॥
पितृणां परमं स्थानं सद्यस्तुष्टिकरं नृप ॥ पिता माता च भार्या च दुहिता भगिनी तथा ॥६२॥
मातृष्वसा पितृष्वसा सप्तैते गोत्रिणो नृप ॥ उद्धरेत् सप्तगोत्राणि कुलमेकोत्तरं शतम् ॥६३॥
ब्राह्मणक्षत्रियविशां शूद्राणां योषितामपि ॥ जातानां जायमानानां नारीणाञ्च नृणामपि ॥६४॥
मृतानां म्रियमाणानामेतत् कैवल्यदायकम् ॥ विषाग्निजलवृक्षाहिशृङ्गिशस्त्राश्मवृश्चिकैः ॥६५॥
नखिभिर्दन्तिभिः पाशैर्ये हताः कर्मवर्जिताः ॥ अग्निहीनाश्च कूष्माण्डमन्त्रहीनाः पिशाचकाः ॥६६॥

महादानगृहीतारस्तथा दुष्टप्रतिग्रहाः ॥ ब्रह्मराक्षसतां प्राप्तास्तत्पुत्रो वर्तते यदि ॥६७॥
रुद्रपादे पिण्डदाता भवेद्यदि नरोत्तम ॥ तेपि पापविनिर्मुक्ताः प्रयान्ति ब्रह्मणः पदम् ॥६८॥

---

## अधर्माश्रमादीनामुपक्रमः

तस्मादर्धक्रोशमात्रे उदीच्यां वर्ततेनृप ॥ अधर्मस्याश्रमं रम्यं तीर्थमस्ति सुनिर्मलम् ॥६९॥
तत्र स्नातस्य मर्त्यस्य अधर्मोत्थं भयं न हि ॥ अधर्मस्तपसा राजन् प्रसाद्य परमेश्वरम् ॥७०॥
प्राप्तवानीप्सितान् कामान् किमन्यच्छ्रोतुमिच्छसि ॥

इति श्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे रुद्रपादमहिमानुवर्णनंनाम द्व्युत्तरनवतितमोऽध्यायः ॥९२॥

 अध्यायाः    अकारादि    <<BACK     ॥ अध्यायः ९३ ॥     NEXT>>     श्लोक संख्या–७५

॥ अधर्माश्रमादि वर्णनं ॥

A¥d«ddÚd«d - A±dSdd - «dd£±dSd - ¸¶d¥d - Ù°d - A´d«dd - C°Sdd - A¬d´«df - œddT - «ddU£dfºd®dPd¦d £d¤dd
´d«dd,±d£Sd,Q«d,I¶fe£d,AeU±dd,Ad¦d¦Q,©deÕ,«dd¦d,
¬d´«df,¬d¡¡dd,Úde£d,±«de£d,«d¥dd¦dd £dfºdde¦d ||

---

## अधर्माश्रमम्

शतानीक उवाच ॥

कां सिद्धिं लब्धवांस्तत्र अधर्मो लोकदूषितः ॥ कथं सिद्धः समभवत् सूत नो वक्तुमर्हसि ॥१॥

सूत उवाच ॥

धर्माधर्मौ पुरा राजन् द्वेषेण महता युतौ ॥ अन्योन्यं कलहासक्तौ अधर्मो निर्जितस्तदा ॥२॥
अतीवविह्वलो भूत्वा धर्मं जेतुं मनो दधे ॥ प्रतोष्य शङ्करं तप्त्वा धर्मं जेष्यामि यत्नतः ॥३॥
इत्येवं निश्चितो भूत्वा शिवध्यानपरो भवत् ॥ एतस्मिन्नन्तरे काले वागुवाचाशरीरिणी ॥४॥
अधर्म शृणु मद्वाक्यं त्यज चिन्तां ब्रवीमि ते ॥ त्वमाशु गच्छ गोकर्णं कृत्वा तत्राश्रमं शुभम् ॥५॥
तीर्थं कृत्वा विधानेन तपश्चर महामते ॥ ततस्तेवाञ्छितं शीघ्रं भविष्यति न संशयः ॥६॥
नूनं शिवप्रसादेन यद्यपि स्यात् सुदुर्लभम् ॥ इत्युदीर्य नभोवाणी ह्यधर्मं भरतर्षभ ॥७॥
तूष्णीं बभूव तत्रैव ततो हर्षमवाप्तवान् ॥ गोकर्णक्षेत्रमागत्य वायव्यां चक्रतीर्थतः ॥८॥

---

शरपाते शुभे देशे कृत्वाश्रमपदं शुभम् ॥ तीर्थं कृत्वा तपस्तेपे दुश्चरं च जितेन्द्रियः ॥९॥
बद्धपद्मासनो मौनी वाय्वम्बुकृतभोजनः ॥ संनियम्येन्द्रियग्रामं मनसा निश्चलेन सः ॥१०॥
एवं तपस्यतस्तस्य ह्यधर्मस्य कुरूद्वह ॥ दिव्यद्वादशवर्षाणि ययुस्तत्र क्षणादिव ॥११॥
ततस्तस्य प्रसन्नोऽभूच्छङ्करो भक्तवत्सलः ॥ आविर्बभूव पुरतो ह्यधर्मस्य तदा नृप ॥१२॥
दृष्ट्वा तं प्राह गिरिशो वरं वयर पुत्रक ॥ तत उन्मील्य नयने दृष्ट्वा शम्भुं पुरःस्थितम् ॥१३॥
प्रणम्य दण्डवद्भूमौ स्तोतुं समुपचक्रमे ॥

अधर्म उवाच ॥

नमस्ते देव देवेश प्रणतार्तिप्रभञ्जन ॥१४॥
नमस्ते पार्वतीकान्त भक्तानुग्रहकारक ॥ नमस्ते कामदहन कालान्तक कृपाकर ॥१५॥
त्राहि मां शरणं प्राप्तं सपत्नभयपीडितम् ॥ यथा सपत्नजनितदुःखं मे न भवेत् क्वचित् ॥१६॥
तथा कुरुष्व देवेश प्रसन्नश्चेत् सदाशिव ॥ इदं मया कृतं तीर्थं सर्वपापहरं भवेत् ॥१७॥
अत्राप्लुतानां मर्त्यानामधर्मं शमय प्रभो ॥ एवमुक्ते ह्यधर्मेण शङ्करः प्रत्युवाच ह ॥१८॥
तथास्तु मत्प्रसादेन ह्यधर्म तव वाञ्छितम् ॥ अन्त्ये कालियुगे प्राप्ते ईप्सितं ते भविष्यति ॥१९॥
तदा क्षीणत्वमायातु धर्मो वै मत्प्रसादतः ॥ त्वया कृतमिदं तीर्थं त्वन्नाम्ना ख्यातिमेष्यति ॥२०॥
अत्रागत्य नरो यस्तु कार्तिक्यामिन्दुवासरे ॥ अर्चन् मां नियतो भूत्वा जपन् पञ्चाक्षरीमनुम् ॥२१॥

त्वद्भयान्मुच्यते सोपि देहान्ते मां समाप्नुयात् ॥ इति दत्वा वरं शम्भुरधर्माय कुरूद्वह ॥२२॥
तत्रैवान्तर्दधे सद्यः शङ्करो भरतर्षभ ॥ अधर्मो वाञ्छितां सिद्धिं प्राप्य शम्भोः प्रसादतः ॥२३॥
मुदा परमया युक्तो यथाकामं चचार ह ॥

---

## असूयाश्रमं

तस्मादुत्तरदिग्भागे शरपाते शुभे स्थले ॥२४॥
सर्वपापहरं पुण्यं असूयाश्रम मुत्तमम् ॥ तत्राप्लुतानां मर्त्यानामसूया न भवेत् क्वचित् ॥२५॥

---

## मात्सर्याश्रमं

तस्मादीशान्यदिग्भाग ` शरपातद्वये स्थले ॥ सर्वाघौघहरं रम्यं मात्सर्याश्रम मुत्तमम् ॥२६॥
स्नातानां तत्र मर्त्यानां मात्सर्यं न भवेन्नृप ॥

---

## क्रोधतीर्थं

तस्मादुत्तरदिग्भागे क्रोधतीर्थं मनोहरम् ॥२७॥
तत्राप्लुतानां क्रोधस्तु न भवेज्जन्मजन्मनि ॥

---

## द्वेषतीर्थं

तस्मादुत्तरदिग्भागे द्वेषतीर्थं शुभावहम् ॥२८॥
तत्रावगाहनान्नृणां न स्याद् द्वेषो हि कुत्रचित् ॥

---

## अक्षमातीर्थ

तस्मादुत्तरदिग्भागे शतपातमिते स्थले ॥२९॥
अक्षमातीर्थ मित्यन्यत् सर्वकिल्बिषनाशनम् ॥ स्नातानां मनुजानां तु क्षमा भवति नित्यशः ॥३०॥

---

## ईर्ष्यातीर्थं

तस्मादुत्तरदिग्भागे ईर्ष्यातीर्थं नृपोत्तम ॥ तत्रावगाहनान्नृणामीर्ष्या न स्यात् कदाचन ॥३^१॥

---

## अलक्ष्मीतीर्थ

तस्मादीशान्यदिग्भागे शरपातप्रमाणतः ॥ सर्वपापक्षयकरं अलक्ष्मीतीर्थ मुत्तमम् ॥३२॥
स्नातानां मनुजानां तु दारिद्र्यं न भवेन्नृप ॥

---

## घोरतीर्थं

तस्मादुत्तरदिग्भागे घोरतीर्थं मनोहरम् ॥३३॥

---

## मोहतीर्थं

तस्मादुत्तरदिग्भागे मोहना तीर्थं मुत्तमम् ॥ अधर्मप्रभवा ह्येते दुःखेन महता युताः ॥३४॥
निर्जिता धर्मपुत्रैस्ते सत्यप्रभृतिभिर्नृप ॥ गोकर्णं क्षेत्रमासाद्य कृत्वाश्रमपदं शुभम् ॥ ३५॥
तीथ ँ कृत्वा सुविपुलं तपस्तेपुः सुदुश्चरम् ॥ तेषां तपस्यतां तत्र बहुकालोऽत्यगान्नृप ॥३६॥
तदन्ते भगवान् शम्भुस्तेषां प्रत्यक्षमागमत् ॥ ततस्ते शङ्करं दृष्ट्वा प्रणम्योचुः पृथक्पृथक् ॥३७॥
देव देव नमस्तेस्तु करुणाकर शङ्कर ॥ भक्तप्रिय नमस्तेस्तु अन्धकारप्रमर्दन ॥३८॥
स्कन्दप्रिय नमस्तेस्तु कलिकल्मषनाशन ॥ त्राहि त्राहि कृपासिन्धो शरणागतवत्सल ॥३९॥

इति स्तुत्वा जगन्नाथं तूष्णीमासंस्तदा नृप ॥ ततः प्रसन्नो भगवान् तेषां शम्भुः कुरूद्वह ॥४०॥

उवाच वचनं शम्भुर् ह्यधर्मस्यात्मजान् तदा ॥ तुष्टोस्मि नितरां पुत्रास्तपसा च दमेन च ॥४१॥

वरं ब्रूत यथाकामं तद्ददाम्यविलम्बितम् ॥

असूयादय ऊचुः ॥

यदि दास्यसि देवेश वरानभिमतान् हि नः ॥४२॥

सपत्नजनितं दुःखमस्माकं न भवेद्यथा ॥ तथा कुरुष्व देवेश प्रसन्नो यदि साम्प्रतम् ॥४३॥

अस्मत् कृतानि तीर्थानि भुक्तिमुक्तिप्रदानि वै ॥ भवन्तु मनुजानां तु सर्वकामप्रदानि च ॥४४॥

शङ्कर उवाच ॥

तीर्थेष्वत्राप्लुतानां तु मनुजानां तु तद्भयम् ॥ युष्मत्सञ्जनितं यच्च न भवेत् क्वापि मानदाः ॥४६॥

सपत्नजनितं दुःखं युष्माकं न भवेत् कलौ ॥ कलौ युगे च तान् सर्वान् यूयं जयत निश्चितम् ॥
४७॥

इति दत्वा वरानिष्टान् तेषां चैव पृथक्पृथक् ॥ तत्रैवान्तर्दधे सद्यस्तेपि सिद्धिं परां गताः ॥४८॥

---

क्षमा,सत्य,दम,कीर्ति,अहिंसा,आनन्द,बुद्धि,मान,लक्ष्मी,लज्जा,धृति,स्मृति,मेधानां तीर्थानि ॥

ततः कलियुगे प्राप्ते प्रबलास्तेऽभवन्नृप ॥ धर्मपुत्रांस्ततो जघ्नुः क्रोधेन महाता युताः ॥४९॥

क्षमादयो हि राजेन्द्र निर्जितास्तेऽभवन् तदा ॥ दुःखेन महताविष्टा ब्रह्मलोकं ययुस्ततः ॥५०॥

क्षमा सत्यं दमः कीर्तिरहिंसाऽऽनन्द एव च ॥ बुद्धिर्मानस्तथा राजन् लक्ष्मीर्लज्जा धृतिः स्मृतिः ॥
५१॥

तथा मेधा धर्मसुता ब्रह्माणं शरणं ययुः ॥ पितामह नमस्तेस्तु त्राह्यस्मान् दुःखसागरात् ॥५२॥

ब्रह्मन्नधर्मपुत्रैस्तु वयं दुःखमुपागताः ॥ तान् पराजित्य पाह्यस्मान् त्वत्पादकमलं गतान् ॥५३॥

ब्रह्मोवाच ॥

युष्मद्दुःखापनोदार्थमुपायं वच्मि साम्प्रतम् ॥ पश्चिमस्योदधेस्तीरे क्षेत्रमस्ति महत्तमम् ॥५४॥

गोकर्णाख्यं धर्मपुत्राः क्षिप्रं सिद्धिकरं परम् ॥ तत्र शालूकिनी नाम नदी सर्वाघनाशिनी ॥५५॥

तस्यास्तीरे पुरा सिद्धो मेरुः कनकपर्वतः ॥ मुक्त : सपत्नदुःखेन अचिरादेव सत्तमाः {॥५६॥

सर्वे यूयं तत्र गत्वा शालूकिन्यास्तटे शुभे ॥ लिङ्गं संस्थाप्य विधिवत्तपः कुरुत पुत्रकाः ॥५७॥

अचिरेणैव कालेन प्रसादाच्छूलपाणिनः ॥ युष्माकं शत्रुजनितदुःखं नश्यति च ध्रुवम् ॥५८॥

इत्युक्ता ब्रह्मणा राजन् ततो धर्मसुता ययुः ॥ गोकर्णं क्षेत्रमासाद्य शालूकिन्यास्तटे शुभे ॥५९॥
तीर्थं कृत्वा सुविमलं तपस्तेपुः सुदुश्चरम् ॥ निराहारा जिताश्वासा ध्यायन्तो शङ्करं हृदि ॥६०॥
एवं तपस्यतां याते बहुकाले महेश्वरः ॥ आविर्बभूव पुरतः तेषां भरतसत्तम ॥६१॥
दृष्ट्वा पुरःस्थितं शम्भुं धर्मस्य तनयास्तदा ॥ प्रणम्य दण्डवद्भूमौ कृताञ्जलिपुटा स्थिताः ॥६२॥
ततो दृष्ट्वा धर्मसुतान् शङ्करो भरतर्षभ ॥ उवाच वचनं श्लक्ष्णं मुदा परमया युतः ॥६३॥
तुष्टोऽस्मि वो महाभागा वरं ब्रूत यथेप्सितम् ॥ तच्छ्रुत्वा शङ्करेणोक्तं क्षमाद्या धर्मनन्दनाः ॥६४॥
धर्षिताः स्मो वयं देव ईर्ष्याद्यैः शत्रुभिर्ध्रुवम् ॥ घोरं कलिं समाश्रित्य प्रबलास्ते बभूविरे ॥६५॥
स्थातुं न शक्यतेऽस्माभिस्तान् जेतुं च यथा वयम् ॥ समर्थाः स्मो वयं देव तथा कुरु कृपानिधे ॥
६६॥
तीर्थान्येतानि चास्माकं नृणामिष्टप्रदानि च ॥ भवन्तु देव देवेश यदि तुष्टोऽसि शङ्कर ॥६७॥

शङ्कर उवाच ॥

तथास्तु वो महाभागा ईर्ष्यादीन् जेतुमीशिथ ॥ एतत्कलेरपाये तु पुनः कृतयुगं भवेत् ॥६८॥
तत्राधर्मस्य तनयान् जित्वा यूयं महाबलाः ॥ भविष्यथ महाभागा नात्र कार्या विचारणा ॥६९॥
तावत्कालं च वो दद्मि स्थानं मा भेत्तुमर्हथ ॥ शिवपूजा विष्णुपूजा तथा वृन्दावनादिषु ॥७०॥
अश्वत्थे ज्ञानिषु तथा मातापित्रोश्च सेवने ॥ नदीषु सर्वासु तथा यूयं सर्वे वसिष्यथ ॥७१॥
तीर्थान्येतानि भवतां युष्मन्नाम्नैव सर्वतः ॥ प्रथीयन्तु न सन्देहः स्नातानां पुण्यदानि वै ॥७२॥
युष्मद्गुणा हि तेषां स्युस्ततो यान्ति परं पदम् ॥ इत्युक्त्वा शूलपाणिस्तान् तत्रैवान्तरधीयत ॥७३॥

सूत उवाच ॥

ततः क्षमादयः सर्वे शिवात् प्राप्य मनोरथान् ॥ शिवेनोक्तं यथा यच्च तथा सर्वं प्रचक्रिरे ॥७४॥

सूत उवाच ॥

घोरादीनामाश्रमत उदक्सन्त्याश्रमानि हि ॥ शालूकिन्या दक्षिणतः किमन्यच्छ्रोतुमिच्छसि ॥७५॥
इतिश्रीस्कान्देसनत्कुमारसंहितायांगोकर्णखण्डे अधर्माश्रमादितीर्थवर्णनंनाम त्रिनवतितमोऽध्यायः ॥
९३॥

## ॥ पर्वताश्रम–युगाश्रम वर्णनम् ॥

### पर्वताश्रम्

शतानीक उवाच ॥

मेरुः सपत्नतश्चैव स कथं दुःखमाप्तवान् ॥ कथं तेन तपस्तप्तं सूत तद्वक्तुमर्हसि ॥१॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि मेरोर्दुःखस्य कारणम् ॥ विन्ध्यो नारदवाक्येन मेरुं जेतुं मनो दधे ॥२॥
कथं मेरुमहं जेष्ये इति चिन्तापरोऽभवत् ॥ अनिशं चिन्तयन्नित्यं कृशाङ्गः समजायत ॥३॥
ततो निर्धार्य मनसि गिरिरेकं कुरूद्वह ॥ विक्रमेण विजेतव्यो मया मेरुस्तु नान्यथा ॥४॥
इति निश्चित्य मनसि गत्वा तु निकटं गिरेः ॥ स्वशृङ्गैस्ताडयामास विन्ध्यो मेरुं रुषान्वितः ॥५॥
ततो मेरुः स्वपुत्राभ्यां सहितो गिरिणा भृशम् ॥ विन्ध्येन ताडितो राजन् ततः कोपवशं गतः ॥६॥
पुत्राभ्यां भृत्यवर्गैश्च सहितः प्रत्ययुध्यत ॥ स्वगृहैरायतैस्तीक्ष्णैर्विन्ध्यादिं समताडयत् ॥७॥
स तेन ताडितो राजन् मेरुणा विन्ध्यभूधरः ॥ अतीवोद्विग्नहृदयो वमन्नुधिरमुल्बणम् ॥८॥
भग्नशृङ्गः पपातोर्व्यां किञ्चिन्मूर्च्छामुपागतः ॥ ततो मुहूर्तादुत्थाय मूर्छां त्यक्त्वा महीधरः ॥९॥
कोपेन महताविष्टो मेरुपुत्रौ ह्यताडयत् ॥ रम्यं रमणकं चैव स्वशृङ्गैरुन्नतैर्नृप ॥१०॥
विन्ध्येन ताडितौ राजन् मेरुपुत्रौ महाबलौ ॥ एवं ते कलहं चक्रुर्मिथो राजन् भृशं तदा ॥११॥
किञ्चित्कालं तयोरासीन्नगयोर्मेरुविन्ध्ययोः ॥ युद्धमत्यद्भुतं चासीज्जयाजयविवर्जितम् ॥ १२ ॥
ततो विचिन्त्य बहुधा विन्ध्यो वन्ध्यमनोरथः ॥ व्यवर्धत तदा राजन् स्वशृङ्गैरुन्नतैर्भृशम् ॥१३॥
प्रदक्षिणं प्रक्रमन्तौ मेरुं सूर्यनिशाकरौ ॥ नित्यं तस्मात् त्रिलोक्यां हि प्रथितो बलवानिति ॥^१४॥
तद्बलं नाशयाम्यद्य ऊर्ध्वो भूत्वा गतिं रवेः ॥ रुध्वा जेष्यामि मेरुं तु इति निश्चितमानसः ॥१५॥
अनन्तं गगनं व्याप्य स्वशृङ्गैरुन्नतैस्तदा ॥ सूर्याचन्द्रमसोर्मार्गं रुध्वा तस्थौ महीधरः ॥१६॥
मेरुः शिखरिणां श्रेष्ठो पुत्राभ्यां सह दुःखितः ॥ विन्ध्येन ताडितो राजन् जयाजयविवर्जितः ॥१७॥
कथं शत्रुजयं प्राप्स्य इति मेरुर्व्यचिन्तयत् ॥ एतस्मिन्नन्तरे काले नारदस्तत्र चागतः ॥१८॥
तं दृष्ट्वा नारदं शैलो अभ्युत्थायाभिपूज्य च ॥ पुत्राभ्यां सह देवर्षिं ततः स्वस्य मनोगतम् ॥१९॥
विन्ध्येन यत्कृतं कर्म सर्वं तस्मै न्यवेदयत् ॥ कथं शत्रुजयो मे स्यादिदानीं वै महामुने ॥२०॥
तदुपायं वदस्वाशु कृपा मयि तवास्ति चेत् ॥

नारद उवाच ॥

शृणु शैल प्रवक्ष्यामि उपायं तज्जयेऽधुना ॥२१॥
पुत्राभ्यां सह गोकर्णं गच्छाद्य मम शासनात् ॥ तत्र शालूकिनीतीरे कृत्वाश्रमपदं शुभम् ॥२२॥
शिवलिङ्गं प्रतिष्ठाप्य तीर्थं लिङ्गस्य सन्निधौ ॥ कृत्वा नियममास्थाय तपश्चर शिवं स्मरन् ॥२३॥
पुत्राभ्यां सह शैलेन्द्र शङ्करं परितोषय ॥ ततस्ते मनसोऽभीष्टं भविष्यति न संशयः ॥२४॥
नारदेनैवमुक्तस्तु मेरुः शिखरिणां वरः ॥ पुत्राभ्यां सह गोकर्णं क्षेत्रं सम्प्राप्य भारत ॥२५॥
युगाश्रमात् प्रतीच्यां तु अर्धक्रोशे स्थितं शुभम् ॥ लिङ्गं संस्थाप्य विधिवत् कृत्वा तीर्थं सुनिर्मलम् ॥२६॥
बद्धपद्मासनो मौनी लिङ्गस्य पुरतोऽद्रिराट् ॥ संनियम्येन्द्रियग्रामं तत्र तेपे परं तपः ॥२७॥
एवं तौ तस्य तनयौ रम्यो रमणकस्तथा ॥ पृथक्तीर्थं विधायैव चक्रतुः परमं तपः ॥२८॥
एवं तपस्यतां तेषामगात् संवत्सरत्रयम् ॥ ततः प्रसन्नो भगवान् शङ्करो भक्तवत्सलः ॥२९॥
प्रत्यक्षमगमत्तेषां वृषारूढः प्रियान्वितः ॥ ततस्ते शङ्करं दृष्ट्वा स्तुत्वा च विविधैस्तवैः ॥३०॥
प्रणम्य दण्डवद्भूम्यां कृताञ्जलिपुटा स्थिताः ॥ तान् दृष्ट्वा शङ्करः प्रीतः कृताञ्जलिपुटान् गिरीन् ॥३१॥
प्राह गम्भीरया वाचा वरान् वृणुत पर्वताः ॥ युष्माकं तपसात्यन्तं भक्त्या च नियमेन च ॥३२॥
तुष्टोऽस्मि नितरामद्य तस्माद्दास्यामि वाञ्छितम् ॥

गिरय ऊचुः ॥

वरं ददासि चेद्देव वरार्हा च वयं यदि ॥३३॥
यथा शत्रुजयो वै स्यादस्माकं सर्वदा हर ॥ तथा कुरु महादेव त्वां वयं शरणं गताः ॥३४॥
अस्माकं यत्कृतं तीर्थं लिङ्गं चैव सुरेश्वर ॥ अस्मन्नाम्ना प्रसिद्धं च त्रैलोक्ये पुण्यदं भवेत् ॥३५॥
पापिनामपि सर्वेषां स्नानात् पापक्षयो भवेत् ॥ त्वत्पादकमले भक्तिमनिशं देहि नो हर ॥३६॥
गिरीणां वचनं श्रुत्वा शङ्करो भक्तवत्सलः ॥ मुदा परमया युक्तः पुनस्तान् प्रत्युवाच ह ॥३७॥

शङ्कर उवाच ॥

शैलाः शृणुत मद्वाक्यं युष्मद्धितकरं शुभम् ॥ भवतां शत्रुविजयो भवत्येव न संशयः ॥३८॥
गीर्वाणवचसाऽगस्त्यो विन्ध्यं शास्यति वै मुनिः ॥ स वः समानतां याति अगस्त्यवचनाद्गिरिः ॥३९॥
मनोऽभीष्टं ततो वः स्यान्नात्र कार्या विचारणा ॥ अत्रागत्य नरो यस्तु कार्तिके मासि भूधराः ॥४०॥

सप्तम्यां रविवारे वा सूर्यर्क्षे शुक्लपक्षके ॥ युष्मत्कृतेषु तीर्थेषु स्नात्वा लिङ्गं समर्चयेत् ॥४१॥
तस्मै दास्याम्यहं क्षिप्रं भुक्तिं मुक्तिं न संशयः ॥ अत्र दत्तं मेरुसमं जलं सागरसान्निभम् ॥४२॥
भविष्यति न सन्देहो मत्प्रसादाद्रिरीश्वराः ॥ इति दत्वा वरं तेषां तत्रैवान्तर्दधे शिवः ॥४३॥
एवं लब्धवरो मेरुः शङ्कराद्भरतर्षभ ॥ पुत्राभ्यां सहितः शैलो यथापूर्वमतिष्ठत ॥४४॥
विन्ध्यं संस्तम्भयामास अगस्त्यो देववाक्यतः ॥ ततो मेरुः स्वस्थचित्तो बभूव नृपसत्तम ॥४५॥
एवं युगानि राजेन्द्र शाल्मल्याश्च तटे शुभे ॥ शिवं सन्तोष्य स्वतपसा प्रापुः स्वं वाञ्छितं पुरा
॥४६॥

## युगाश्रमवर्णनं

शतानीक उवाच ॥

युगैः किमर्थं गोकर्णे तपस्तप्तं शिवं प्रति ॥ तैः किं फलमवाप्तं तु सूत नस्तद्ब्रवीहि भो ॥४७॥

सूत उवाच ॥

सृष्टाः स्वयम्भुवा पूर्वं कालाश्च विविधा नृप ॥ कलाकाष्ठमुहूर्ताद्या युगकल्पादिका अपि ॥४८॥
कृतत्रेतद्वापराश्च कलिश्चेति चतुर्युगाः ॥ जातमात्रास्तु ते काला ब्रह्मणो भरतर्षभ ॥४९॥
पितामहं नमस्कृत्य अनुज्ञाप्य ययुस्ततः ॥ ततः कालेन महता युगाः किञ्चिन्मनोगतम् ॥५०॥
विचिन्त्य च तदा जग्मुर्ब्रह्माणं भरतर्षभ ॥ पितरं प्रणिपत्याथ वचनं चेदमब्रुवन् ॥५१॥
आयुर्बलं यशो धैर्यं तथा लक्ष्मीमचञ्चलाम् ॥ रूपं ज्ञानं तथा स्थानं देहि नो तात सांप्रतम्
॥५२॥
इति श्रुत्वा कुरुश्रेष्ठ युगानां वचनं विधिः ॥ अब्रवीत् तानिदं वाक्यं मुदा परमया युतः ॥५३॥
युगाः शृणुत मद्वाक्यं यूयमद्य ममाज्ञया ॥ क्षिप्रं गच्छत गोकर्णं क्षिप्रं सिद्धिप्रदं शुभम् ॥५४॥
तत्र शालूकिनी नाम्नी आस्ते पुण्यतमा नदी ॥ तीर्थं कृत्वा तु तत्तीरे लिङ्गं संस्थाप्य यत्नतः
॥५५॥
अचिरेणैव कालेन प्रसादाच्छङ्करस्य तु ॥ युष्माकमीप्सितफलं भविष्यति न संशयः ॥५६॥
इतीरितं वचः श्रुत्वा ब्रह्मणा ते युगा नृप ॥ हर्षेण महता युक्ताः प्रणिपत्य पितामहम् ॥५७॥
अनुज्ञाप्य ययुः सर्वे गोकर्णं क्षेत्रमादरात् ॥ तत्र गत्वा युगास्ते हि शाल्मलीतट उत्तमे ॥५८॥
कृत्वाश्रमपदं तीर्थं लिङ्गं संस्थाप्य शाम्भवम् ॥ तपस्तेपुर्निश्चलेन मनसा शङ्करं युगाः ॥५९॥
ध्यायमाना निराहारा ययुस्ते बहुवत्सरान् ॥ एवं तपस्यतां शम्भुस्तेषां प्रत्यक्षतामगात् ॥६०॥

दृष्ट्वा युगांस्तदा देवः सादरं त्विदमब्रवीत् ॥ युगाश्च युष्मत्तपसा भक्त्या च नियमेन च ॥६१॥
तुष्टोऽस्मि नितरामद्य वरं ब्रूत यथेप्सितम् ॥ दास्याम्यभिमतं वोद्य यद्यपि स्यात् सुदुर्लभम् ॥६२॥
इति शर्वेरितं वाक्यं श्रुत्वा राजन् युगास्तदा ॥ प्रणम्य दण्डवद्भूमौ शङ्करं भक्तवत्सलम् ॥६३॥
कृताञ्जलिपुटा भूत्वा स्तुत्वा च विविधैः स्तवैः ॥ वरानभिमतांस्ते तु वव्रिरे शङ्करं प्रति ॥६४॥

कृत उवाच ॥

वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ एतदेव वरं मेद्य दर्शनं तव शङ्कर ॥६५॥
योगिनामपि सर्वेषां भावयन् प्रियकृत् सदा ॥ त्वत्पादकमले भक्तिं तथा धर्मस्य संस्थितिम् ॥६६॥
विज्ञानं च धृतिं लक्ष्मीं रूपं स्थानं सदाशिव ॥ आयुर्बलं च मे देहि यदि तुष्टोसि मां प्रति ॥

शङ्कर उवाच ॥

कृत त्वयेरितं सर्वं भविष्यति न संशयः ॥ ६७॥
ज्ञानधैर्यादिसम्पन्नः काले श्रेष्टतमो भव ॥ भवान् सम्पूर्णधर्मस्तु योगिनां प्रियकृद्भव ॥६८॥
कृतायैवं वरं दत्वा शम्भुस्त्रेतमुवाच ह ॥ तव त्रेत प्रसन्नोऽस्मि वरं वरय वाञ्छितम् ॥६९॥
ततस्त्रेतः प्रसन्नात्मा शङ्करं वाक्यमब्रवीत् ॥ ज्येष्ठभ्रातुर्मदीयस्य यथा दत्तं त्वया शिव ॥७०॥
तथा मे देहि भगवन् यदि तुष्टोसि शङ्कर ॥

शङ्कर उवाच ॥

धृतौ शौर्ये तथायुष्ये धर्मे ज्ञाने तथा बले ॥७१॥
भ्रातुः पादविहीनस्त्वं तथा कालाधिपो भव ॥ त्रेतस्यैवं वरं दत्वा द्वापरं प्रत्यभाषत ॥७२॥
वरं वरय भद्रन्ते द्वापर त्वं मनोगतम् ॥ इति शम्भुवचः श्रुत्वा द्वापरो वाक्यमब्रवीत् ॥७३॥
शम्भो भ्रातुर्द्वितीयस्य यथा दत्तं त्वया शिव ॥ तथा मे देहि भगवन् वरार्हो यदि चास्म्यहम् ॥७४॥
इत्युक्ते द्वापरेणाह शङ्करस्तं तदा नृप ॥ बले धैर्ये तथा ज्ञाने धर्मे कीर्तौ तथायुषि ॥७५॥
तस्मात् पादोनतां याहि तथा कालाधिपो भव ॥ इत्युक्त्वा कलिमाहूय शम्भुर्वचनमब्रवीत् ॥७६॥
कले वरय तेऽभीष्टं तुष्टो दास्याम्यहं ध्रुवम् ॥ कलिःश्रुत्वा शिवेनोक्तं वचनं चेदमब्रवीत् ॥७७॥

कलिरुवाच ॥

भगवन् त्वत्प्रसादेन यथा पूज्यो भवाम्यहम् ॥ लोके तथा विभो ब्रह्मन् ब्रह्मक्षत्रविशामपि ॥७८॥

शूद्राणां महतां चेतो बलं चाहरणे विभो ॥ सामर्थ्यं मयि भूयाद्वै क्षिप्रं सिद्धिश्च मेब्दके ॥७९॥
तीर्थान्येतानि देवेश लिङ्गान्येतानि शङ्कर ॥ लोके श्रेष्ठानि भूयासुर्यदि तुष्टोऽसि शङ्कर ॥८०॥
इत्युक्तो कलिना राजन् शङ्करो वाक्यमब्रवीत् ॥ कले यथा तवाभीष्टं तथा भवतु नान्यथा ॥८१॥
शौर्ये ज्ञाने तथायुष्ये ऐश्वर्ये च तथा धृतौ ॥ भ्रातुस्तृतीयस्य तव पादोनस्त्वं भविष्यसि ॥८२॥
युगानामपि सर्वेषां श्रेष्ठस्त्वं सर्वदा भव ॥ क्षिप्रसिद्धिस्त्वयि विभो मत्प्रसादात् कले ध्रुवम् ॥८३॥
युष्मत्कृतानि तीर्थानि तथा लिङ्गानि सर्वशः ॥ युष्मन्नाम्ना प्रसिद्धानि भवन्त्येव न संशयः ॥८४॥
अत्रागत्य नरो यस्तु पुष्यमासे रवेर्दिने ॥ युगादिदिवसे चैव स्नात्वा तीर्थेषु वः कले ॥८५॥
पूजयिष्यति लिङ्गानि तस्य पुण्यफलं शृणु ॥ स सर्वभोगान् भुक्त्वेह अन्ते मम पदं परम् ॥८६॥
यास्यत्येव न सन्देहो मत्प्रसादात् कले नरः ॥ इति दत्वा वरान् तेभ्यो युगेभ्यः परमेश्वरः ॥८७॥
तत्रैवान्तर्दधे सद्यस्तेषु पश्यत्सु पार्थिव ॥

सूत उवाच ॥

एवं लब्ध्वा युगा राजन् शङ्करादीप्सितान् वरान् ॥८८॥
मुदा परमया युक्ता यथाकामं ययुस्तदा ॥ मेरोरुत्तरतः प्राच्यामर्धक्रोशेऽस्ति शोभनम् ॥८९॥
युगानामाश्रमं पुण्यं दर्शनाद्बहुपुण्यदम् ॥

---

## ककुभाश्रमोपक्रमः

युगाश्रमात् प्रतीच्यां तु शरपातेऽस्ति शोभनम् ॥९०॥
ककुभामाश्रमं पुण्यं सर्वपापप्रणाशनम् ॥ पुरा दिशस्तत्र राजन् कृत्वाश्रमपदं शुभम् ॥९१॥
लिङ्गं संस्थाप्य तीर्थञ्च कृत्वा तत्र कुरूद्वह ॥ प्रतोष्य शङ्करं तप्त्वा प्रापुश्चन्द्रमसं सुतम् ॥९२॥
एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥
इतिश्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे पर्वताश्रमयुगाश्रमवर्णनं नाम चतुर्नवतितमोऽध्यायः ॥९४॥

दिगाश्रम्

शतानीक उवाच ॥

कस्माच्चन्द्रमसं पुत्रं प्रापुः सर्वा दिशं कदा ॥ ताभिः कथं तपस्तप्तं तासां तुष्टः कथं शिवः ॥१^॥

सूत मे वद तत्सर्वं ककुभां चरितं महत् ॥ विस्तारेण महाभाग श्रोतुकामाय साम्प्रतम् ॥२॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि निशानाथस्य सम्भवम् ॥ ब्रह्मणो मानसः पुत्रो ह्यत्रि र्नाम महामुनिः ॥३॥

ब्रह्मध्यानपरो नित्यं संयम्यात्मानमात्मनि ॥ बद्धपद्मासनो मौनी चचार सुमहत्तपः ॥४॥

एवं तपस्यतस्तस्य सुचिरं भरतर्षभ ॥ नेत्राभ्यामपतद्वीर्यमत्रेस्तस्य महात्मनः ॥५॥

भूमौ तदभवत् सद्यो ह्रदिनी सुप्रकाशिनी ॥ स्वस्य वीर्यं ततो दृष्ट्वा अत्रिः परमशोभनम् ॥६॥

अमोघं तत्परिज्ञाय दिशः सर्वाः समादिशत् ॥ मद्वीर्यं ध्रियतामाशा अमोघं कार्यगौरवात् ॥७॥

इत्युदीरितमाकर्ण्य अत्रेर्वाक्यं दिशस्तदा ॥ पृथग्विभज्य तद्वीर्यं दध्रिरे तत्क्षणान्नृप ॥८॥

ततः कतिपयाहःसु गतेषु ककुभो भृशम् ॥ असहन्त्यश्च तद्धर्तुं अत्रेर्निकटमाययुः ॥९॥

दृष्ट्वाऽत्रिं हरितो राजन् प्रणम्य भुवि दण्डवत् ॥ कृताञ्जलिपुटा भूत्वा तमूचुः सकला दिशः ॥१०॥

अत्युल्बणं तव मुने वीर्यं धर्तुं न शक्नुमः ॥ तदुपायं वद विभो क्रियतेऽस्माभिरञ्जसा ॥११॥

अत्रिरुवाच ॥

वक्ष्यामि तदुपायं वै शृणुध्वं वचनं मम ॥ पश्चिमाब्धिसमीपे तु आस्ते गोकर्णनामकम् ॥१२॥

क्षेत्रं प्रियतमं तत्र गच्छध्वं मम शासनात् ॥ शालूकिन्यास्तटे यूयं युगाश्रमसमीपतः ॥१३॥

कृत्वाश्रमपदं सर्वास्तीर्थं लिङ्गं यथाविधि ॥ इन्द्रियाणि च संयम्य क्रियतां तप उत्तमम् ॥१४॥

विधिमुद्दिश्य सुचिरं परमेण समाधिना ॥ युष्माकं कृपया तत्र ब्रह्मा श्रेयो विधास्यति ॥१५॥

इत्युदीर्य दिशः सर्वास्तूष्णीमास्ते मुनिस्तदा ॥ ततो दिशः प्रणम्यात्रिं त्रिः परिक्रम्य निर्ययुः ॥१६॥

गोकर्णं क्षेत्रमासाद्य शालूकिन्यास्तटे शुभे ॥ युगाश्रमसमीपे तु कृत्वाश्रमपदं शुभम् ॥१७॥

तीर्थं कृत्वा सुविमलं लिङ्गं संस्थाप्य यत्नतः ॥ ब्रह्माणं मनसा ध्यात्वा तपश्चक्रुः सुदारुणम् ॥
१८॥

एवं गतेषु वर्षेषु ह्याशामाविरभूद्विधिः ॥ तासां पुरःस्थितो ब्रह्मा उवाच च दिशः प्रति ॥१९॥

तुष्टोऽस्मि नितरामाशास्तपसा च दमेन च ॥ वरान् ब्रूत यथाकामं दास्येहं मनसेप्सितान् ॥२०॥

ब्रह्मन्नत्रेर्धृतं कुक्षावस्माभिर्वीर्यमुज्वलम् ॥ इतः परं न शक्यं हि धर्तुं तद्वीर्यमञ्जसा ॥२१॥

तदाकृष्य च देवेश अस्माकं त्वं सुखं कुरु ॥ भविष्यामः सुखिन्यो वै त्वत्प्रसादान्महेश्वर ॥२२॥

अस्माभिर्यत् कृतं तीर्थं त्रैलोक्ये विश्रुतं भवेत् ॥ इत्युक्त्वा हरितो राजन् तूष्णीमासन् तदा नृप ॥
२३॥

इति तासां वचः श्रुत्वा स्रष्टा प्राह तदा दिशः ॥

ब्रह्मोवाच ॥

युष्माभिर्यत् कृतं तीर्थं सर्वपापहरं भवेत् ॥२४॥

युष्मन्नाम्ना प्रसिद्धं तु लोके तु हरितो भवेत् ॥ ऊर्जशुक्लदशम्यां यस्त्वत्रागत्य नरोत्तमः ॥२५॥

युष्मत्तीर्थे तु विधिवत् स्नात्वा मां स्थण्डिले यजेत् ॥ ऐहिकामुष्मिकान् भोगान् भुक्त्वा याति परं
पदम् ॥२६॥

इत्युक्त्वा हरितो गर्भं मन्त्रेणाकृष्य विश्वसृट् ॥ भूमौ पृथक् पातयित्वा ब्रह्माऽत्रेर्वीर्यमुल्बणम् ॥
२७॥

ततस्तदैक्यमकरोत् तत् क्षणादभवच्छिशुः ॥ देदीप्यमानो महसा दिशो दश विकासयन् ॥२८॥

दृष्ट्वा तं बालकं ब्रह्मा मुदा परमया युतः ॥ चकार जातकर्मादि नामधेयं ततः परम् ॥२९॥

सूतत्वात् सर्वसस्यानां सोमो नाम्ना भवेदसौ ॥ प्रह्लादत्वाच्च लोकानां चन्द्र इत्यपि चोच्यते ॥
३०॥

एवमुक्त्वा गृहीत्वा तं बालं चन्द्रमसं विधिः ॥ रथमारोप्य वेगेन सत्यलोकमगान्नृप ॥३१॥

दिशश्च विदिशः सर्वा निरुजश्चाभवन् तदा ॥ स्वं स्वं स्थानं ययुः पश्चाद्राजन् प्राप्तमनोरथाः ॥
३२॥

सूत उवाच ॥

युगाश्रमात् प्रतीच्यां तु शरपाते दिगाश्रमम् ॥ दर्शनात् स्पर्शनात् स्नानात् सर्वपापक्षयो भवेत् ॥
३३॥

---

## गालवाश्रमं

तस्मादाग्नेयदिग्भागे अर्धक्रोशे ऽतिपावनम् ॥ गालवस्याश्रमं पुण्यं सर्वसिद्धिप्रदं शुभम् ॥३४॥

तीर्थं कृत्वा पुण्यतमं समाराध्य महेश्वरम् ॥ सिद्धिं प्राप परां राजन् गालवो मुनिपुङ्गवः ॥३५॥

तत्तीर्थे स्नानमात्रेण सर्वपापैः प्रमुच्यते ॥

---

## कहोळाश्रमं

तस्मादाग्नेयदिग्भागे कहोळस्याश्रमं नृप ॥३६॥
कहोळाख्यो मुनिः पूर्वं स्नात्वा तीर्थे स्वयंकृते ॥ स्थण्डिले शिवमभ्यर्च्य परां सिद्धिमुपागमत् ॥
३७॥
ऊर्जशुक्लद्वितीयायां स्नात्वा तीर्थे तु तत्कृते ॥ स्थण्डिले शिवमभ्यर्च्य शिवध्यानपरायणः ॥३८॥
सर्वपापविनिर्मुक्तः स्वर्गलोकमवाप्तवान् ॥

---

## कनकाश्रमं

तस्माद्दक्षिणदिग्भागे शरपातद्वयावधि ॥३९॥
सर्वदुःखहरं पुण्यं कनकस्याश्रमं परम् ॥ कनकाख्यो राजपुत्रस्तत्र सम्पूज्य शङ्करम् ॥४०॥
पित्रा त्यक्तः स्वकं राज्यं प्राप्तः शम्भोरनुग्रहात् ॥

शतानीक उवाच ॥

कस्य पुत्रः स कनकः पित्रा त्यक्तः कुतश्च सः ॥४१॥ कथं राज्यं स्वकं प्राप सूत नो वक्तुमर्हसि
॥

सूत उवाच ॥

पुरा मगधदेशीयो सुरूप इति भूपतिः ॥४२॥
धर्मेण पालयामास प्रजाः पुत्रानिवौरसान् ॥ तस्य पुत्रस्तु कनको प्रजानामपि हिंसकः ॥४३॥
बाल्ये स्वेन समं बालान् क्रीडमानान्निबध्य च ॥ जले क्षिपति मूढात्मा तान् बालान् ताडयत्यपि ॥
४४॥
तस्मिन्नेवं विधे राज्ञे प्रजाः सर्वं न्यवेदयन् ॥ ततः स राजा धर्मात्मा श्रुत्वा पुत्रकृतं त्वघम् ॥४५॥
किं करोमीति सञ्चिन्त्य दुष्पुत्रः कुलनाशकः ॥ श्रेयो ह्यपुत्रत्वमपि दुष्पुत्रत्वान्न संशयः ॥४६॥
एवं सञ्चिन्त्य बहुधा स्वपुत्रं पापचारिणम् ॥ राष्ट्रान्निर्यापयामास दुःखेन महता युतः ॥४७॥
सुतः स कनकः प्राप अरण्यं जनवर्जितम् ॥ मध्याह्ने चातपश्रान्तः क्षुत्पिपासातुरो भृशम् ॥४८॥
दुःखसन्तप्तहृदयो निषसाद तरोरधः ॥ बहुधा चिन्तयामास स्वकृतं बहुपातकम् ॥४९॥
मया कृतस्य पापस्य फलमद्य समागतम् ॥ विचिन्त्यैवं स बहुधा तत्र मूर्च्छामवाप च ॥५०॥
लब्धसंज्ञो मुहूर्तेन स्वयमेव नृपात्मजः ॥ उपविष्टः शनैस्तत्र दृष्टवान् मुनिपुङ्गवम् ॥५१॥
शाण्डिल्यं दैवतः प्राप्तं तपसा दग्धकिल्बिषम् ॥ तं दृष्ट्वा मुनिवर्यं तु सहसोत्थाय चाब्रवीत् ॥५२॥

स्वागतं ते मुनिश्रेष्ठ धन्योहं तवदर्शनात् ॥ अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥५३॥
केन कर्मविपाकेन जाता पापरतिर्मम ॥ राज्यभ्रष्टोऽभवं येन तन्मे वद महामुने ॥५४॥

शाण्डिल्य उवाच ॥

शृणु तेहं प्रवक्ष्यामि यत्कृतं राजनन्दन ॥ त्वया पूर्वभवे नूनं कृतं घोरतरं शृणु ॥५५॥
त्वं हि पूर्वभवे जातो वैश्यायां शूद्रपूरुषात् ॥ दुर्वृत्तस्त्वं स्तेयशीलो सदा मद्यपशीलवान् ॥५६॥
कुयोनिसङ्गतिरतः प्रजाहिंसादिकृत्खलः ॥ एवं बहुदिनेऽतीते कदाचित् पुण्यवासरे ॥५७॥
सर्वे जनास्तदा जग्मुस्नानार्थं पुण्यनिम्नगाम् ॥ तान् दृष्ट्वा त्वं सुदुर्बुद्धिः पापकर्मचिकीर्षया ॥५८॥
गतस्तत्स्नानसन्ध्यादि जपपूजादिकं च यत् ॥ सर्वं दृष्टं त्वया तत्र पश्चात् कुमतिसङ्गतः ॥५९॥
मार्गं रुध्वा तु तेषां वै वस्त्रभूषादिकं हृतम् ॥ ततः कालेन महता मृतस्त्वं विपिनान्तरे ॥६०॥
पश्चाज्जातो नृपक्षेत्रे तेषां स्नानादिदर्शनात् ॥ वस्तूनां हरणात्तेषां जाता ते बुद्धिरीदृशी ॥६१॥
राज्यभ्रष्टस्ततस्त्वं हि वर्तसे विपिनान्तरे ॥ पुनस्त्वां राज्यलाभार्थमुपायं वच्मि साम्प्रतम् ॥६२॥
गोकर्णाख्यं महाक्षेत्रमास्ते वै दक्षिणापथे ॥ तत्र गत्वा तपस्तीव्रं शिवं प्रति समाचर ॥६३॥
ततः शिवप्रसादेन स्वकं राज्यं त्वयाप्यते ॥ इत्युक्ते मुनिना तेन शाण्डिल्येन महात्मना ॥६४॥
ततः स कनको हृष्टस्त्रिः परिक्रम्य तं मुनिम् ॥ नमस्कृत्वाभ्यनुज्ञातो गोकर्णं प्रययौ तदा ॥६५॥
कहोळस्याश्रमात् पुण्याद्दक्षिणस्यां कुरूद्वह ॥ शरपातद्वयमिते शुभे देशे नृपात्मजः ॥६६॥
कृत्वाश्रमपदं तीर्थं तत्र शम्भुं समर्चयन् ॥ तपश्चचार सुचिरं मौनव्रतपरायणः ॥६७॥
बद्धपद्मासनो मौनी ध्यायन् परशिवं हृदि ॥ एवं तस्य व्यतीयाय महान् कालस्तपस्यतः ॥६८॥
ततस्तुष्टो महादेवस्तस्य प्रत्यक्षतां गतः ॥ तुष्टस्ते राजपुत्राहं भक्त्या चानन्यया भृशम् ॥६९॥
वरं वरय चाभीष्टं मत्तो यदभिवाञ्छसि ॥ एवमुक्ते शङ्करेण कनकः प्रत्यभाषत ॥७०॥

कनक उवाच ॥

नमस्त्रिशूलहस्ताय भक्तार्तिशमनाय च ॥ राज्यभ्रष्टं महादेव पाहि मां शरणागतम् ॥७१॥
यदि तुष्टोसि देवेश वरार्होऽहं यदीश्वर ॥ राज्यभ्रष्टोऽस्मि देवेश पित्रा निष्कासितस्त्वहम् ॥७२॥
यथा पितुः प्रियतमो स्वकं राज्यं लभेद्यथा ॥ तथा कुरु जगन्नाथ ममेदं चाश्रमं विभो ॥७३॥
तीर्थमेतज्जगन्नाथ सर्वाभीष्टप्रदं तथा ॥

शङ्कर उवाच ॥